MSS No. 192 Subject Religion

Name of MSS वाल्मीकिरामायण Vālmikiya rāmāyana

Author – –

Period 1696 विक्रमी Folios 179

Script Sanskrit Source Prithipal Singh, Amritsar

Missing Folios – –

श्रीराम·
का·

192

192

रामाय॰
टीका॰
२

ॐनमः ॥ श्रीगणेशाय नमः ॥ श्रीरामाय नमः ॥ अतः परमयोध्याकांडं विख्याति
कस्यचित्त्वथ कालस्य राजा दशरथः सुतं । भरतं कैकेयीपुत्रमिदं वचनमब्रवीत् ॥ १ ॥ अ
केकयराजस्य पुत्रो वसति पुत्रक । त्वां नीतुमागतो वीर युधाजिन्मातुलस्तव ॥ २ ॥ तस्मान्मे
महद्दुर्भिक्षितोनेन समं त्वया । गंतव्यं पश्य पुत्र त्वं पुत्रं मातामहस्य तत् ॥ ३ ॥ श्रुत्वा दाशरथं वाक्यं
भरतः कैकयीसुतः । गमनेथ मतिं चक्रे शत्रुघ्नसहितस्तदा ॥ ४ ॥ श्रुत्वा बहुतं संभाष्य कैकेयीं भ्यारं
पात्मजं । भरतं चाप्यनुज्ञातं राज्ञा राजीवलोचनं ॥ ५ ॥ प्रहृष्टा तत्र कैकेयी मुदा परमया युता । चिंतया
मास गमनं भरतस्य महात्मनः ॥ ६ ॥ गमनेच मतिं चक्रे तदा तस्याश्रुमानना । स्वहमातामहकुलं समं
नं मन्यते हि सा ॥ ७ ॥ नहि कश्चिद्विशेषो मे तस्मिन्वापीह वा गृहे । मच्च न्यनुज्ञाय हृदयं स्तुतं स्नेहसुतोपमं
७ ॥ तस्मा वचो श्च कैकेयीं नंदरा जरद्दृशति । आपृच्छ्य पितरं सोथ रामं चाक्लिष्टकारिणं ॥ ९ ॥ आपृ
श्चैव महाबाहुः शत्रुघ्नसहितो ययौ । अमात्यैर्बहुभिर्गुप्तो वैश्यैश्च शुभवाजिभिः ॥ १० ॥ पदातेन
... गतसहस्राः ॥ ... मनुज्ञात... परिवृतश्च बाहुना ॥ ११ ॥ भरतः सिंहवि

न्वयतिर्भवतं वाक्यगद्गदं। व्याजहार महातेजा गम्यतामविचारय ॥२४॥ सोभिवाद्य जितक्रोधो राजानं
शिरसा तदा। मातरं च महाभागः शत्रुघ्नसहितस्तदा ॥२५॥ मातुलौ नगरं धीमान्बलेन परिवारितः
तथानुगम्यमानश्च सर्वैः पुरनिवासिभिः ॥२६॥ रामेण च महाभागो लक्ष्मणेन च वीर्यवान्। पुर
स्कृतो ययौ धीमान्प्रीतस्निग्धौ दिनस्यतो ॥२७॥ अभिवाद्य रामं भरतः परिष्वज्य च लक्ष्मणं। न्यव
र्त्तयत धर्मात्मा तदा सर्वसुहृज्जने ॥२८॥ अनुगम्यमानो विधिवत्प्रयातः कृतमंगलः। निवर्त्य सज्ज
नं सर्वं प्रययौ शीघ्रवाहनः ॥२९॥ परं मातामहज्ञितं यमध्यास्ते स धर्मवित्। कथायोगेन सुहृदो
मनोज्ञेन सहानुगः ॥३०॥ दिवसैः कैश्चिदेवाथ स प्राप्तो नबलवाहनः। सरितः पर्वतांश्चैव व्यतिक्रम्य
महाभुजः ॥३१॥ उपस्थितो वै नगरं तदा राजगृहं विभुः। अद्भुतं प्रेषयामास राज्ञोऽश्वस्य धीमतः ॥३२॥
आर्यकास्य महातेजा भरतः प्रियदर्शनः। श्रुत्वाद्भुतस्य वचनं स राजा सह मंत्रिभिः। प्रवेशयामास तदा
भरतं नगरोत्तमं। पुष्पैर्गंधैश्च धूपैश्च सर्वतः समलंकृतं ॥३५॥ राजमार्गस्तदा कीर्णो जलेन च समुक्षितः
समुच्छ्रितपताकं च हर्म्यौन्त्यस्वननिनादितं ॥३६॥ वेश्याभिर्वारमुख्याभिर्वाद्यानुगतशोभितं। ततो

श्रीमानः शत्रुघ्नश्च महामतिः तं तदा प्रस्थितं वीरं भरतं वदतां वरं ॥ २२ ॥ उवाच राजा राजर्षिर्मस्नेहं भरतं प्र
ति । प्रस्थितस्त्वं नरवर मातामहकुलं प्रति ॥ २३ ॥ शत्रुघ्नसहितं गच्छ मातामहकुलं विभो । मातामहा
यो भविता सत्यं तानि त्यमनुव्रता ॥ २४ ॥ सन्देक्ष्यामि च तत्रापि संदेशं तव सिद्धये । तव चैव महाबाहो
शत्रुघ्नस्य च मानद । २५ नित्यं त्वाश्च त्वया कार्या शुश्रूषा मातुलस्य तु । आर्यक कर्म च ते नित्यं कार्यं को
लेभिवादनं ॥ २६ व्रते चर्या त्वया पुत्रक र्त्तव्या यैयतात्मना । ब्राह्मणैः सह धर्मात्मा वास [illegible] कदा
हन ॥ २७ कालेकाले यथोक्तं च ब्राह्मणानभिवादये ब्राह्मणा हि श्रियो मूलं पकवस्य पुत्र
र्थिनः ॥ २८ सहायार्थे च कर्त्तव्यः पुत्र [illegible] नियतात्मना । सर्वविद्यान्तगा धन्या मंगल्या ब्राह्मणास
दा ॥ २९ देवाः पुत्र भवार्थं वै प्रज्ञानां सुरसत्तमैः प्रेषिता मानुषं लोकं भूमिदेवा इति स्मृताः ॥ ३०
अप्रवह प्रहेच्छो चैव व्यायामं कुरु नित्यशः । गंधर्वविद्यास्तु तदा पारगो भव पुत्रक ॥ ३१ [illegible] न्येषु
पि च शिष्येषु यत्नः कार्यः परंत्वया । क्षणमप्यासि वत्स पुत्र हष्ट्वा नार्हसि सर्वदा ॥ ३२ ॥ केशालप्रे [illegible]
षतां चापि द्दनैः कार्यं सदैव मे । श्रुत्वा कुशालिनं दित्वा नंदिष्यामि सबांधवैः ॥ ३३ ॥ एवमुक्त्वा सहातेन
सिक्ति

स्तूयमानाभिर्भर्तस्य महात्मनः ॥३७॥ नरमुख्यैश्च बहुभिः सूतमागधवंदिभिः स्तूयमानो यथा
न्यायं भरतः प्रविवेश ह ॥३८॥ प्रविश्य च गृहे रम्ये अभिवाद्य च मातुलं । वृद्धं मातामहं चैव तथैव
नृपयोषितः ॥३९॥ सर्वैर्मातामहगृहे सर्वकामैः सुसत्कृतः उवास सत्सु भरतो धीमान्कंचित्कालं
नृपात्मजः ॥४०॥ इत्यार्षे रामायणे अयोध्याकांडे भरतप्रस्थापनो नाम प्रथमः सर्गः ॥१॥
कदाचिद्भरतः श्रीमान्वृद्धं मातामहं नृपं । अभिवाद्य महात्मानो भिदं वचनमब्रवीत् ॥१॥ आचार्या
नुगच्छेयं भवतो नमनेश्वरो । लेख्यसंख्यानशब्दं च ज्योतिःशास्त्रस्य पारगं ॥२॥ विविधास्तु चो
द्यास्तु संतिष्ठान्ब्राह्मणानपि । विनीतान्हस्तिशिक्षायां तथा पृष्ठेन यो वच ॥३॥ गांधर्वीषु च विद्यासु
शिल्पज्ञानिषु चापरान् । नरान्विनीतान्वृद्धान्वै वेत्तुमिच्छामि नत्वतः ॥४॥ ब्राह्मणान्वेदविदुषो दृ
ढान्येव महाजितम । व्यादिष्टा भवता शिक्षामि शिक्षां पार्श्वे मम नित्यशः ॥५॥ श्रुत्वा तु भरतस्यैतद्वचः प
रमहृष्टवान् । आज्ञापयन्तदा राजा तदुक्तं भरतेन वै ॥६॥ श्रुत्वा तु भरतो राज्ञा व्यादिष्टान्पुरुषान्नृ
सर्वविद्यासु कुशलान्परं हर्षमवाप ह ॥७॥ प्रदाय शिष्यमात्मानं तेभ्यः स रघुनंदनः आचार्य

सदा विद्याधर्मेणाधिजगाम ह ॥ १७ ॥ सोनुपूर्वेण तान्सर्वान्परिजग्राह स तु व्रतः सदन्नातामहातेजाः श
नुघ्नेन यशस्विना ॥ १८ ॥ एवमाचार्यहस्तेषु वर्तमानो नरोत्तमः । रममाणो नरव्याघ्रः प्रदहर्षमवा
प ह । ॥ १९ ॥ शुश्रूषितं यथान्याय्यमाचार्यं नियतेंद्रियः अर्थमानप्रदानाभ्यां यथाकालमतंद्रितः
॥ २१ ॥ ज्ञानाभ्यासे प्रवृत्तस्य विज्ञाने निरतस्य च । एवं कालोप्यतिक्रामन्स्तु महात्मनस्तस्य च ॥ २२ ॥
यदा ज्ञातेषु निष्ठां वै प्राप्तवान्रघुनंदनः ततोस्य बुद्धिः संजाता धर्मसंश्रोतुं सनातनं ॥ २३ ॥ ब्राह्मणे
भ्योथ वृद्धेभ्यो भिक्षुकेभ्योथ धार्मिकः ये चान्येपि महाभागा धर्मेषु कुशला द्विजाः ॥ २४ ॥ तान्सर्वा
न्स महातेजाः सर्वेंते धर्मकारणात् आत्मवान्मनि धर्मोस्य सततं पर्युवर्तत ॥ २५ ॥ कषायो धर्मयुत
यो रमते रघुनंदनः तपो हिंसारता नित्यं ये च धर्मपरायणाः ॥ २६ ॥ तपोहिंसारतानित्ये तान्सर्वा
न्स महातेजा तपान्वेते निर्वृतः शुचिः शास्त्राणि च महाप्राज्ञो नित्यशो गुणवान्नृपि ॥ २७ ॥
वेदविद्यासु धान्यासु कुशलः सर्वशास्त्रवित् । कृतकृत्यमिवात्मानं मन्यते धर्मसेवनात् ॥ २८ ॥ तस्य
बुद्धिः समभवत्पितुः संप्रेक्षणं प्रति । मन्दिदेशात्तदा कृतं ब्राह्मणं प्रभुमलसः ॥ २९ ॥ अयोध्यां गत्वा

श्रीरा
अयोध्या
३

रामे
३

भद्रं ते हृत शोऽहं नृपोत्तमं । पितरं कुशलं ब्रूहि मातृश्च भ्रातरौ तथा ॥ २० ॥ पृष्टश्चैव कुशलं ते प्रोवाच पुत्रो
दशरथः प्रभुः । मातामहस्त्वभिवादेनात वर्तते न वदन्तु महात्मा ॥ २१ ॥ यथाज्ञापनं कृतं तात मह त्वं वक्ता तं श्रुत्वा ।
स हुते नाभ्यनुज्ञातो भरतेन यशस्विना ॥ २२ ॥ दूतः परम संहृष्टः प्रयातोऽयेन सा पुरी ॥ अयोध्यां नगरीं
रम्यां प्रविवेश महात्मनः ॥ २३ ॥ प्रांस राजीवनाशाक्षो राजा दशरथं वैद्यमत् । शास्त्रवानथ नाहूतो भ
रतस्यानुशासनात् ॥ २४ ॥ न्यवेदयत नन्दाज्ञे मातृभ्यो याद्विजस्तदा । हंत कृत्पोऽथ राजेन्द्रो भरतः स
त्यविक्रमः ॥ २५ ॥ धनुर्वेदे च वेदे च नीतिशास्त्रेषु पारगः । अर्थशास्त्रेषु कुशलो व्यायामेषु तथैव च
॥ २६ ॥ अस्त्रशिक्षासु निपुणो रथशिक्षाविशारदः । आलेख्ये चैव लेख्ये च लंघने प्लवने तथा
॥ २७ ॥ ज्योतिर्गति षु निष्णातस्त्वव वाक्येन नोदितः । एवंविधानि कर्माणि तथा तानि सु बहून्यपि ॥ २८ ॥
कृता श्रीभरतो राजन्स्त्व[illegible] त्संवाद्यामुपेष्यति । श्रुत्वा राजा प्रहृष्टात्मा हृतस्य वचनं तदा ॥ २९ ॥ कौसल्या
द्याश्च देव्यस्तास्तथा गौरामलक्ष्मणौ । इति संश्रुत्य नृपति वचो हृतस्य वै तदा ॥ ३० ॥ अभवन्मुदिताः
श्रीमांस्तदा दशरथो नृपः ॥ ३१ ॥ इत्यार्षे रामायणे अयोध्याकांडे दूताधिगमनो नाम द्वितीयः सर्गः

गतेथ भरते रामो लक्ष्मणश्च महाबलः ॥ पितरं देवसंकाशं पूजयामासतुस्तदा ॥ १ ॥ पितुराज्ञांतु
श्रेष्ठौ तु त्वा परमहर्षितौ । पौरकार्याणि सहितौ चक्रतुः कृत्स्नशस्तदा ॥ २ ॥ मातॄणां सर्वकार्याणि
कृत्वा च रघुसत्तमौ । गुरोश्च सर्वकार्याणि काले कालेन्ववेक्षतां ॥ ३ ॥ राजा दशरथः प्रीतो ब्राह्म
णा नैगमास्तथा । रामस्य शीलवृत्ताभ्यां सर्वे च विषये जनाः ॥ ४ ॥ रुरुचुः सहिताः सर्वे देवकल्प
स्य धीमतः ॥ ५ ॥ अथ राजा महातेजाः सस्मार प्रोषितौ सुतौ । उभौ भरतशत्रुघ्नौ किंचिच्छोको बभूव
सः ॥ ६ ॥ सर्व एव तु तस्येष्टाश्चत्वारः पुरुषर्षभाः । एकस्मादभिनिर्वृत्ताः शरीरादिव बाहवः ॥ ७ ॥
तेषामपि तमो लोके रामो रतिकरः पितुः । शीलविद्यावयोवृद्धाञ्ज्ञानवृद्धांश्च सज्जनान् ॥ ८ ॥ क
थयामास तान्नित्यमस्त्रयोग्यामु निर्गुणाः । कल्याणाभिजनः साधुरदीनः सत्यवागृजुः ॥ ९ ॥ वृद्धैर
भिविनीतश्च समर्थो धर्मनैपुणे । धर्मकामार्थतत्त्वज्ञः स्मृतिमान्धर्मकोविदः ॥ १० ॥ लौकिके समु
दाचारे सविकल्पविशारदः । स्मितपूर्वाभिभाषी च सत्यवाग्व्यवसायवान् ॥ ११ ॥ अदीर्घसूत्रो दृढसं
धिः प्रियास्तु प्रतिपत्तिमान् । सुखेष्वपसंगी सुहृदामर्थग्राही प्रियंवदः ॥ १२ ॥ निवृत्तः संवृत्ताचारो

प्रमंत्रः सहायवान् । सानुक्रोशोग्रोबमंत्रज्ञस्त्यागीसंयमकालवित् । २२ दृढभक्तिः स्थिरप्र
ज्ञोगुणग्राहीनदुर्वचः निस्तन्द्रीरप्रमत्तश्चस्वदोषपरदोषवित् ॥ २३ ॥ परिग्रहानुग्रहयोर्यथा
न्यायमवेक्षिता । कस्यचिदुपकारेणकृतेनैकेनकस्यचित् ॥ २४ ॥ नस्मरत्यपकाराणांशतमप्यात्
मवत्तया ॥ अर्थकर्माणुपायज्ञोधर्मेणावेक्ष्यतेसदा ॥ २५ ॥ श्रेष्ठंचार्थप्रदानेनप्राप्तोव्यायामिके
षु । अर्थधर्मावसंक्लेश्यः सुखतन्त्वेननालसः ॥ २६ ॥ वैहारिकाणांकार्याणांविज्ञानार्थीनयथा
र्थवित् । आरोहणेचविनीतानांयुक्तोवारणवाजिनां ॥ २७ ॥ धनुर्वेदविदांश्रेष्ठोलोकेतिरथसम्मतः
अभियाताप्रहर्ताचसेनानयविशारदः ॥ २९ ॥ अप्रधृष्यश्चसंग्रामेक्रुद्धैरपिसुरासुरैः अनसू
युर्जितक्रोधोनदुष्टोनचमत्सरी ॥ २० ॥ नचावमन्ताभूतानांनचकालवशानुगः सत्यवादीमहोत्सा
होदृढसेवीजितेन्द्रियः ॥ २१ ॥ मितवागपिकार्येषुवक्तावाचस्पतेः समः लोकप्रियत्वेचंद्रस्यवसु
धायाः क्षमागुणैः ॥ २२ ॥ बुद्ध्याबृहस्पतेस्तुल्योवीर्येचसाक्षाच्छचीपतेः लोकसंख्याप्रमात्मानंप्राप्तः
सर्वधनुष्मतां ॥ २३ ॥ वीर्यवान्नचवीर्येणमहतातेनविस्मितः तैः तैः सर्वैः प्रजाकांतैः प्रीतिसंजननैः

श्रीः

श्रीराम्रा

का०

५

पितुः ॥२४॥ गुणैर्विरुरुचे रामो दीप्तः सूर्य इवांशुभिः तमेवं वृत्तसंपन्नं रामं सत्यपराक्रमम् ॥२५॥
लोकपालोपमं नाथमकामयत मेदिनी। अनुरक्ताः प्रजास्तं हि सांद्रक्रोधं प्रजाहितं ॥२६॥ तंधै
र्यसमुद्रोत्साहं शास्त्रे च परिपालने। बुद्धिश्चातिगुणोपेतैरात्मधर्मार्थतत्त्ववैः ॥२७॥ स हि बाल्यात्प्र
भृत्येव नृपतिः समयोजयत्। स्वभावेन विशुद्धेन सर्वशास्त्रगमेन च ॥२८॥ सोऽभवत्सर्वभूतानामभि
वोऽस्य गुणवत्तया। तमेवं बहुभिर्युक्तं गुणैरनुपमैः सुतं ॥२९॥ प्रेक्ष्य राजा दशरथश्चिंतयामास तं प्र
ति। तस्य बुद्धिरियं जाता वृद्धस्य चिरजीविनः ॥३०॥ यौवराज्येऽभिषिंचामि सुतं राममिति स्थि
रा। सा तस्य परमा प्रीतिर्हृदये पर्यवर्तत ॥३१॥ कदा राममहेन्द्राभमभिषिक्तमिति प्रभुः वृद्धि
कामो हि नाकस्य सर्वभूतानुकारकः ॥३२॥ भानुः श्रियतेजो लोके पर्जन्य इव वृष्टिमान्। यम
शक्रसमो वीर्ये बृहस्पतिसमो मतौ ॥३३॥ महीधरसमो धृत्या गांभीर्ये सागरोपमः महीमह
मिमां शक्तां नामभिषिक्तं तमात्मजं ॥३४॥ कुलक्रमागतं राज्यं कुलपरंपरा नियुज्याहि। ततः समीक्ष्य
महाराजा सन्नुपेतं सुतं गुणैः ॥३५॥ स हि संभ्रम्य सचिवैर्यौवराज्यममंत्रयत्। द्विवर्षं चैवांतर्वि

राम

५

मं च सौमं चोत्पातजं भयं ॥ २६ ॥ आचचक्षे हि मेधावी शरीरेणात्मनो जरां । एवं चिंतयतस्तस्य रामे
प्रीतिर्महात्मनः ॥ २७ ॥ ततस्तस्य स्वभावं स्वभावज्ञा विज्ञाय ज्ञानकोविदाः गुरवो मंत्रिणश्चैव परां प्रीतिं गता हि
ते ॥ २८ ॥ ततस्ते मंत्रयामासुर्यौवराज्यमभीप्सवः पूर्णचंद्रनिभस्यास्य सदृशस्यानंदनैर्गुणैः ॥ २९ ॥
लोकप्रियत्वं रामस्य बुद्ध्वा तेऽथ महात्मनः आत्मनश्च प्रजानां च श्रेयसा च प्रियेण च ॥ ३० ॥ कालज्ञो
ऽतिसंयोगं तेनात्वरत निश्चिताः । अर्हत्येष हि धर्मात्मा यौवराज्यं महाबलः ॥ ३१ ॥ समर्थः सर्वका
र्येषु शक्रतुल्यपराक्रमः एवं संमंत्र्य संहिताश्चचुर्दशरथं नृपं ॥ ३२ ॥ राजन्धर्मेण धर्मज्ञ पृथिवी
ते परिपालिता । गतश्च सुमहत्कालो वृद्धोस्यस्य नरेश्वर ॥ ३३ ॥ स राममभिवृद्धं नो नरश्रेष्ठ सिंचस्व सा
र्वं । ते षांतु वचनं श्रुत्वा मनोज्ञं हृदयस्थितं ॥ ३४ ॥ अनिच्छन्निव जिज्ञासुस्तत्र तत्र जनं प्रत्युवाच ह ।
कथं नु मयि धर्मेण पृथिवीमनुशासति ॥ ३५ ॥ भवंतः कर्तुमिच्छंति युवराजं ममात्मजं । तत
श्चुर्महात्मानं वृद्धं दशरथं नृपं ॥ ३६ ॥ बह्वः सत्कल्याणगुणाः पुत्रस्य संति ते । पुत्रस्ते देवस
दृशः स्वाध्यायाचारसंयुतः ॥ ३७ ॥ प्रियश्चाप्रियवादी च प्रजानां पितृमातृवत् । बहुश्रुतानां हि

श्रीरा
अ·का·
६

ज्ञानांब्राह्मणानामुपासिता ॥ ३८ ॥ नतज्ञातिषुनमित्रेषु नचज्ञानपदेष्वपि । जनोऽस्यगुणवादीयो
रामस्यनुविजृम्भते ॥ ३९ ॥ सवृद्धबालाः पौरास्तुतस्याजानपदाजनाः गुणानुरक्ताराजेंद्ररामसमभिनंदंति
भूमिपं ॥ ४० ॥ गुणाकीर्त्यमानपतेश्चराजारामेणरंजिताः एतत्श्रुत्वावचोराजाद्विजानांमंत्रिणामपि ।
॥ ४१ ॥ हर्षंतत्वेनुपागच्छन्तेषांभावानुगंश्वति । सहसंचित्यसचिवैर्यौवराज्यममंत्रयत् ॥ ४२ ॥ सर्वा
न्नगरवास्तव्यान्नृपाञ्जनपदानपि । आनाय्यरामासनदा पृथिव्याःपृथिवीपतिः ॥ ४३ ॥ ततः
प्रजाःसमागम्यब्रह्मक्षत्रसुरवान्तदा । अनुज्ञाताःप्रविविशुर्नृपतेर्भवनंमहत् ॥ ४४ ॥ आसीनंचा
पिराजानमिक्ष्वाकुराष्ट्रवर्द्धनं । प्राच्योदीच्याःप्रतीच्याश्चदक्षिणात्याश्चभूमिपाः ॥ ४५ ॥ म्लेच्छाश्चान्ये
चवदन्वेःपार्वतीयाश्चसंगताः उपासांचक्रिरेप्रीतामहेंद्रमिवदेवताः ॥ ४६ ॥ तेषांमध्येमहाराजोदे
वानामिववासवः विद्योतमानंश्रमयादृदर्शुःस्वतमात्मनः ॥ ४७ ॥ गंधर्वराजप्रतिमंलोकविश्रु
तपौरुषं । दीर्घबाहुंमहासत्त्वंमत्तमातंगदर्शनं ॥ ४८ ॥ शैलखंडापिनदंतानांछद्मीनागंविशारदा
॥ लोकेविख्यातवीर्याणांश्रेष्ठंसर्वधनुष्मतां ॥ ४९ ॥ ह्लादनेसर्वमित्राणांचान्द्रसांशोकवर्धनम् ।

राम
६

गुल्मैः प्रद्योतयन्तं तं सहस्रांशुमिवांशुभिः ॥५०॥ तद्राजवेश्म मनुजैर्यथावत्प्रतिपूजितं । ददर्श सोऽभी
मनिह्रादं वर्षघोषैरिव सागरं ॥५१॥ तं जनौघं बहुविधं राजभिः समलंकृतं । ददर्शाह्निकान्तिमान्ब्राह्मणाप्र
जापतिरिवापरः ॥५२॥ अथ राज्ञां विनीतेषु आसनेषु समं ततः राजानमेवाभिमुखा निषेदु
र्नियतात्मनः ॥५३॥ तेषां मध्ये महातेजा देवानामिव वासवः शुशुभे सर्वसिद्धार्थः सर्वानवरणाम्रु
चितः ॥५४॥ तेन तं स महात्मानं पूर्णचंद्रसमद्युतिं । अयोध्यांश्च क्षितिवीराः कुबेरमिव गुह्यकाः ॥५५॥
सभां लभमानैर्विनयात्समागतैः सुशाल्यैर्जानपदैः समागतैः सुखोपविष्टैश्च नृपैर्नृपो बभौ सह
स्रचक्षुर्भगवानिवामरैः ॥५६॥ इत्यार्षे रामायणे अयोध्याकांडे प्रकृतिसमागमो नाम द्विती
यः सर्गः ॥ ३ ॥ ततः परिषदं सर्वामामंत्र्य वसुधाधिपः हितमुद्धर्षणं चेदमुवाच प्रतिमं वचः ।
॥१ दुन्दुभिस्वरकल्पेन गंभीरेणानुनादिना । स्वनेन भगवान्राजा जीमूत इव नादयन् ॥ २ ॥ सोऽह
मिक्ष्वाकुभिः सर्वैर्नरेन्द्रैः परिपालितं । श्रेयसा योक्तुकामोऽस्मि सुखार्थमखिलं वनं ॥ ३ ॥ मयाप्या
ध्याचरितं पूर्वैः पंथानमनुगच्छतः प्रजा विनीतखेदेन यथाशक्त्याभिरक्षिताः ॥ ४ ॥ इदं शरीरं

रोऽन्तनस्य सुखस्यापि विषयो विदितं । पांडुरस्यातपत्रस्य च्छायायां धारितं मया ॥ ५ ॥ प्राप्य वर्षसहस्राणि बहून्या
युश्च पालितम् । जीर्णस्यास्य शरीरस्य विश्राममभिरोचये ॥ ६ ॥ राजपुंगवजुष्टं हि दुर्वहामजितेंद्रियैः
परिश्रांतश्च लोकेस्मिन् गुर्वी धर्मधुरं वहन् ॥ ७ ॥ सोहं विश्राममिच्छामि कृत्वा सर्वप्रजाहितं । भवद्भि
पितत्सर्वमनुवर्त्तव्यमद्य मे ॥ ८ ॥ अनुज्ञातो हि मे सर्वैर्गुणैर्ज्येष्ठो ममात्मजः पुरंदरसमो वीर्ये रामः परपु
रंजयः ॥ ९ ॥ तं चंद्रमसि पुष्येण युक्ते धर्मभृतां वरम् । यौवराज्ये नियोक्तास्मि प्रातः क्षत्रियपुंगवम् ॥ १० ॥
अनुरूपो हि राजा वै लक्ष्मीवां लक्षणान्वितः त्रैलोक्यमपि नाथेन येनास्यान्नाथवत्तरं ॥ ११ ॥ संयोज्य
रामं राज्येन श्रेयसाहं महीपतिं । संश्रुत्य रामस्य भुजौ विहतास्मि गतज्वरः ॥ १२ ॥ इति ब्रुवाणं स्थविरं
नासवैवैतं नृपं नराः दृष्टिमंतमिवांभोदं गर्जंतमिव वर्हिणः ॥ १३ ॥ तस्य तद्वचनं श्रुत्वा सर्वकल्यूस्य
धीमतः प्रियं चैवानुरूपं च वचः समुपचक्रमुः ॥ १४ ॥ दिव्यैर्गुणैर्दक्षसमो रामः शक्रसमो बले ।
२ देवाऽभ्यो हि सर्वेभ्यो व्यतिरिक्तो विशांपते ॥ १५ ॥ रामस्य पुरुषो लोके सत्यधर्मयशोगुणैः समो
न विद्यते कश्चिद्धि विशिष्टः क्षेत एव तु ॥ १६ ॥ धर्मात्मा सत्यवादी च बलवान नसूयकः दांतः सत्त्वे स्थितः

प्राज्ञः कृतज्ञो विजितेंद्रियः ॥ १७ ॥ मृदुश्च स्थिरचित्तश्च नित्यं दीनानुकंपकः । प्रियवादी जितक्रो
धो दीर्घदर्शी महामतिः ॥ १८ ॥ बहुश्रुतानां वृद्धानां ब्राह्मणानामुपासिता । तेनतस्यातुलाकी
र्तिर्यशस्तेजश्च वर्धते ॥ १९ ॥ समाप्तश्च धनुर्वेदे हयपृष्ठे गजे रथे । लब्धास्त्रः शब्दवेदी च हस्तपातिदृढ
युधः ॥ २० ॥ देवासुरमनुष्याणां संगेष्वपराजितः । दिव्यमानुषसंस्थेषु सर्वास्त्रेषु विशारदः ॥ २१ ॥
यंतो पयाति संग्रामे ग्रामांते नगरे पि वा । गत्वा सौमित्रिसहितो नाधं तं जित्वोपनिवर्तते ॥ २२ ॥ सदाऽपि
नगरे गच्छन्कुंजरेण रथेन वा । राजमार्गेण नेदृष्ट्वा कश्चालं परिपृच्छति ॥ २३ ॥ पुत्रेष्वपि सुदारेषु प्रे
ष्याशिष्यगणेषु च । निखिलेनानुपूर्वेण पिता पुत्रान्निबोधसा ॥ २४ ॥ शुश्रूषंति वचः शिष्या
न्कश्चित्कर्मसु दंसिता । इति नः पुरुषव्याघ्रः सदा रामोऽभिभाषते ॥ २५ ॥ व्यसनेषु च सर्वेषां भृशं भ
वति दुःखितः । श्रुत्वा चाभ्युदयान्किंचित्पितेव परितुष्यति ॥ २६ ॥ वत्सः श्रेयसि जातस्ते दिष्ट्यासौ
वराघव । दिष्ट्या रामो गुणैर्युक्तो मारीच इव काश्यपः ॥ २७ ॥ बलमारोग्यमायुश्च रामस्य विदि
तात्मनः । आशासते जनाः सर्वे राष्ट्रेषु नगरेषु च ॥ २८ ॥ आभ्यंतरश्च बाह्यश्च पौरजानपदा जनाः

स्त्रियोवृद्धास्तरुण्यश्चसायंप्रातःसमाहिताः ॥२९॥ सर्वान्देवान्नमस्यंतिरामस्यार्थेमहात्मनः
तेषामयाचितंदेवत्वत्प्रसादात्समृध्यतां ॥३०॥ तमिमिंदीवरश्यामंसर्वशत्रुनिवर्हणं । पश्यामयौव
राज्यस्थंरामंराजीवलोचनं ॥३१॥ तंदेवदेवोपममात्मजंतेसर्वस्यलोकस्यहितेनिविष्टं । आशी
व्रतंक्षिप्रमुदारसत्वंपरेभिषेक्तुंवरदार्हसित्वम् ॥३२॥ इत्यार्षेरामायणेअयोध्याकांडेप्रकृतिवा
क्यंनामचतुर्थःसर्गः ॥ तेषामंजलिमालास्ताःप्रतिगृह्यविशांपतिः । संप्रहृष्टोब्रवीत्पौरानास
नात्प्रियहितंवचः ॥१॥ अत्रास्मिन्परमप्रीतोलोकश्चानुत्तमोपमा । यन्मज्येष्ठंप्रियंपुत्रंयौव
राज्येयदीक्षथ ॥२॥ इतिप्रत्यर्चितान्सर्वान्ब्राह्मणानिदमब्रवीत् । वसिष्ठंवामदेवंचतेषांचैवोप
शृण्वतां ॥३॥ चैत्रःश्रीमानयंमासःपुण्यःपुष्पितकाननः । यौवराज्यायकामस्यसर्वमेवोप
कल्प्यतां ॥४॥ श्वोभूतेपुष्ययोगेनवृतवोथदिनोदये । अथाब्रुवन्नराःसर्वेपूर्वमेवनराधिपः ।
५ ॥ रामोवाभिमतोनित्यमभिषिक्तोतिनागरैः । तेषांतद्वचनंश्रुत्वापौराणांतत्रहर्षजः ।
६ ॥ संप्रवृत्तोमहानादःसाधुसाध्वितिजल्पतां ॥ शनैस्तस्मिन्प्रशांतेतुजनघोषेनराधिपः ॥७

ष्टणाम्प्रगुरुकमासीनमित्युवाचपुरोहितं ॥८॥ अभिषेकायरामस्ययत्कर्मसपरिच्छदं तदस्यभग
वन्सर्वमाज्ञापयितुमर्हसि ॥९॥ तच्छ्रुत्वाभूमिपालस्यवसिष्ठोद्विजसत्तमः आदिदेशाग्रतोरा
ज्ञांगणंद्युक्तांकृतांजलिं ॥२०॥ सुवर्णादीनिरत्नानिबलींसर्वौषधीरपि। शुक्लांश्चमाल्यलाजांश्च
पृथक्चामधुसर्पिषी ॥२१॥ अहतानिचवासांसिरथंसर्वायुधानिच। सितवर्णंचतुरंगंगजंचशु
भलक्षणं ॥२२॥ चामरव्यजनेश्वेतेध्वजंछत्रंचपांडुरं। शतंचशातकौंभानांकुंभानामग्निवर्चसां।
हिरण्यशृंगंवृषभंसमग्रंव्याघ्रचर्मच ॥२४॥ यच्चान्यत्किंचिदेष्टव्यंतत्सर्वमद्यहृद्यकं। उपस्था
पयतप्रातरग्न्यगारेमहीपते ॥२५॥ अंतःपुरस्यद्वाराणिसर्वस्यनगरस्यच। चंदनस्रग्भिरर्च्यंतां
सुमनोदामभिस्तथा ॥२६॥ सर्वंप्रशस्तंचगुणंदधिक्षीरोपसेचनं। द्विजानांशतसाहस्रंयत्प्रकामं
फलंलभेत ॥२७॥ सिद्धमन्नादिकंतावत्प्रत्युपस्थेवकल्प्यतां। स्वर्योऽभ्युदितमात्रेणभवितास्व
स्तिवाचनं ॥२८॥ ब्राह्मणाश्चनिमंत्र्यंतांकल्प्यंतमासनानिच। आबध्यंतांपताकाश्चराजमार्गश्च
सिच्यतां ॥२९॥ सर्वेचनागराश्चैवगणिकाश्चस्वलंकृताः कक्ष्यांद्वितीयामासाद्यतिष्ठंतुनृपवेश्मनि

देवाद्यागनन चैन्येषु सात्त्रेमत्स्याः प्रदक्षिणाः । अयस्थापयितव्याश्च माला योग्याः पृथक्पृथक् ॥ २१ ॥ दीर्घा
सि बद्धयोधाश्च सर्वे शोभृष्टवाससः । महाराजस्य भवनं प्रविशेन्तु महोदयं ॥ २२ ॥ एवमाज्ञाप्य तत्सर्वं ह्यत
मित्यभिवेदयन् । सुप्रीतमनसं राजा वसिष्ठं ' र्दयत्पुनः ॥ २३ ॥ ततः सुमंत्रं द्युतिमान्राजा वचनमब्रवी
त् । रामः कृतात्मा भवता शिघ्रमानीयतामिति ॥ २४ ॥ सम्मानयेद्धर्मज्ञं सुमंत्रं प्रियदर्शनम् ।
रामं भम मनोदावड्मने प्रेक्ष्यतः सुतं ॥ २५ ॥ स तथेति प्रतिज्ञाय सुमंत्रो राजशासनात् । रामं त
त्रानयामास रथेनरथिनांवरं ॥ २६ ॥ आसीनं चैवराजानमिक्ष्वाकुं राष्ट्रवर्धनं । प्राच्योदीच्याः प्रती
च्याश्च दक्षिणात्याश्च भूमिपाः ॥ २७ ॥ आर्याम्लेच्छाश्च साध्याश्च पार्वतीयाश्च सर्वशः । उपासांचक्रिरे
वीरा कुवीरमिव नैर्ऋताः ॥ २८ ॥ तथा मध्ये महाराजदेवानामिव वासवः प्रासादस्थो रथस्थं तं
ददर्शायांतमात्मजं ॥ २९ ॥ विद्योतमानं प्रभयाददर्शासु महाद्युतिः गंधर्वराजप्रतिमं लोकविश्रु
त पौरुषं ॥ ३० ॥ दीर्घबाहुं महासत्त्वं मत्तमातंगगामिनं । शैलकुञ्जरदंतांतोग्रहीतारं विषाणिनं
॥ ३१ ॥ एकोविख्यातवीर्याणां मर्त्यां सर्वधनुष्मतां । सुवर्षैर्णैवपर्जन्यंह्लादयंतमिव प्रजाः ॥ ३२

गुणैर्विद्योतमानं च सहस्रांशुमिवांशुभिः। चंद्रकांताननं राममतीवप्रियदर्शनं ॥३३॥ रूपौदार्यगु
णैः पुंसां दृष्टिचित्तापहारिणं। हरिंस्तीक्ष्णादंष्ट्राग्रं हंतारं हस्तिनामिव ॥३४॥ दंष्ट्रिणामिव सर्वेषां
श्रेष्ठानं युद्धकांक्षिणं। न ततर्प्प समायांतं पश्यमानो महीपतिः ॥३५॥ ददर्शोद्धांतिमात्रं राजाप्र
जापतिरिवापरः राजा बभूव संहृष्टो दृष्ट्वायांतं तमात्मजं ३६ अवतार्य सुमंत्रस्तु राघवं स्यंदनो
त्तमात्। पितुः सकाशं गच्छंतं प्रांजलिः पृष्ठतोन्वगात् ३७ ततः कैलाससदृशं प्रासादं तमरि
न्दम। आरुरोह समासाद्य सह सूतेन राघवः ॥३८॥ स प्रांजलिरभिक्रम्य किंचिन्नम्राङ्गः समाहितः
नाम संकीर्तयन् रामो ववंदे चरणौ पितुः ॥३९॥ तं पुत्रमिक्ष्वाकुवंशस्तु नीतं जयवर्धनं। स दृष्ट्वा प्रण
तं प्रांशुं कृतांजलिपुटं नृपः ॥४०॥ गृहीत्वांजलौ समाकृष्य सस्वजे प्रियमात्मजं। प्रत्यनंदत्स धर्मा
त्मा स्वं पुत्रं पर्यदाहृतः ॥४१॥ तस्मै मेतु रूपं कचिरं कांचनं रत्नभूषितं। राघवायासनं राजा प्रादिदे
शमहात्मने ॥४२॥ तदासनवरं प्राप्य दीपयामास राघवः स्वयैव प्रभया मेरुमुदये विमलो रविः
४३

तेनविभ्राजमानेनससभाभिव्यराजत । विमलग्रहनक्षत्राशारदीद्यौरिवेन्दुना ॥ ४४ ॥ प्रासादवर्योश्रु
शुभेनशोभानुमतायथा । तमवेक्षन्नसंहर्षादिक्ष्वाकुः प्रियमात्मजं ॥ ४५ ॥ आत्मानमिवचादर्शो
वुक्तरूपमिवाश्रया । राजलक्षणसंपन्नंव्यूढोरस्कंमहाभुजं ॥ ४६ ॥ राजपुत्रमुवाचेदंमहेन्द्रमिवका
श्यपः । व्यादिष्टोऽसिमेज्येष्ठः प्रसूतः सदृशः सुतः ॥ ४७ ॥ ज्येष्ठायामपिमेपत्न्यांसदृश्यांसदृशः
सुतः । तन्मतस्त्वंगुणज्येष्ठोनामनामात्मजः प्रियः ॥ ४८ ॥ त्वयातातप्रजाश्चेमाः स्वगुणैरनुरंजिताः
तस्मात्त्वंपुष्ययोगेनयौवराज्यमवाप्स्यसि ॥ ४९ ॥ जितेंद्रियः प्रकृत्यासिभूयस्तानिवशीकुरु । का
मक्रोधसमुत्थानित्यजेथाव्यसनंत्वया ॥ ५० ॥ परोक्षयावर्तमानोवृत्त्याप्रत्यक्षयातथा । अमात्य
प्रमुखाः सर्वाः प्रकृतीरनुरंजय ॥ ५१ ॥ कोशागारायुधागारैः कृत्वासन्निचयाधिकान् । तुष्टपुष्टजनः
प्रेष्यापृथिवीमनुपालय ॥ ५२ ॥ नवमित्राणिनंदंतुलब्ध्वामृतमिवामराः । इतिराज्ञोवचः श्रुत्वा
नराः प्रियनिवेदिनः ॥ ५३ ॥ त्वरयाशीघ्रमभ्येतिकौसल्यायैन्यवेदयन् । साहिरण्यंचगाश्चैव
रत्नानिविविधानिच ॥ ५४ ॥ आदिदेशप्रियाख्यायिः कौसल्याप्रमदोत्तमा । रामोऽपितद्वचः श्रुत्वा

राज्ञोह्यमिततेजसः ॥ २५ ॥ श्रुत्वैवं वदनो ब्रूत्वा तथेत्याह नराधिपं । राजापि गुरुणाज्ञप्तः सोनुज्ञा
य विसर्ज्यतं ॥ २६ ॥ राममुद्दिश्य राज्ञा वै राज्यं तामित्यबोदयत् । अनुज्ञातेन तु पित्रा वै रामनाथोपचक्र
मे ॥ २७ ॥ अथाभिवाद्य राजानं रथमारुह्य राघवः । ययौ स्वं क्रांतिमद्वेश्म जनैर्वाद्यै रथसंस्थितः ॥
॥ २८ ॥ ते चाप्युसर्वे सभवाप्यकामं नरा नरेंद्रं गतप्रहर्षाः । नरेंद्रमामंत्र्य गृहाणि सत्वराः प्रपेदि
रे राघवराज्यहर्षिताः ॥ २९ ॥ इत्यार्षे रामायणे योध्याकांडे दशरथानुचारो राम पंचमः सर्गः
॥ ५ ॥ गतेष्वथ नृपो भूयः पौरेषु सह मंत्रिभिः । मंत्रयित्वा ततश्चक्रे निश्चयज्ञः स निश्चयं ॥ १ ॥
श्व एव पुष्यो भविता श्वोभिषेच्यः सुतो मया । रामो राजीवताम्राक्षो यौवराज्य इति श्रुतिः ॥ २ ॥
रामेति निवेदितं सर्वं पुण्याद्धर्षितेन वा । अथांतर्गृहमासाद्य राजा दशरथस्तदा ॥ ३ ॥ सूतमा
ज्ञापयामास रामस्यानयनं पुनः । प्रतिगृह्य तु तद्वाक्यं सूतः पुनरुपाययौ ॥ ४ ॥ रामस्य तद्भव
नं शीघ्रं तमेवानयितुं पुनः । द्वास्थैरावेदितं तत्र राघवाय महात्मने ॥ ५ ॥ प्रेषयामास तत्तदा
वचनं चेदमब्रवीत् । किमागमनकृत्यं ते तद्भवान्वक्तुमर्हति ॥ ६ ॥ तमुवाच ततः सूतो महाज्ञा

त्वां द्रष्टुमिच्छति। सूतस्यैव वचनं श्रुत्वा रामोपि त्वरयान्वितः॥७॥ प्रययौ राजभवनं पुनर्द्रष्टुं नरेश्वरं।
श्रुत्वा तु समनुप्राप्तं रामं दशरथो नृपः॥८॥ ऊर्जं प्रवेशयामास विवक्षोक्तमयोहितं। प्रविशन्ने
व च श्रीमान्राघवो रघुनंदनः॥९॥ सतत्र पितरं दृष्ट्वा बद्ध्वा व्यवस्थितो ञ्जलिः। ततः प्रणामं कुर्वाणं संपरि
ष्वज्य भूमिपः॥१०॥ आदिदेशासनं तस्मै वाक्यं चेदमुवाच ह। तात वृद्धोस्मि दीर्घायुर्भुक्तानि चरिता
नि मे॥११॥ क्रतुसहस्रैर्यष्टा चेष्टं क्रतुभिश्चाप्तदक्षिणैः। जातमिष्टमपत्यं च पालितं तदनंतरं॥१२॥ अ
नृणोस्मि पितृणां च देवतानां च राघव। न किंचिदत्र मेस्ति तवान्यत्राभिषेचना॥१३॥ अतो यथा
हं ते ब्रूयां तथा त्वं कर्त्तुमर्हसि। उपस्थितं च मे राम नक्षत्रं पीडितं ग्रहैः॥१४॥ आवेदयंति दैवज्ञा
जन्मस्थो मे दारुणैश्च ग्रहैः आभिचाप्य मिघ्रे तान्स्व सूर्याङ्गारकराहुभिः॥१५॥ सनिर्घातामहोल्का
श्च पतंति स्वनिस्वना। उपविष्टो विशाखासु रोहिणी ग्रस्तते ग्रहः॥१६॥ प्रवाति वाताः सुरुक्षाः
सशैला भूश्च कंपते। प्रायेण हि निमित्तानामीदृशानां समुद्भवे॥१७॥ राज्याद्वा भ्रश्यते राजा मृत्यु
वाप्यधिगच्छति। यावदेव मम धर्मज्ञ चेतो न परिमुह्यते॥१८॥ तावदेवाभिगच्छस्व चला च प्राणि

श्रीराम
का
२२

राम
२२

नां स्थितिः ॥ अथ चंद्रोभ्युपगतः स्वातिनाप्यक्रमुत्तरं ॥१९॥ तं दिवक्ष्यंति विप्रेंद्रा दिव संमुख्यसं
म्मितं । तवचैवाभिषेकाय मनस्त्वरयतीव मां २० अत एव त्वाभिषेक्ष्यामि वीरं मांत्रिपुरोहितैः ३
यं च नियतेनाद्य त्वया व्रतवदा निशा ॥२१ वध्वा सहोपवस्तव्या स्वपतापरणं संस्तरे । सुहृदश्च
प्रमत्तश्चरन्त्वद्य समंततः २२ जानामि बहुविघ्नानि कार्याण्येवं विधानि हि । विप्रोषित
श्च भरतो यावदेव पुरान्मम २३ कामं खलु सतां मार्गे भ्राता ते भरतं स्थितः ज्येष्ठानुवर्ती धर्म
ज्ञः सानुक्रोशो जितेंद्रियः २४ किंतु चित्तं मनुष्याणां जानामि चलनात्मकं । सतां च धर्मका
र्याणि कृतावोभानिमावत २५ इत्युक्तः स्वभ्यनुज्ञातः श्वोभिषिचोभवानिति । व्रजेति राज्ञा काकु
त्स्थो जगाम स्वं निवेशनं २६ प्रविश्य ते स्म वाम स्तु राज्ञा मिष्टाभिषेचनः तस्मिन्क्षणे विनि
र्गम्य मात्रसंतःपुरं ययौ ॥२७ तां तामार्थव्रतोपेतामदृतं क्षौमवाससं । ददर्श मातरं रामो देवह्र
जनतत्परां ॥२८॥ प्रागेव तत्र आयातः सुमित्रा लक्ष्मणस्तथा । सीता चानियता श्रुत्वा प्रियं राम
मातृषेचनं ॥२९॥ तस्मिन्काले तु कौसल्या गतस्यावामीलितेक्षणा । सुमित्रयासेव्यमाना सीतया

लक्ष्मणेन च। श्रुत्वा पुष्येण पुत्रस्य यौवराज्येभिषेचनं । प्राणायामेन पुरुषं ध्यायमाना जनार्दनं
३१ तथा सनियमामेव सोभिगम्याभिवाद्य च । उवाच मातरं रामो हर्षयन्निदं वचः ॥ ३२
अम्ब पित्रा नियुक्तोस्मि प्रजापालनकर्मणि । भविता श्वोभिषेको मे यथा मे शासनं पितुः ॥ ३३
सीतयाप्युपवस्तव्या रजनीयं मया सह । एवमुक्तमुपाध्यायैः स हि मामुक्तवान्नृपः ॥ ३४ यानि
यान्यत्र योग्यानि श्वोभाविन्यभिषेचनं । तानि मे मंगलान्यत्र वैदेह्याश्चैव कारय ॥ ३५ एतच्छ्रुत्वा
तु कौसल्या चिरकालाभिकांक्षितं । हर्षबाष्पकलं वाक्यमिदं राममभाषत ॥ ३६ वत्स राम
चिरंजीव हतास्ते परिपन्थिनः ज्ञातीन्मे त्वं श्रिया युक्तः सुमित्रायाश्च नंदय ॥ ३७ कल्याणे बत
नक्षत्रे मयि जातोसि पुत्रक । येन दशरथो राजा गुणैराराधितः पिता ॥ ३८ अमोघं मे तपः पु
त्र दुष्करं पुष्करेक्षणः यदक्ष्येत्वाकुराजश्री स्त्वां श्रमादागमिष्यति ॥ ३९ इत्येवमुक्तो मात्रेद
रामो भ्रातरमब्रवीत् । प्राञ्जलिं प्रह्वमासीनमभिवीक्ष्य स्मयन्निव ॥ ४० लक्ष्मणेमां मया
सार्धं प्रशाधि त्वं वसुंधरां । द्वितीयं मेंतरात्मानं त्वामियं श्रीरुपस्थिता ॥ ४१ सौमित्रे भुंक्ष्व भोगांस्त्व

इष्टान्राजफलानिव । जीवितं वैदिनाङ्गं पचन्ददृष्टंमभिकांक्षये । इत्युक्त्वा लक्ष्मणं रामो मातरं चाभि
वाद्य च । अनुज्ञातो जगामाशु स्वं च गृहं सह सीतया ॥ ४३ ॥ इत्यार्षे रामायणेयोध्याकांडे ॥ अप
वक्तोनामसर्गः सष्टः ॥ ६ ॥ सन्दिश्य रामं नृपतिः श्वोभाविन्यभिषेचने । पुरोहितं समभ्याय
इदं वचनमब्रवीत् ॥ १ ॥ गच्छोपवासं काकुत्स्थं कारयाद्य तपोधनं । श्रीयशोराज्यलाभाय वध्वा सह
यतव्रत ॥ २ ॥ तथेति च स राजानमुक्त्वा वेदविदां वरः । स्वयं वसिष्ठो भगवान्प्रस्थमास्थाय सत्वरः
३ ॥ स रामभवनं प्राप्य पांडुराभ्रचयोपमं । त्रिः कक्ष्या रथेनैव प्रविश्य मुनिसत्तमः राघवोपि
ऋषिं ज्ञात्वा त्वरन्निव ससंभ्रमः मानयिष्यन्माननार्हं निश्चक्राम निवेशनात् ॥ ५ ॥ तं रथादवरो
हन्तं विद्वान् न्यासतं गुरुं । आलोकयन्वारयामास सर्वतुङ्गकक्ष्य राघवः ॥ ६ ॥ अभ्येत्य त्वरमाणश्च
रथाभ्यासं मनीषिणः । ततोवतारयामास परिष्वज्य रथात्स्वयं ॥ ७ ॥ श्रद्धो वचनमाकांक्षन्नसौ
रामः कृतांजलिः । कामादभिमुखस्य तं सम्राज्यातिप्रशास्य च ॥ ८ ॥ ततः प्रविश्य भवनं रामस्य तु
निसत्तमः । यथार्हं प्रीणयन्राममित्युवाच पुरोहितः ॥ ९ ॥ प्रसन्नस्ते पिता राम यौवराज्यमवा
प्स्यसि । उपवासं भवानद्य करोतु सह सीतया ॥ १० ॥ प्रातस्त्वामभिषेक्ता हि यौवराज्येन नरा

धिप ॥ २२ पिता दशरथः प्रीत्या ययातिं नहुषो यथा । इत्युक्त्वा स तदा राममुपवास्य यतव्रतं मंत्रव
त्कारयामास वैदेह्या सहितं मुनिः स्वस्ति पुण्याहघोषेषु देवतावसथेषु च ॥ २३ प्रसादे राघवो रा
ज्ञः शिरसा प्रतिहृष्टात्मा स्पर्शयामास गुरवे सहस्राणि गवां दश ॥ २४ यथावज्ञाजसुत्रेणापुरोधः
पुनरर्चितः अभ्यनुज्ञाप्य काकुत्स्थं ययौ राजनिवेशनं ॥ २५ सुहृद्भिः सत्तु रामोपि सुखासीनः प्रि
यंवदः वंदहन्द्वैरयोध्यायां राजमार्गः समंततः ॥ २६ सम्माकीर्णो जनौघेन द्रष्टुकामस्तदद्भुतं । ज
नष्टेंदौघसंहर्षाद्वर्षस्वरसमीरितः ॥ २७ तथा हि भिद्यमानस्य हर्षाद्भूतोर्मिभिर्जनैः बभूव राजमार्ग
स्य सागरस्येव निस्वनः ॥ २८ सिक्तसंमृष्टरथ्या हि स्तदासीत्सुधमालिनी । अयोध्या नगरी रम्या
समुच्छ्रितमहाध्वजा ॥ २९ तस्यां पुण्यनिवासी च सस्त्रीबालयुवा जनः । तस्य चक्षापनदारात्रौ प्रहृष्टोत्सु
कमानसः ॥ ३० रामाभिषेकमाकांक्षन्नागतास्मुदयं रवेः प्रजालंकारभूतं तं जनस्यानंदवर्धनं
॥ ३१ सोत्सुको भूज्जनो द्रष्टुं तमयोध्यामहोत्सवं । एवं तं जनसंबाधं राजमार्गं पुरोहितः ॥ ३२ व्यू
ढनिवज्जनौघं तं सस्पृहत्वाछनैर्ययौ । सिताभ्रशिखरप्रख्यं प्रासादमधिरुह्य सः ॥ ३३ समियाय

नरेंद्रेणशक्रेणैववृहस्पतिः । तमागतमभिप्रेक्ष्यहित्वाराजासनंनृपः ॥ २४ ॥ अपृच्छत्सचतस्मै
तत्कृतमित्यभ्यवेदयत् अनुज्ञातस्तस्यगुरुणावसिष्ठेन महात्मना ॥ २५ ॥ विवेशांतःपुरंराजासिं
होगिरिगुहामिव ॥ २६ ॥ तदाग्रसुदर्शप्रमदाजनाकुलंसभाविमानावनतंसुदीप्तिमत् विदीप
यंश्चाकृविवेशपार्थिवः शशीवतारागणमंडितंनभः ॥ २७ ॥ इत्यार्षेरामायणेअयोध्याकांडे
...सेवोनामपंचमः सर्गः ॥ गतेपुरोहितेरामः स्नातोनियतमानसः सहपत्न्याविशा
लाक्ष्यानारायणमुपागमत् ॥ १ ॥ प्रगृह्यशिरसापात्रंहविषोविधिवत्ततः महतेदैवतायाज्यं
जुहावज्वलितेनले ॥ २ ॥ शेषंचहविषस्तस्यप्राश्यतत्रात्मनःप्रियं । ध्यायन्नारायणंदेवंस्वा
स्तीर्णेकुशसंस्तरे ॥ ३ ॥ वाग्यतःसहवैदेह्याभूत्वानियतमानसः श्रीमत्यायतनेविष्णोःशिश्ये
नरवरात्मजः ॥ ४ ॥ ततोपवरत्रेरामंतुवैदेह्यासहितंतदा । सद्गमायांक्षितोस्तुष्टंश्रुश्राववविधिव
ज्जनः ॥ ५ ॥ ततःपौरजनाःसर्वेश्रुत्वारामाभिषेचनं । यःप्रभातेतुभवितातांपुरीमभ्यशोभय
न् ॥ ६ ॥ सिताभ्रशिखराभेषुदेवतायतनेषुच । पांडुराभ्रप्रकाशेषुसुकपाटांगृहेषुच ॥ ७ ॥

श्रीः

स्वस्तिपुण्याहघोषेषुब्राह्मणावसथेषुच। राजमार्गगतानांचपौरोलंकारकारिणां ॥ ८ आपणेषुप्र
सादेषुवणिजामालयेषुच। अट्टविनांसम्हृष्टानांश्रीमत्सुभवनेषुच ॥ ९ ॥ गृहेषुदुर्गतानांचसान्तरथ्ये
षुसर्वशः। सभास्तुचसुरम्यास्तुसभ्यानामालयेषुच। १० चतुष्पथेषुचैत्येषुचत्वरेषुचसर्वशः। ध्व
जाःसमुच्छ्रिताश्चित्रापताकाभिरलंकृताः ११ बभूवुःकान्यिशादूरंभेदोधिवशानकदा। न
टनर्तकनिर्घोषाःशंखदुन्दुभिनिःस्वनाः १२ गीतध्वनिःसमधुरस्तथैवाध्ययनध्वनिः म
नःकर्णसुखावाचःशुश्रुवुश्चसमंततः १३ क्वचित्समाजाःप्रबभुःक्वचिद्वृत्ताःक्वचि
त्कथाःक्वचिन्मंगलसंयुक्ताःस्नदसामाभिसेचने १४ क्रीडंतिबालाश्चावेषुधात्रीभिःपरिपालिताः
कलहल्लाश्चनिर्युक्तानाद्वादेशान्तथांगनाः १५ कृतपुष्पोपहाराश्चधूपाश्चैवावतारिताः च

श्रीनाग्र चाताकारागोगंधानृणांघ्राणमनोहराः। १६ तेनपुष्पोपहारेणयुक्तेनबहुनातदा। राजमा पाम
का· र्गोविकिरचेषुघ्रष्टेवजाह्नवी। १७। निरिगसंजंरणार्थंवैनिर्गमनकांक्षिणां। दीप २८
२४ वृक्षानथोचकुम्भन्तुरथ्यास्तुसर्वशः। १८ अलंकारंपुरस्यैवकृत्वातत्पुरवासिनः। आकांक्षमा

एतद्रामस्ययौवराज्याभिषेचनं । समेत्यसंकथाश्चैवचत्वरेषुसभासुच । हृष्टाःस्वस्थास्तथासीनाः
श्रद्धांशंसुर्नराधिपम् ॥ २० ॥ महात्माखलुराजायमिक्ष्वाकुकुलनंदनः मन्वाटोवृद्धमात्मानंयो
मेराज्येभिषिंचति ॥ २१ ॥ सर्वेह्यनुगृहीताःस्मयन्नोरामोविशांपतिः चिरायभविताराजासर्वेषांप
रमागतिः ॥ २३ ॥ त्यक्तानृतकथोवीरःसततंभ्रातृवत्सलः यथाचभ्रातृषुस्निग्धस्तथास्मास्वपि
राघवः ॥ २४ ॥ चिरंजीवतुधर्मात्माराजादशरथोनघः यस्यप्रसादाद्द्रक्ष्यामोराममभ्युदयमनंतरं ।
॥ २५ ॥ एवंकथयतांतेषामयोध्यापुरवासिनां । दिग्भ्यःसंश्रुत्यवृत्तांतः प्राप्तजानपदोजनाः ॥ २६ ॥
सर्वादिग्भ्यःपुरंप्राप्तोद्रष्टुकामोभिषेचनं । रामस्यपूरयामासपुरंजानपदोजनः ॥ २७ ॥ जनौघैः
परिसर्पद्भिःशुश्रुवेतुमुलंमहत् । सर्वस्यदीर्घवेगस्यनगरस्येवतिःस्वनः ॥ २८ ॥ ततोमहे
न्द्रक्षयसंनिभंक्षयंसमागतैरामहितार्थसिद्धये । दिदृक्षुभिस्तत्पुरमाकुलंबभौसमुद्रया
दोभिरिवाकुलंपयः ॥ इत्यार्षेरामायणेऽयोध्याकांडेपुरसंचारिकोनामाष्टमः ॥ ॥ ज्ञातिदासी
तुकैकेय्याहृदज्ञातासहोषिता । प्रासादाग्रमथारूढावानस्मिन्कालेयदृच्छया ॥ सितचामरप

थां दिव्यांप्रकीर्णकमलोत्पलां । अयोध्यां मंथरा तस्मात्प्रासादादन्ववैक्षत ॥ २ उच्छ्रिताभिः
पताकाभिर्ध्वजैश्च समलंकृतां । नृहृष्टपुष्टशताढ्यन्नैः शिरःस्नातसमावृतां ॥ ३ ॥ माल्यमोदकहस्तै
श्च द्विजेंद्रैश्चोपशोभितां । प्रहृष्टकुंजरहयां प्रसन्नार्चितगोवृषां ॥ ४ ॥ मुक्तदेवगृहद्वारां गंधतैलस
मुक्षितां । अयोध्यांतांतथाहृष्टांपताकाध्वजमालिनीं ॥ ५ ॥ अविदूरेस्थितांगत्वाधात्रीपप्र
च्छ संस्थिता । अतिमात्रं प्रहर्षोयं किंजनस्यास्यशंसमे ॥ ६ ॥ कारयिष्यति किंकोपिसंप्रहृष्टो
महीपतिः उत्तमेनाभिसंयुक्ता हर्षेणार्थपरासती ॥ ७ ॥ राममाता धनं कस्माद्ब्राह्मणेभ्यः प्रय
च्छति । विदार्यमाणा हर्षेण धात्री परमया मुदा ॥ ८ ॥ अथाचचक्षे कुब्जायै भूयसीं राघवश्रियं ।
श्वः पुष्येण जितक्रोधो यौवराज्येन राघवं ॥ ९ ॥ राजा दशरथो राममभिषेचयितानघं । धा
त्र्यास्तद्वचनं श्रुत्वा कुब्जा परमदुःखिता ॥ १० ॥ प्रासादात्त्वरयायुक्ता तस्मादवततारह । अवनी
र्यस्तुसंरब्धा क्रोधसंरक्तलोचना ॥ ११ ॥ राघवेनाहिना पापाः स्मरंती पूर्वकिल्बिषं । कस्मिंश्चि
दपराधे हि क्षिप्ता रामेण सा कुब्जा ॥ १२ ॥ कैकेयीं प्राप्य सा पापा इदं वचनमब्रवीत् । उत्तिष्ठ मूढे किं

शिष्योसौ भाग्यबलगर्विते। आपन्नं न यदेतेन नात्मानमवबुध्यसे। अनिष्टे सुभगाकारे सौ
भाग्येन विकत्थसे॥२४॥ चलं हि तव सौभाग्यं नद्याः स्रोत इवोष्णगे। एतच्छ्रुत्वा तु कैकेयी सा रुषं तं
यक्षं वचः॥२५॥ कुब्जायाः पापदर्शिन्याः प्रहृष्टसमुपक्रमे। अब्रवीद्दयिता कुब्जां वाक्यं दोषसंस
न्यथे॥२६॥ विषण्णवदने हि त्वां लक्षये दृशदुःखिता। मन्थरा तु वचः श्रुत्वा कैकेयीं मधुराक्षरं
॥२७॥ उवाच क्रोधसंयुक्ता वाक्यं वाक्यविशारदा। अक्षयं सुमहद्देवि प्रवृत्तं त्वद्विनाशनं। रामं द
शरथो राजा यौवराज्येभिषिंचति॥२९॥ सास्म्यगाधे भये मग्ना दुःखशोकपरिप्लुता। दह्यमाना
नलेनेव त्वद्धितार्थमुपागता॥३०॥ तव दुःखेन कैकेयि मम दुःखं महद्भवेत्। त्वद्वृद्ध्या मम वृद्धि
श्च भवेदिति न संशयः॥३१॥ महीपतिः कुले जाता महिषी पृथिवीपतेः। उग्रत्वं राजधर्माणां कथं दे
वि न बुध्यसे॥३२॥ धर्मवादी शठो भर्ता श्लक्ष्णवक्ता च दारुणः। शुद्धभावेन जानीषे तेनैवमभिसंहिता
॥३३॥ उपस्थितं प्रयुञ्जानस्त्वयि सान्त्वमनर्थकं। अर्थेनेवाद्य ते भर्ता कौसल्यां योजयिष्यति॥३४॥
अपवाह्य स दुष्टात्मा भरतं तव बन्धुषु। काल्ये स्थापयिता रामं राज्ये निहतकण्टके॥३५॥ शत्रुः प

नि प्रवादेन मात्रेव हितकाम्यया । आसीविषमिवांकेन मर्त्तोद्यच वितस्त्वया ॥२६॥ यथा हि कुर्यात्सर्पो वा
शत्रुर्वा प्यनवेक्षितः राज्ञा दशरथेनाद्य तथा ते सद्रसाद्यत्तं ॥२७॥ पापेनाहृतसत्त्वेन बालराज्यप्रसुखे
स्थिता । रामं स्थापयिता राज्ये सानुबंधा हतासि ॥२८॥ संप्राप्तकालं कैकेयि क्षिप्रं कुरु हितं हितं
त्रातरश्च हितमात्मानं मां चैवा मित्रकर्शनि । ॥२९॥ मंथराया वचः श्रुत्वा कैकेयी परया मुदा । एकमाभरणं
तस्याः कुब्जाया प्रददौ शुभं ॥३०॥ यदिदं मंथरे मह्यं माख्यातमतिप्रियं हितं । एतन्मे प्रियमाख्यातं किं
वा भूयः करोमि ते ॥३१॥ दत्त्वा चाभरणं तस्यास्तापनीयमनुत्तमं । कैकेयी मंथरां दृष्ट्वा पुनरेवाब्रवीदिदं:
रामे वा भरते वाहं विशेषं नोपलक्षये । तस्मात्तुष्टास्मि यद्राजा रामं राज्येऽभिषेक्ष्यति
ति ॥३३॥ नमे प्रियं किंचिदतः परं मेवेद्यद्यराजा सुतमिष्टमात्मवान् । शुगोकवन्नाम सुदारविक्र

श्रीरा मं स यौवराज्ये प्रतिपादयिष्यति ॥३४॥ इत्यार्षे रामायणे अयोध्याकांडे यौवराज्याभिख्याने राम

अयो नवमः सर्गः ॥ मंथरा त्वभ्यसूयैनामुत्सृज्याभरणं च तत् । उवाचेदं वचो देवी कोपदुःखसम २६

२६ न्विता ॥१॥ हर्षं किमिदमस्थाने कृतवत्यसि बालिशे । शोकसागरमध्यस्थं नात्मानमवबुध्यसे २

मनसा प्रहसाम्येतद्दैविदुःखान्विता सती। यच्छोचितव्ये हृष्टासि प्राप्यैतद्व्यसनं महत्॥ २॥ प्रहृष्टा
बालशुद्धित्वाद्दुःखेत्का प्रज्ञयान्विता। श्रुत्वा सपत्निपुत्रस्य वृद्धिं मृत्योरिवागमः॥ ३॥ भरतादेव
रामस्य राज्यं साधारणं भयं। तद्धि चिंत्य विषण्णास्मि भयभीता विजानती॥ ४॥ लक्ष्मणोपि महेष्वा
सो रामं सर्वात्मना गतः। शत्रुघ्नश्चापि भरतं काकुत्स्थमिव लक्ष्मणः॥ ५॥ अभ्यागतेन क्रमेणापि भर
तस्यापि भामिनि। न राज्यमनुपश्यामि व्रामाद्य वीयसः॥ ६॥ विदुषः क्षेत्रचारित्रे प्राज्ञस्य प्राप्त
कारिणः। सुभगा खलु कौसल्या यस्याः पुत्रोभिषिच्यते॥ ७॥ कृतो हि न वसौभाग्यं यस्याः पुत्रो
नराज्यनाथः। यौवराज्येन महता श्वः पुष्येण द्विजोत्तमैः॥ ८॥ प्राप्तां सुमहतीं कीर्तिं प्रतीतां तां हतद्वि
षं। उपस्थास्यसि कौसल्यां दासीवत्त्वं कृताञ्जलिः॥ ९॥ हृष्टाः खलु भविष्यंति रामस्यांतः
पुरस्त्रियः। अप्रहृष्टाश्च भविष्यंति स्नुषास्ते वा कृणोत्तये॥ १०॥ तां तथा परमक्रुद्धां ब्रुवंतीं मंथरां ततः।
दृष्ट्वापि देवी कैकेयी। मसेवराद्वांसह॥ ११॥ धर्मज्ञो गुणवान्दांतः कृतज्ञः सत्यवाक्छुचिः। रामो
राजसुतो ज्येष्ठो यौवराज्यमतोर्हति॥ १२॥ भ्रातॄन्भृत्यांश्च दीर्घायुः पुत्रवत्पालयिष्यति। संतापं मा

संतापंमाकृथाःकथंश्रुत्वारामाभिषेचनं ॥ २२ ॥ अनन्तरश्चापितामस्यध्रुवंवर्षशतात्परं । पितृपैता
महंराज्यमवाप्स्यतिपुत्रकैर्दिने ॥ २३ ॥ सत्वमभ्युदयेप्राप्तेवर्तमानेचमंथरे । भविष्यतिचकल्याणे
कथंसंतुप्यतिप्यसे ॥ २४ ॥ मंथरातुवचःश्रुत्वाकैकेय्याःक्रोधमूर्छिता । दीर्घमुष्णंविनिश्वस्यकैके
यीमिदमब्रवीत् ॥ २५ ॥ अनर्थादर्शनेमूढेह्यात्मानमवबुध्यसे । शोकव्यसनविस्तीर्णेमज्जंतीदुः
खसागरे ॥ २६ ॥ भवितावाघवोराजाराघवस्यापियस्तुतः । राजवंशात्तुकैकेयिभरतात्परिहास्यसि
॥ २७ ॥ नहिराज्ञःसुताःसर्वेराज्येतिष्ठंतिभामिनि । स्थाप्यमानेषुसर्वेषुसुमहाननयोभवेत् ॥ २८ ॥
तस्माज्ज्येष्ठेषुपुत्रेषुराज्यतंत्राणिपार्थिवः । आसज्जंत्यनवद्यांगिगुणवत्स्वितरेषुच ॥ २९ ॥ नसुज्येष्ठे
षुपुत्रेषुज्येष्ठेष्वेवनसंशयः । आसज्जात्परिवर्ज्यराज्यंनभ्रातृषुकथंचन ॥ ३० ॥ स्वयमेकांतनिर्वृतः
स्तवपुत्रोभविष्यति । अनाथवत्सुखेभ्यश्चराजवंशाच्चवत्सले ॥ ३१ ॥ देवासुरविमर्दाश्चश्रुता
बहुविधास्त्वया । स्वार्थेस्वार्थंसमुद्दिश्यसोभ्रात्रंनैर्बहिष्कृतं ॥ ३२ ॥ आह्वरणामेवजातानांमक
ह्याभिलाषिता । निग्रीहणांनयष्यामिसौभ्रात्रंकाचिदप्यहं ॥ ३३ ॥ साहंत्वदर्थमह्याताम्वंतुमां

श्रीरा॰ रा॰ २७

राम २७

नावबुध्यसे । सपत्निवृद्धौयामेत्वंप्रदेयंदातुमर्हसि ॥ ध्रुवंतु भरतं रामः प्राप्यराज्यमकारकं
देशांतरंवासयितावानर्थमथवापुनः ॥२५॥ अद्यमासान्कतिपयाभरतेनागतेत्वयि । अप
श्यमानस्तच्चापिराज्ञामध्यस्थितगात ॥२६॥ अभीक्ष्णदर्शनाद्धास्यरामंस्नेहोप्यवर्धत । सन्नि
कर्षाद्धिसौम्यावमशक्तोऽप्यपिजायते ॥२७॥ भरतंचाप्यनुवशः शत्रुघ्नोपिसमंगतः यथैवलक्ष्म
णोरामंतथासौभरतंश्रिताः ॥२८॥ श्रूयतेह्निन्नमः कश्चिच्छेत्तव्योऽद्गुमजीविभिः संनिकर्षादि
षीकानिर्मोक्षितः परमाद्भयात् ॥२९॥ मतोभिरामः सौमित्रिंलक्ष्मणंश्चापिराघवं । अश्विनाविव
रूपेणतयोर्लोकेषुविश्रुतिः ॥३०॥ तस्मान्नैलक्ष्मणेरामः किंचित्पापंकरिष्यति । रामस्तुभरते
पापंकुर्यादितिनसंशयः ॥३१॥ तस्मादुराजगृहादेवंवनंगच्छतुतेसुतः एतद्धिरोचतेमह्यंभृशंचापि
हितंतव ॥३२॥ एवंतेज्ञातिपक्षस्यश्रेयश्चैवभविष्यति । यदितेभरतः पुत्रंपित्र्यंराज्यमवाप्स्यति
३३ । सर्वैस्तुरवोचितोबालोरामस्यसहजोरिपुः समृद्धार्थस्यहीनार्थः कथंजीवेत्तवात्मजः
३४ अभिद्रुतमिवारण्येसिंहेनगजयूथपं । प्रच्छाद्यमानंरामेणभरतंत्रातुमर्हसि । रामभाता

सपत्नीनेकथंवैरंनप्रानयेत् ॥ ३६ ॥ कृतेतुरामेत्वमहीक्षितंपतौगमिष्यसित्वंसन्तुतापरा
भवं । अतोहितंचिंतयराज्यमात्मजेपरस्यचैवाद्यविवासकारणं ॥ ३७ ॥ इत्यार्षेरामायणे
योध्याकांडेकुब्जवाक्यंनामअष्टमःसर्गः ॥ एवमुक्तातुकैकेयीविनिश्वस्याब्रवीद्वचः
सत्यंवदसिमांकुब्जेजानेतेमतिमुत्तमां ॥ १ ॥ नतुपश्याम्युपायांतंयेनरावेयतमेसुतः इदंप्रा
प्थितुंराज्यंपित्रपैतामहंबलात् ॥ २ ॥ अनुरक्तोनृपश्चापिरामेगुणगणान्वितं । सकथंराममु
त्सृज्यप्राणैःप्रियतरंसुतं ॥ ३ ॥ भरतंनाममेपुत्रमभिषिंचेदकारणे । इत्येतद्वचनंश्रुत्वाकैके
य्यासंधराननः ॥ ४ ॥ उवाचेदंविनिश्वस्यकुब्जापापनिश्चया । इमंराममभिमोक्षेप्रव
नप्रस्थापयामिते ॥ ५ ॥ भरतस्याभिषेकंचकारयामियदीच्छसि । श्रुत्वैवंमंथरावाक्यंकैके
यीहृष्टमानसः ॥ ६ ॥ किंचिदुत्थायशयनात्स्वास्तीर्णादिदमब्रवीत् । कथयत्वंमहाप्रज्ञे
येनोपायेनमंथरे ॥ ७ ॥ भरतःप्राप्नुयाद्राज्यंरामश्चैववनंव्रजेत् एवमुक्तातयादेव्यामंथरा
पापनिश्चया ॥ ८ ॥ राघवंदुःखायरामस्यकैकेयीमिदमब्रवीत् । श्रूयतांमाभिधास्यामि

कृत्वाचापिविशल्यताम् ॥ ९ ॥ यदादेवासुरेयुद्धेसहराजर्षिभिर्नृपः अगच्छत्त्वामुपादायदेवराज
स्यसाह्यकृत् ॥ १० ॥ दिशमास्थायकैकेयिदक्षिणांदंडकांप्रति । वैजयंतमितिख्यातंपुरंयत्र
तिमिध्वजः ॥ ११ ॥ सशंबरइतिख्यातःशतमायोमहासुरः ददौशक्रस्यसंग्रामंदेवसंघैर
निर्जितः ॥ १२ ॥ तस्मिन्महतिसंग्रामेपुरुषान्क्षतविक्षतान् । रात्रौप्रसुप्तान्घ्नंतिस्मतरसासाद्य
राक्षसाः ॥ १३ ॥ तत्रातिविक्षतस्तद्धर्मार्तोनेनरक्षितःस्वयं । तेनतुष्टेनतेदत्तौद्वौवरौप्रियदर्शने
१४ ॥ सत्वयोक्तःपतिर्देवियदेच्छेयंतदावरौ । गृह्णीयामितितौनाथतथेत्युक्तंमहात्मना
१५ ॥ अनभिज्ञाप्यहंदेवित्वयैवकथितंपुरा । कथैषात्वत्स्नेहान्मनसाधार्यतेमया ॥ १६ ॥ तौ
वरौयाचभर्तारंभरतस्याभिषेचनं । प्रव्राज्यंचापिरामस्यवर्षाणिचचतुर्दश ॥ १७ ॥ क्रोधा
ग प्रविश्याद्यक्रुद्धेवाश्वपतेःसुते । शेष्वानंतरास्तीर्णायांत्वंभूमौमलिनवासिनी ॥ १८ ॥ राजानं
मानिरीक्षेथमाबभाषेकथंचन । रुदंतीपतितातिष्ठजगत्यांशोकसंकुला ॥ १९ ॥ दयिता
त्वंसततंभर्तुरत्रमेनास्तिसंशयः त्वत्कृतेपिमहाराजोथदीप्तामग्निचितांपतेत ॥ २० ॥ यदातुतौवरौ

दद्यास्त्वय्यसुतस्यायराघवः व्यवस्थापि महाराजरक्षणीयास्त्वामिमौवरौ ॥ रामं प्रव्राज्ययारण्ये
नववर्षाणिपंचच । भरतक्रियतांराज्येपृथिव्यांपार्थिवर्षभः ॥ २२ ॥ चतुर्दशाद्विवर्षाणिरामःप्र
व्रजितेवनं । हृदिशाश्वद्हृश्यमूलश्चशोषंस्थास्यतिनेस्तुतः ॥ २३ ॥ यौतौदेवासुरेयुद्धेवरंदशरथोंद
दौ । तौस्मारय महाराजंसोर्थोमात्राव्यतिक्रमात् ॥ २४ ॥ रामप्रव्राजनंचैवद्वितीयंयाच्यतांवरं ।
ततः प्रव्राजितश्चैववनंरामोगमिष्यति ॥ २५ ॥ चतुर्दशैववर्षाणिभवतस्तेस्तुतोनृप । येनकाले
नकाकुत्स्थोवनान्प्रत्यागमिष्यति ॥ २६ ॥ तेनकालेनपुत्रस्तेशतमूलोभविष्यति । संगृहीते
मनुष्येषु सुहृद्भिश्चाप्यसात्मवान् ॥ २७ ॥ नद्यातिक्रमितुंराजा कोऽस्तिवचवाक्यंमहीपतिः । क्रोध
स्वभावेवुधस्त्वमौबागपंबलमात्मवान् ॥ २८ ॥ नत्वांक्रोधयितुंराजा नकुद्धामप्युपेक्षितुंभव
प्रियार्थंराजाहि प्राणानपिपरित्यजेत् ॥ २९ ॥ प्राप्तकालेचनेमन्येराजानंजितमसाध्वसा । रामा
भिषेकसंकल्पोद्विरवि निवर्तय ॥ ३० ॥ पथ्यरूपमपथ्यंतमधर्मंमन्थराववचः । जिह्मस्वभा
वाकैकेयीप्रतिजग्राहमेदिता ॥ ३१ ॥ स्वभावएवनारीणांमूर्खोपिस्वजनोजनः । यद्ब्रवीतिनत

श्री० रामअ० का० २९

राम २९

देवाश्च संहृष्टास्तां त्यविश्वस्य हि ॥२२॥ सा तेन कुब्जवाक्येन हरिणीवोत्फुल्ललोचना । व्याजेन गीत
संलोभनादनर्थे सन्निवेशिता ॥२३॥ अर्थांश्चानर्थरूपेण सा ददर्श मनस्विनी । नहि तत्कथ्यते
पापं शापदोषेण मोहिता ॥२४॥ कैकेयी युद्धसा बाल्ये ब्रह्माणं सर्वरूपिणं । अस्तौषीत्तवती बा
लां तेन ब्राह्मणमहात्मना ॥२५॥ यस्मादस्तुवती विश्वं त्वं रूपामदगर्विता । तस्मात्त्वमप्यसत्या च लो
के प्राप्स्यसि कुत्सितां ॥२६॥ इति शापसमाक्रान्ता मकुरावशमागता । दृष्ट्वात्मन्तीव कैकेयी मञ्ज
शंपतिरिव बद्धे ॥२७॥ परिष्वज्य ननेगाढं कैकेयी दर्पविकलावा । उवाच वचनं धीरा तां कुब्जां पापद
र्शिनीं ॥२८॥ सम्यगुक्तं त्वया कुब्जे मया च श्रुतिशंसितं । नाहमेतद्विजानामि पूर्वं ते वाक्यमुत्तमं
॥२९॥ उपायाश्चिंतितः सम्यक्कृत्वया बुद्ध्या स्वपंडिते । इत्युक्तुसंस्भाविता तेन्द्र यन्मे दशरथो ददौ ।
॥४०॥ वरो देवासुरे युद्धे शरणं त्याग गतो हृपः । मम त्वं कामतो राज्ञा तदा सौख्यं पीडितः ॥४१॥
मया च राक्षसभयात्परिस्नेहेन रक्षितः । न रक्षत्विक्षितं किंचिन्मम राक्षसवारणे ॥४२॥ मम
विद्याबलं त्वस्ति येनाहं दुष्प्रधर्षणा । विद्यायाश्चागमं कुब्जे शृणु वक्ष्याम्यहं स्वयं ॥४३॥ पर्व

ऽस्यमप्रियमत्युद्वेगो न दर्शोयतः आख्येयमिति धर्मज्ञः कथयंति मनीषिणः ॥४४॥ न हि मे त्वद्वि
धा लोके काचिदस्ति हितैषिणी। मथावहासिता बाला श्रुत्वैवं शोकदिग्धोन्नमः ॥४५॥ जीर्णवस्त्रप्रति
छन्नः श्मश्रुलस्तृणरूक्षणः भस्मदूषितसर्वांगो हृष्ट्वा हर्षवल्लसंकथः ॥४६॥ अविज्ञातकथाभावः
श्रेष्ठाग्निरनवस्थितः प्रसन्नश्चाहमाविश्य सुशीतां मधुरां गिरं ॥४७॥ प्रीतोस्म्यभ्युपपतेः कन्ये ब्रू
हि किं करवामि ते। समसायश्चक्षुष्या हृष्ट्वा बद्ध्वा चांजलिमुद्गतं ॥४८॥ उक्तो वाक्यमिदं ब्रूते लज्जया
श्रधिता क्षरं। न किंचिदहमिच्छामि त्वत्तमेतावतामम ॥४९॥ यत्सत्क्रोधं परित्यज्य प्रसन्नस्त्वं द्वि
जोत्तम। एवमुक्ते न तु मया तेन हर्षितचेतसा ॥५०॥ ममातिस्पृहयाविद्धेयं बहुमानात्मयाहृता।
तदिदं स्तुष्टुतं ब्रूहि गीतं बुद्धिविनिश्चयात् ॥५१॥ विमृश्यं त्वया स्वयं बुद्ध्या म मापि कश्चिदं हृदि स्थं। भा
मोदयापि धर्मात्मा गुणवान् भ्रातृवत्सलः ॥५२॥ यौवराज्यमनुप्राप्य प्रश्रुत्यास्याति न संशयः॥
राज्यश्रीर्मनुष्याणां बंधुस्नेहापहारिणी ॥५३॥ यथा कार्यमकार्यं वा सन्दृष्टो नावबुध्यते। स्वप्न
णार्थं च पुत्रस्य भरतस्य महात्मनः ॥५४॥ अवश्यमेतत्कर्तव्यं मत्कोवचनेन च। सा त्वेवं तु ताके

केय्याश्चहृष्टामंथरानवेत्त ॥ इत्युवाचाथकैकेयीमिदंप्रीतिसमन्विता। दिष्ट्यावगच्छसिदि
नंदिष्ट्यामेसफलःश्रमः ॥ २६ ॥ दिष्ट्यपुत्रहितंकर्मकार्त्तुमभ्यव्यवस्यसि। ॥ इदंवचोद्यप्रमुदा
हितंमयातवानुरागेणसुखायनिश्चमं। अलंविस्तरेणैनस्तुतत्रनीक्ष्ययाकैकयहृष्टयाक्षाश्रेणतु
प्रसादये ॥ ५७ ॥ इत्यार्षेरामायणेयोध्याकांडेकैकेय्यानुप्रसादनंनामेकादशोनामै
कादशः सर्गः ॥ मंथरायास्ततःप्रीताकैकेयीप्रमदोत्तमा। कुंडलेश्रवणान्मुक्त्वाप्रददौप्रीति
लक्षणात्त ॥ १ दत्वातुकुंडलेदेवीतापनीयेशुभेतु नम। अव्यक्तामुत्स्मितंद्रात्वामथुरांप्रशशंसह।
२ श्रज्ञांतेनावज्ञानामिप्रेरंप्रेरणामिधायिनि। अस्यांपृथिव्यांकुब्जासुबुद्धिर्नास्तिममात्वया ॥ ३ ॥ त्वमे
वहिसमर्थेहितुनित्यमुत्तमाहितैषिणी। नाज्ञासिषमिदंपूर्वंकुब्जाज्ञानाञ्चिकीर्षितं ॥ ४ ॥ संतिदुःसं
स्थिताकुब्जावक्राःपरमपापिका। त्वंपद्ममिववातेननमिताप्रियदर्शना ॥ ५ ॥ उरस्तेस्तुनिविष्टंच
यौचस्कंधौसमुन्नतौ। अधस्ताच्चोदरंशांतंसुचारुरिवलज्जितं ॥ ६ ॥ जघनंतवविस्पष्टंरशनाद्यु
मशोभितं। जंघेचत्रपांससमन्यस्तेपादौचप्यततांगुली। ७ ॥ त्वदायताभ्यांसंधिभ्यांमकौरेष्ठुरुकावा

श्रीः

सिनी। अग्रतो मम गच्छंती सारसीव विराजसे ॥१८॥ आसन्याश्चंबरे मायाः सहस्रमसुराधिपे।
सर्वास्त्वयि निविष्टास्ता भूयश्चान्याः सहस्रशः ॥१९॥ वृत्तवायतकं कुब्जे शेरथघोणमिवोन्नतं। स
नयः क्षत्रविद्याश्च मायाश्चात्र वसंति ते ॥२०॥ अत्राहं प्रतिमोक्ष्यामि कुब्जे मालां हिरण्मयीं
अभिषिक्ते च भरते राघवे च वनं गते ॥२१॥ ज्ञात्येन च सुवर्णेन सुनिष्टप्तेन चंदनं। लब्धार्था च
प्रतीता च लेपयिष्यामि ते ककुदं ॥२२॥ मुखे च तिलकं चित्रं कांचनं कमलेक्षणे। कारयिष्या
मि ते कुब्जे शुभान्याभरणानि च ॥२३॥ यावदुग्रेण नरवोश्चोत्क्रोचंदनेन सुगंधिना। परिधाय शु
भे वस्त्रे देवतेव चरिष्यसि ॥२४॥ चंद्रविस्पर्धिना तेन मुखेनाप्रतिमेन ते। गमिष्यसि गतिं मुख्यां
गर्वयंती द्विषज्जनं ॥२५॥ अस्याः प्रकृतयः काश्चित्कुब्जा मम निवेशने। तास्त्वं परिचरि
ष्यंति यथा त्वं मां वरानने ॥२६॥ इति प्रशस्यमाना सा कुब्जा देवीमथाब्रवीत्। शयानां शयने शुभ्रे वस्यै
नीचतां शुभ्रां ॥२७॥ गतोदके सेतुबंधः कल्याणि न विधीयते। उत्तिष्ठ कुरु कल्याणि राजानमनुद
र्शय ॥२८॥ इति चोत्साहिता देवी कैकेयी कुब्जया तदा। भरतार्थे विषणी श्रुद्धा रामकृत्ये च हर्षिणी ॥२९॥

श्री रा अ का २१

राम २१

अनेकशतसाहस्रं मुक्ताहारं विहारिणी वरानना। अवमुच्य स्ववर्णं तं शुभान्याभरणानि च।२०
तथा शोकसादिता देवी गत्वा मंथरया सह। क्रोधागारं प्रविश्यैषा सौभाग्यमददर्पिता।२१ नक्षत्रेशो
पमं तत्तु कुब्जावाक्यवशं गता। संविष्य भूमौ कैकेयी मंथरामिदमब्रवीत्॥२२॥ इह वाद्य विमो
क्ष्यामि प्राणानिष्टांस्तवाग्रतः वने वा राघवे याते भवतः शाश्वतिं श्रियं॥२३॥ धनानि न च वस्त्रा
णि नालंकारान्न भोजनं। रोचयिष्याम्यहं तावद्यावद्रामो न गच्छति॥२४॥ अभिषिक्ते च भरते
राघवे च वनं गते। क्रोधागारात्समुत्थास्ये नान्यथा पश्य मे व्रतं॥२५॥ नागकन्येव निश्वस्य
दीर्घमुष्णं वरामिनी। मुहूर्तं चिंतयित्वा तु नेत्यात्मनि समागते॥२६॥ निश्चित्य मनसा सम्यगिति
कर्तव्यतां समं। मंथरायाः शनैः सर्गमाचचक्षे विचक्षणा॥२७॥ स सुहृच्चार्यकामा च मानिशास्य
विनिश्चयं। आविवेशाथ सा भूमौ निवेश्य भ्रुकुटीमुखे॥२८॥ विचित्राणि सुमाल्यानि दिव्यान्या
भरणानि च अपविध्याथ कैकेयी तानि भूमिं प्रपेदिवा॥२९॥ क्रोधाधावा थ्य पतिता सा भूमौ
मलिनाङ्गी। एकवेणीधरा भूत्वा गतमंत्रैव किन्नरी॥३०॥ इत्येवमुक्ता वचनं सुदारुणं भैरा

॥ ३

यसर्वाभरणानिकामिनी असंवृतांसंस्तरणेनमेदिनीं ततोधिशिश्येपतितेवकिन्नरी
दीर्णसिंमंनतमोवृताननानदावसंक्लोन्नमदामहामृगाण। नरेंद्रपत्नीविमनाबभूवसातमोवृता
द्यौविवनष्टमास्वारा ॥ इत्यार्षेरामायणे —— अयोध्याकांडेकैकेयीप्रायोपवेशोनामद्वाविं
शः सर्गः ॥ २२॥ आज्ञाप्यतोमहाराजोराघवस्याभिषेचनम्। उपस्थापनमाज्ञाप्यप्रविवे
शनिवेशनं १ सकैकेय्यागृहंश्रेष्ठंप्रविवेशमहायशाः पांडुराभ्रमिवाकाशंयथाचंद्रस्त्वमिस्त्र
दा २ शुकबर्हिणसंघुष्टंक्रौंचहंसरुताकुलं। वादित्ररवसंघुष्टंकुब्जवामनिकायुतं ३ सदा
पुष्पयुतैर्वृक्षैर्वापीभिश्चोपशोभितं। दांतराजतसौवर्णैः संवृतंपरमासनैः ४ विविधैरन्नपा
नैश्चभक्ष्यैर्बहुविधैरपि। उपपन्नैर्महार्हैश्चभूषणैस्त्रिदिवोपमं ५ तत्प्रविश्यमहातेजाः कै
केय्यान्तर्वनोत्तमं। सकामबलसंतप्तस्तत्पत्नीमनुजाधिपः ६। अपश्यन्दयितांभार्यां
पापकामविषसादच। नहिन्तस्यपुरादेवींतांवेलामभ्यवर्तत ७ नचराजागृहंशून्यंप्रविवेश
कदाचन। ततोगृहंस्तांतांराजापप्रच्छदयितांशुभां। ८ यथापरमविज्ञायस्वार्थलिप्सुर

श्रीरा
अ॰का
२२

राम
२२

पंडितः कक्षधारीततोवाक्यमब्रवीत्तत्रभीतवत् । देवदेवीभृशंक्रुद्धाक्रोधागारमधिष्ठिता ।
॥२०॥ कक्षधार्यावचःश्रुत्वातं परमदुःखितः भूयार्तस्वदुःखेन बभूवजगतीपतिः ॥२१॥ स
वृद्धस्तरुणींभार्यांप्राणेभ्योपिगरीयसीम् । अपापःपापसंकल्पांसुवाचचक्रमसांत्वयन्
२२ सर्वलोकाधिपंस्पृष्टा अनन्तामपिचात्मनः ।कांतुक्ष्यतमानांतांददर्शापविसान्त्वयन् ।
२३ । लतामिवविनिकृत्तांपतितांदेवतामिव । घृतसामिवदुःखेनविज्ञायजगतीपतिः
२४ करेणुमिवदिग्धेनबद्धांव्याधेनदुःखितां । महागजइवासाद्यस्नेहात्मस्पर्शतांनृपः
२५ सतांविमृज्यपाणिभ्यांभीतिसंत्रस्तचेतसः उवाचराजाकैकेयींश्वसंतींभुजगीमिव
२६ नतेहममभिज्ञानामिक्रोधमात्मनिसंश्रितं । देविकेनाभियुक्तासिकेनचाप्यवमानिता ।
२७ यदिदंममदुःखायशेषेकल्याणिदुःखिता । सतिदेविमहाराज्ञिमय्यकल्याणिश्रेयसि
२८ भूतोपहतचित्तेवममचित्तप्रमाथिनि । संतिमेकुशलावैद्याः स्वाभिरूपाश्चपर्वशः २०
२९ सुखितांत्वांकरिष्यंतिव्याधिमाचक्ष्वभामिनि । कस्यवानेप्रियंकार्यंकेनवाविप्रियंकृतं

कः प्रियं लभितामद्य को वा न्तुमहद्दप्रियं। मातो धीमी क्ष्याश्वत्वं देवि संपरिशोषणं २१ अ
वध्यो वध्यतां को द्य कः को वा विमुच्यतां। दरिद्रः को भवत्वाढ्यः कोर्थवानापि किंचन २२ व
यं च मम दीयाश्च सर्वे तव वशानुगाः। न ते किंचिद भिप्रायं व्याहर्तुमहसुत्सहे २३ आत्मनो जी
वितेनापि ब्रूहि यं मनसेच्छसि। बलमात्मनि जानामि न मां शंकितुमर्हसि २४ करिष्यामि त
व प्रीतिं सुकृतेनापि ते शपे। यावदावर्तते चक्रं तवती मे वसुंधरा २५ प्राच्याः सिंधुसौ
वीराः सुराष्ट्रा दक्षिणापथाः। वंगांगमगधा देशाः मत्स्याः काशिकोसलाः २६ तत्र जातं बहु
विधं धनधान्यमनंतकं। ततो वृणीष्व कैकेयि यावत्त्वं मनसेच्छसि २७ किमायासेन ते भीरु
शीघ्रमुत्तिष्ठ शोभने। तत्त्वं मे ब्रूहि कैकेयि यतस्ते भयमागतं २८ तन्वेहमपनेष्यामि नीहा
रमिव भास्करः। तमनन्यवशं दृष्ट्वा किंचिद् कामवेगवशानुगं २९ उवाच पृथिवीपालं कैकेयी
दारुणं वचः। स्मर राजन् पुरावृत्तं तस्मिन्देवासुरे रणे ३० तत्र चोवाच यत्तुभ्यं कृत्वा जीवितमं
तरा। तत्र मा संभ्रमाद्देवसंभ्य त्वां परिरक्षितः ३१ यत्त्वां क्रोधिनं दिव्यां गंधर्वास्ताः समनिर्दुतः

श्रीरा
अका
२३

श्राम
२३

विद्यया च मयध्वस्तास्तहावीर्यपराक्रमाः ४ जायस्त्वाध्वंकमास्स्थास्यततोमेत्वंवशौबदा। नौद
दत्तौवरौदेवनिक्षेपंगमितंमया ५ नवैवपृथिवीपालमाकाशोस्मत्प्रसंगतः। नोप्रतिश्रुत्य
मद्दत्तेधाहमर्हसिमेवरौ ६ अद्यैवहिनशक्यामिजीवितंत्वद्विनाकृता। श्वपच्चामेविनाशा
अपाशोस्मृगइवात्मनः ७ तामुवाचततोराजाकैकेयींसस्मितंतदा। कस्येणेनीस्यवचनं
शहीत्वाश्रुवंजेषुच ८ अपत्तिश्चेनजानीषेत्वत्तःप्रियतरोमम। नकाश्चिद्विद्यतेराजारामं
श्चैवतथात्मजाः ९ तेनजप्येहेनमुख्येनराघवेनमहात्मना। शपेसंजीवितार्हेणब्रूहियन्म
नसेच्छसि १० यंमुहूर्तमपश्यंस्तुनजीवेयमहंवरे। इहरामेणकैकेयिशापेब्रूहिकिमिच्छसि।
११ आत्मनाचात्मजैःप्राणैःशापेब्रूहिकिमिच्छसि। भद्रेहृदयमेतत्तदनुसृश्यपद्दीसस्वमे १२
नित्यवीक्ष्यकैकेयिब्रूहियत्साधुमन्यसे। सानदर्थमनादेवीनमभिप्रायमनस्सवः १३ नि
गैवचंतदाराज्ञोबभाषेदुर्वचंवचः यथाचरामशापसेवरंमत्वंददासिच १४ नक्रोत्वेशु
समागम्यदेवाःशक्राद्योगमा: चंद्रादित्यौग्रहाश्चैवनभोसत्यहनीदिशः १५ वदीश्च श्रु

वीचैवमहर्षिगंधर्वराक्षसैः। निशाचराणि भूतानि गृहेषु गृहदेवताः ॥२६ यानिचान्यानि भूतानि

गृहेषु गृहदेवताः। यानिचान्यानि भूतानिजानीयुर्भाषितंवचः ॥२७॥ सत्यसंधोमहाराजोधर्म

ज्ञः सुसमाहितः वरंममददात्वेषयन्मेशृणुतदेवताः ॥२८ इतिदेवीमहाभागासंपरिगृह्यात्मिगम्य

वै। तदेववरद्धादेवंवरदंकाममोहितं ॥१९॥ वरोमेयाच्यतांदेव पुत्रोदत्तोमहीपते। तातावद

हमद्यैवषड्वक्ष्यामिशृणुमेवचः ॥२०॥ वस्तव्यायंसमारंभोरामेसमुपकल्पितः। अनेनै

वाभिषेकेनभरतोऽप्यभिषिच्यतां ॥२१॥ योद्वितीयोवरोदेवदत्तःप्रीतेनमेत्वया। पुरादेवासु

रेयुद्धेतस्यकालोयमागतः ॥२२॥ नवपंचचवर्षाणिदंडकारण्यमाश्रितः। चीराजिनजटा

धारीरामोभवतुतापसः ॥२३॥ भरतोलभतांराज्यंयौवराज्यमकंटकं। एषमेपरमःका

मोदत्तमेववरंवृणे ॥२४॥ अतोहिराजन्भवसत्यसंगरः कुलंचशीलंचहिजन्मरक्षता

त्मनः परत्रवासेहिवदंत्यनुत्तमंतपोधनाःसत्यवचोहितंनृणां ॥ इत्यार्षेरामा

यणेअयोध्याकांडेकैकेयीवरयाचनोनामअष्टादशः सर्गः ॥ ततःश्रुत्वामहाराजोकैकेय्या

श्री
रामा
अयो
का
२४

राम
२४

दारुलोचनः चिंतामभिसमापेदे संतप्तश्चाग्निवद्वलणं । किंनु मेयं दिवास्वप्नः पितृजीवा पुपद्रवः । अथवानृतोपसर्गोद्भवाभनसो व्याप्यकपलवः । २ इतिसंचिंतयन्नाजानाम्यगच्छन्न दासुखं । यथानसदृशान्भौमानिश्चेष्टश्चाभवन्नदा ३ प्रतिलभ्य ततः संज्ञां कैकेयीवाक्य नार्दितः व्यथितोविक्लवश्चैव व्याघ्रीदृष्ट्वायथामृगः ४ असंवृततलासीनो जगत्यांदी र्घमुष्णमुत् । मंडलेपन्नगोरुद्धोमंत्रैरिवमहाविषः ५ अन्नाम्यहप्पतिकैकेयीमिदमब्रवी त । अहोधिगितिसामर्षवाचमुक्त्वानराधिपः ६ मोहमापेदिवानसह्यः शोकोपहतचेत नः चिरेरात्तु नृपः संज्ञां प्रतिलभ्य सुदुःखितः । ७ कैकेयीमब्रवीत्क्रुद्धः शोकदुःखवरामाहितः शंसेदुष्टचारित्रे कुलस्यास्य विनाशनि ८ किंकृतं तव रामेण मया वा पापदर्शिनि । मान्ते तुल्यां यदा त्वं चिंत्वं नैनं तव राघवः ९ नस्यैवं त्वमनर्थाय किनिमित्तमिहोद्यता । त्वंमया त्मविनाशाय भवनं स्वं प्रवेशिता १० राजपुत्रीत्वविज्ञाना व्यालीतीक्ष्णविषा यथा । जीव लोको यदा सर्वो रामस्याह गुणस्तवम् ११ अपराधं कमुद्दिश्य त्यक्ष्यामीष्टतमं सुतं । कौसल्यां

वास्तु मित्रं वा त्यजेयमपि वा श्रियं । जीवितं चात्मनो राम न त्वेव मम वल्लभं । परां भवति मे प्री
तिर्दृष्ट्वा तनयमात्मनः । अपश्यतस्तु त्वां राम नष्टा भवति चेतना । तिष्ठेल्लोको विना सूर्यं सस्यं
सह वनं गते। रामे राजीवपत्राक्षे त्वयोध्यां पुनरागते २३ वनेषु खलु तेषु त्रिभावमस्यापुमत्त
या। लक्ष्मणस्य च वीरस्य देवरस्य विशेषतः २४ एवं संदिश्य सीतात्वप्रशस्यां च यशस्विनीम्
श्वश्रूं पाद्यार्ये सक्ते दृष्टवौ सत्यां रामम अब्रवीत् २५ नित्यं राघव सीतायां भवितव्यं समीपतः लक्ष्म
णस्य च भक्तस्य त्वया वीरस्य मानद २६ कर्तव्यश्च प्रमादश्च नैव वने प्रचुरपादपे। तां प्राञ्जलिर
भिक्रम्य मातृमध्ये व्यवस्थितां २७ रामोपि धर्मं धर्मज्ञो मातरं वाक्यमब्रवीत् अम्ब सीतां सुभा
श्रित्य गत्वा मामनुशाससि २८ लक्ष्मणो दक्षिणो बाहुश्छायेयं मम मैथिली। नेयं त्वं कुंभ
या शाकयावकी निर्गतं मवनतायथा २९ गृहीतशरचापस्य ऊतोस्ति हि भयं मम। अपि त्रयाणां लो
कानामीश्वराद्वा वा तथा ज्ञोः। अंभसा दुःखिनी भूत्स्वं पश्यन्तां पितरं मम। ज्ञातो स्य वनवासस्य

मविष्यत्यचिरेण मे ॥३०॥ अस्यप्रसादेनवर्षाण्येतानिमेपुनः । शिवेनैवगमिष्यंतियथैवै
कादिवसं तथा ॥३१॥ स्वस्तिसंगमवागमांपुनरभ्यागतंवनात् । नैवेवंस्तुरातैः पुरायैवंद्व्यपि
माश्रुचः ॥३२॥ एतावदभिनीतार्थमुक्त्वासजननीवचः । अवसत्प्रयतोरात्रिंतत्रददर्शात्याविमात्रः
॥३३॥ समुपेत्यचमात्रूस्ताः कृतांजलिरिदंवचः । उवाचरामोधर्मात्माप्रश्रयावनतस्तदा ॥३४॥ अ
संवासात्परुषंकिंचिदविश्वासाद्वापराधितं । क्षंतव्यमपराधंमेसर्वाश्चामंत्रयामिवा ॥३५॥ अ
ज्ञानाद्वाप्रमादाद्वायदन्यमपिकिंचन । अपराधंनदद्याहेसर्वशःक्षमयामिवः ॥३६॥ अथज
ज्ञेमहांस्तत्रनारीनृपतियोषितां । क्रौंचीनामिवसंक्रन्दएवंब्रुवतिराघवे ॥३७॥ मुरजपणववे
णुनादितंदशरथवेश्मबभूवयत्पुरा । विलपितपरिदेवितंतवनैर्व्यसनभवैस्तदभूद्विनादित
॥३८॥ इत्यार्षेरामायणेअयोध्याकाण्डेदशरथस्त्रीविलापोनामसर्गः ॥ कृतांजलिस्ततोरामो
लक्ष्मणश्चमहायशाः । वैदेहीचैवराजानंप्रतिजग्मुः प्रदक्षिणं ॥१॥ कृत्वाप्रदक्षिणंचैनंप्र
णम्यपादानुमान्यच रामः शोकपरिक्लान्तांजननीमभ्यवादयत् ॥२॥ अन्ववलक्ष्मणश्चैवतांकौ

नीमिवपादपात् । अन्वेवलक्ष्मणश्चैनां कदलीमिव पादपात् ॥३॥ ततोमातुः सुमित्रायाः पादौ
जग्राहलक्ष्मणः । तं वंदमानं कदलीमिव विह्वलपचयीडितं ॥४॥ स्नेहान्मूर्धन्युपाघ्राय सुमित्रा पुत्र
मब्रवीत् । अरिष्टं गच्छ पंथानं सहरामेण लक्ष्मण ॥५॥ शुश्रूषस्व भ्रातरं ज्येष्ठं रामं लोकहिते रतं । म
न्युनेन त्वयापुत्र नानितादृश बांधवः ॥६॥ यस्त्वं प्रस्तोसि प्रियान्सोता न्माचराममनुव्रतः समस्थो
विषमस्थोवा रामस्ते परमागतिः ॥७॥ प्राणैरपि परिरक्षितव्यो ज्येष्ठो भ्राता गुरुरुच्यते । तस्मादस्याप्रम
त्तस्त्वं शरीरं परिपालय ॥८॥ विजनेवसतोरण्ये सीतायाः रमतः सह । एषपुत्रसतांधर्मो यं त्वमि
च्छसि सेवितुं ॥९॥ रुचिरदः कुलेपुत्र भ्रातृज्येष्ठानुपालयेत् । भ्राताज्येष्ठोप्रमत्तेन रामो राजीव
लोचनः ॥१०॥ त्वया पुत्र वने सेव्यः परिपाल्यश्च सर्वथा । दानं दीक्षा न यज्ञेषु तनुत्यागो मृधेपि
च ॥११॥ रामं दशरथं विद्धि मां विद्धि जनकात्मजां । अयोध्यामटवीं विद्धि गच्छ तात यथासुखं
॥१२॥ इत्युक्त्वा लक्ष्मणं पुत्रं सुमित्रा राममब्रवीत् । त्वयापि पुत्र ज्येष्ठोयं लक्ष्मणः भ्रातुकर्षण
॥१३॥ भक्तोनुरक्तोनुगतो भ्रातानान्यः स्वरूप्यते । त्वयायं सर्वथा रक्ष्यस्त्वं चैवानेन राघव ॥१४॥ एव

मातृस्त्वनिरामस्तांसुमित्रांऽप्यभाषत । चकारांजलिश्चैनामभिवाद्यप्रदक्षिणं ।२५। ततःसु
मंत्रः काकुत्स्थं प्रांजलिर्वाक्यमब्रवीत् । विनीतवद्युपागम्य मातलिर्वासवं यथा ।२६। राजपुत्र
नमस्तेऽस्तुयुक्तोऽयंतेमहारथः अनेनत्वांहिनेष्यामियत्रमांरामवक्ष्यसि ।२७। चतुर्दशहिवर्षा
णिवस्तव्यानित्वयावनेनाद्यप्रार्थिन्यापितानियंकैकेय्यायानियाचितः ।२८। तंरथंसूर्यसंके
सीताहृष्टेनचेतसा । आरुरोहवरारोहाकृत्वालंकारमात्मनः ।२९। वनवासंहिसंख्यायवा
सांस्याभरणानिच । भर्तारमनुगच्छंत्यैसीतायैश्वशुरोददौ ।२०। तथैवायुधजातानिभ्रातृभ्यांक
वचानिच । रथोपस्थमभिन्यस्यचर्मणिंपिटकंचतत्र ।२१। अथज्वलनसंकाशंचामीकरविभू
षितं । तमारुरुहतुःक्षिप्रंभ्रातरौरामलक्ष्मणौ ।२२। सीतातृतीयानारूढोदृष्ट्वाधर्ममनोदयत् ।
सुमंत्रःसंहितानश्वान्वायुवेगसमाञ्जवे ।२३। प्रयातेतुमहारण्यंचिररात्रायराघवे । बभूव
नगरंसर्वंक्रोधमूर्छंबलंचतत्र ।२४। तत्समाकुलसंभ्रांतंमत्तसंकुपितद्विपं । हयशिंजि
तनिर्घोषंपुरमासीन्महास्वनं ।२५। ततःसबालवृद्धासापुरीपरमपीडिता । राममेवाभिदु

रवाः

द्रावयद्धर्मांशः सलिलंयथा। पार्श्वतःपृष्ठतश्चैवजनाःपुरनिवासिनः।अस्तुपूर्णांमुखाः सर्वेनसुखु
र्हर्शकुःरिवता: संयच्छवाजिनः स्तेनशनैर्याल्लिथवापुनः। २७ रामस्यइहमिक्षामोमुखपङ्कजमहा
त्मनः हृदयानिहरन्तीवसर्वेषानस्यचंद्रमाः २८ यथायामृताद्वदेवैनंकदाद्रक्ष्यामहेपुनः शुस्थि
तोदुर्गमध्वानंनाथोनोमनकोवत्सलः २९ कदेनंवनकान्ताराद्द्रक्ष्यामःपुनरागते।आयसंहृद
यंनूनंराममातुःसुसंहतं ३० यन्नदीर्णंप्रियेपुत्रेवनवासायनिर्गते।एकैवकृतपुण्येयंवै
देहीतनुमध्यमं ३१ यानुगच्छंनगच्छंतंछायेवानुपमेमतिं।त्वंचलक्ष्मणसिद्धार्थःकृतपुण्य
श्चयःप्रिये ३२ भक्तयानुगच्छसिज्येष्ठंभ्रातरंधर्मवत्सलं।एषातेमहतीसिद्धिरेषतेस्मुदयोमहा
न् ३३ एषस्वर्गस्यमार्गश्चयद्राममनुगच्छसि। एवञ्चुवंनस्नेपौराबाष्पवेगमुपागतं ३४ ये
दानवोक्तः संरोहदुःखोनाककुहुस्ततः। क्रन्दुगंतासिदुःखांतानस्मानुत्सृज्यराघव ३५ न
यास्मानपिचत्वंर्गहं राममनुव्रतः अथवाजास्तःश्रीभिर्दीनान्निर्देनमानसः ३६ निर्ग
गामाप्रियंपुत्रंद्रक्ष्यामिक्वचयंग्रहात्। क्रंदतीनांस्त्यपस्त्रीणांशुश्रुवेनतध्वनिःस्वनः ३७ कोशल

हु

रामका
येष्का।
७७

राम
७७

नाभिवाक्ष्यंदोषदुष्टेगतदिशौवने। सचराजादशरथोगतश्रीर्नबभौतदा ३८ यथापूर्णः शशी

कालेग्रहेणोपहृतद्युतिः। ततोहाहेतिकरुणः शब्दः समभवन्महान् ३९ दुःखितंप्रेक्ष्यराजा

नंसदारंनिर्गतंगृहात्। हारामेतिजनाः केचिद्धाराजन्नितिचापरे ४० चोशमानानुपेतत्रपुरि

वव्रुः समंततः तमवेक्ष्यततोरामः पितरंशोकविह्वलं ४१ पदानिमनुगच्छन्तंदारैः स्वैः प

रिवारितः। देव्याकौसल्ययासार्धंविह्वलंतंपदेपदे ४२ धर्मपाशस्थितोदीनोनाशक्नो

दभिवीक्षितुं। पदानोनोवदुःखार्तोमोहच्छाकोशसमन्वितौ ४३ पितरौनोदयामासशीघ्रंया

हीतिसारथिं। नहिसद्दर्शनंरामस्ततयोर्दुःखपरीतयोः ४४ शशाकसोढुंदुःखार्तास्तोत्रार्दि

नइवद्विपः हापुत्र रामहासीतेहाहालक्ष्मणपश्यमा ४५ इतिरामाचदेवीचक्रोशतावथ्यथा

वतां। रामलक्ष्मणसीताश्चरुद्धंनोवारिनेत्रजं ४६ असहन्नामवेक्ष्यंतदृष्ट्वतौमिवमानव।

निष्ठतिष्ठेतिराजाहियाहियाहीतिराघवः ४७ सुमंत्रस्यबभूवात्मागोचक्रांतरितंयथा ना

श्रौषमितिराजानंस्तुतंवक्ष्यसिसंगमे ४८ चिरंदुःखस्यपापिष्ठमित्यर्थंमितिरामस्तमब्रवीत्। सम

मस्यमनोबुद्ध्वाभृशंमंत्रीदीनमानसः । अंजलिंरूपनेबद्ध्वानोदयामासतान्हयान् । शीघ्रंप्रव्राजिते
रश्वैः प्रयांतमथराघवं ॥२०॥ यदानशोक्तारन्वेत्तुं यौरनारणोताः स्त्रियस्तदा । न्यवर्तंतस्तुदुःखार्ता
निराचाराम दर्शने ॥२१॥ मनोभिराशुवेगैश्च नन्यवर्तंतसर्वशः । यमिच्छेत्पुनरायांतं नैनंदूरमनुव्रजे
त् ॥२२॥ वसिष्ठप्रमुखाविप्रा ऊचुस्तंनृपंतदा ॥२३॥ तेषांतदातद्वचनंसराजाश्रुत्वाश्रुशोको
परिप्लुतवाक्याः । तस्थौप्रयांतंतमुतमीक्षमाणो विषादमोहव्यथितांतरात्मा ॥२४॥ इति
श्रीरामायणे अयोध्याकांडे राम निर्याणं नाम सर्गः ॥ तस्मिन्प्रयातेत्ववितेंधुराङामेद्दतांजलौ ।
आर्तशब्दोहिसंजज्ञे स्त्रीणामंतःपुरेतदा ॥१॥ अनाथस्यजनस्यास्यदुर्बलस्यतपस्विनः । यः
गतिः शरणंचासीत्सनाथः क्वनुगच्छति ॥२॥ नक्रुध्यत्यभिशस्तोपिक्रोधनीयानिवर्जयन् । क्रुद्धा
न्प्रसादयन्सर्वान्सनाथः क्वनुगच्छति ॥३॥ कौसल्यायांमहानेजायथामानरिवर्तते । तथायसर्वा
स्ववर्ततेनंमहात्मासक्वनुगच्छति ॥४॥ कैकेय्याक्लिश्यमानानांराज्ञांचक्रोपितेनयः । परित्रातागोप्ता
चरक्षितासक्वनुगच्छति ॥५॥ अब्रुद्धि वनेकिंराजाविपरीतमतिर्ध्रुवम् । येनाद्यसर्वभूतानां

परित्यजति राघवं । इति राजमहिष्यस्ता विवत्स्य इव धेनवः । अन्योन्यं संपरिष्वज्य बाहुभ्यां भ्रंशचक्षुषः
१७ सज्जमनः पुत्रशोकसमार्त्तशब्दं महीपतिः श्रुत्वा पुत्रवियुक्तात्मा विषसाद सुदुःखितः । न नाग्निहो
त्राण्यहूयंत नैत्यर्यं श्रान्तरन्धयंत । व्यस्त्रवृक्षक वचान्नाना गावो वत्सान्न चापदुः १९ इक्ष्वाकुस्य निवुधावे
हुः अङ्गारकराहवः दारुणः सोममभ्यासाद्य ग्रहाः सर्वे वनस्थिये २० नक्षत्राणि हतार्चीषि ग्रहाश्चो
पहतार्चिषः विशिखा ध्रुवि धूमास्य नभसः प्रचकाशिरे २१ अकालानिलवेगेन महोदधिरिवोद्ध
तः रामे वनं प्रव्रजिते नगरं प्रचचाल च २२ दिशः पर्याकुलीभूतास्तिमिरेणैव संवृताः नग्रह
ध्वजनः सर्वो दुःखशोकपरायणः २३ आहारे व्यवहारे च न कश्चित्कुरुते मनः वाष्पपर्याकुलमु
खो राजमार्गगतो जनः २४ न हृष्टो लक्ष्यते कश्चिन्मनः शोकपरायणः । न ववाय पवनः शीतो न श
तापदिवाकरः २५ नगराजशाचीचापि सर्वमासीत्समाकुलं । नाचिंतयत्सुतान्कोपि न शोकं संविद
मानसः २६ सर्वे सर्वे स्वयं यमित्य काममेवाद्य चिंतयन् । मेनुर्वामस्य पस्त्रकृत्स्ने सर्वे सुदुःखे ततः ॥२७
शोकम्नाकसमाक्रांतः शयनं न जहौ सदा । गहत्वं मञ्च केवायी निंदतस्म महीपतिम् २८ आत्मना

गान्यस्त्वयं नः परं दैन्यमुपागताः ॥ ततस्स योध्याधिपतिर्महात्मना प्रसन्नवेषेणवरायमरावती । च
चाल्लसर्वानयमातयीडिना मनागयोध्या श्वेत धास्तुकल्लस्तदा ॥ २० ॥ इत्यार्षेरामायणेयोध्याकाण्डे अं
तः पुरविलापोनामसर्गः ॥ ॥ यावत्तुगच्छेतास्तस्य राजाराघवलोकयत् । नैवेक्ष्वाकुवरस्ताव
च्चक्षुषीसमुपाहरत् ॥ १ ॥ यावद्राजाप्रियं पुत्रं ददर्शात्यन्तधार्मिकं । तावत्प्रववृधेतेवास्य चक्षुः पु
त्रदिदृक्षया ॥ २ ॥ नायश्यन्तुवरो पश्यदारामस्पष्टमिव । नदान्तश्चाविवर्णोङ्गपपात धरणीत
ले ॥ ३ ॥ तस्य दक्षिणासं गेत्तुकौसल्याबदंगना । वामं च सान्वगात्त्यस्यास्त्वैकेयीभरतप्रिया ॥ ४ ॥
तां नयेन च सं पन्नो धर्मेणाविनयेन च । उवाच राजा कैकेयीं समीक्ष्य व्यथितेन्द्रियः ॥ ५ कैकेयि
माममांगानि स्प्राक्षीस्त्वंदुष्टचारिणि । नहित्वां स्वष्टुमिच्छामि न भार्यानत्वंनमेप्रिया ॥ ६ येचत्वामनु
जीवंति नाहंतेषां नतेमम । केवलार्थंपरांहित्वांत्यक्तोधर्मोत्यजाम्यहं ॥ ७ ॥ अगृह्णां यच्चतेपाणि
मग्निं पर्यायणं चयत् । अनुजानामितत्सर्वमिहलोकपरत्रच ॥ ८ ॥ भरतश्चेत्प्रतीतः स्याद्राज्यं
प्राप्तेस्मुत्तमं । यन्मेसदद्यात्पित्रोत्यर्थं भमतत्त्वमुपागतं ॥ ९ ॥ अथरेणुरयरिक्तं कौसल्यावा

राम
अयोध्या
७९

राम
७९

महीपतिं। न्यावर्त्ततत दा देवी कौसल्या शोककर्षिता ।२०। कृत्वेव ब्राह्मणं राजा पदस्पृष्टेव पन्नगं
अन्वक्त पत धर्मात्मा पुत्रं संन्यज्य राघवं ।२१। निवर्त्तिन्वा निवर्त्तिन्वा सीदतो रथवर्त्मसु। राज्ञस्तस्य
भैरवं पश्यस्तस्यां शुमतो यथा ।२२ विललाप च दुःखार्त्तः प्रियं पुत्रम नुस्मरन्। नगरान्तमनुप्राप्त
न्पश्याम्पुत्रमनाथवत् ।२३। इमानि हयमुख्यानां वहतां तं ममात्मजं । पदानि दृष्ट्यन्ते न
महात्मा न तु दृश्यते ।२४। स नूनं किंचिदेवाद्य वृक्षमूलमुपाश्रितः काष्ठं वा यदि वाश्मानमुपाधाय
स्वपिष्यति ।२५। उत्थास्यति च मेदिन्याः कृपणः पांसुकुण्ठितः विनिःश्वसन्प्रस्रवणे करेणूनामि
वर्षभः ।२६। द्रक्ष्यन्ति पुरुषा नूनं दीर्घबाहुं वनेचराः। राममुत्थाय गच्छन्तं लोकनाथमनाथवत्
।२७। श्यामावदातं कमलायताक्षं चन्द्राननं मन्मथरूपतुल्यं। पृथ्वंसकं महाबाहुं शार्दूलसमगामिनं। सिंहोरस्कं
वृषस्कन्धं चीवरं कृष्णाजिनाम्बरं। यद्रष्टुं या देवलोका संप्राप्तमिव वासवं ।२९। सकामो भव कै
केयि विधवा राज्यमाप्स्यसि। नह्यहं तं नरव्याघ्रं जीवितुमुत्सहे ।३०। इत्येवं विलपन्राजा
जनौघेनाभिसंवृतः। अपस्नात इवारिष्टः प्रविवेश पुरोत्तमां ।३१। शून्यं चत्वर वेश्मान्तं संवृतापण

ग्रादेवता । ज्ञनैर्दुःखागमल्लांनेनान्धकीर्णमहापथं ॥ नांसपश्यन्मुदीनाज्ञाराममेवानुचिंतयत्
विलपन्प्राविशद्दीनाग्रहंसूर्यमिवाम्बुदं ॥२३॥ कौसल्यायागृहंशीघ्रंराममातुर्नयंतुमां । इति
ब्रुवंतंराजानमनयन्द्वारदर्शिनः ॥२४॥ तत्रचास्यप्रविष्टस्यकौसल्यायानिवेशने । अधिरु
ह्यापिशयनेबभूवलुलितंमनः ॥२५॥ सतत्कुक्षकंहृदमिवस्तुयाग्निहतोरगं । रामेणरहितंवेश्मवैदे
ह्यालक्ष्मणेनच ॥२६॥ नत्वद्दृष्ट्वामहाराजोभुजावुद्यम्यदुःखितः । उच्चैःस्वरेणचुक्रोशहाराघव
जहासिमां ॥२७॥ सुखिताःविलतकालेजीविष्यंतिनरोत्तमाः । परिष्वजंतोयेरामंद्रक्ष्यंतिपुन
रागतं ॥२८॥ अथरात्र्यांप्रपन्नायांकालरात्र्यामिवात्मनः । अर्धरात्रेदशरथःकौसल्यामिदमब्रवी
त् ॥२९॥ त्वंनपश्यामिकौसल्येसाधुमांपाणिनास्पृश । रामेमेनुगतादृष्टिरद्यापिननिवर्तते ३
। तंराममेवानुविचिंतयानंसमीक्ष्यदेवीशयनेनरेन्द्रं । उपोपविश्याधिकमार्तरूपाविनिः
श्वसंतीविललापकृच्छ्रात् ॥ ३१ ॥ इत्यार्षेरामायणेअयोध्याकांडेदशरथविलापोनाम
सर्गः ॥ ततःसमीक्ष्यशयनेसन्नंशोकेनपार्थिवं । कौसल्यापुत्रशोकार्तातमुवाचमहीपतिं ।

रामा॰ अयो॰ को॰ ५॰

राम ५॰

राघवे नृपशार्दूलविषं मुक्त्वाद्विजिद्भवान्। विकरिष्यंति कैकेयीस्कुषं श्राक्षं मनोरथा। १ विवा
स्यरामे स्तु भगा। लब्धकामा भामनस्विनी। रामदिष्यानि मंक्षुयल्लकाला हि विवक्षे प्रमति। ३। असिं
स्तुनगरे राम: शरैर्मदोशा द्रुहेवसत्। कामकारोवरं दातुमपि दासे ममात्मजं। ४। पतितंगमहु
कैकेय्यासत्यानादिष्टा हायेक्षत। प्रदिष्टोरक्षमो नागा: पार्वणीवाहिता गिना। ५। गजराजगतिर्
वीरो महाबाहुर्महाधनु: प्रदिष्टोरदमानागा: पर्वणीवाहिता गिनो। ६। विशालाक्षमरण्यसहवसे
सभार्योलक्ष्मणान्वित:। कले ष्टुष्टुष्टु वानां कैकेय्याववनान्वया। ७। त्यक्ता नावनवासाय
कान्ववस्थां भविष्यति। नेमो महीनारत्नक: फलवृक्षैविवासिता। ८। वकवेत्स्यंतिस्म
णामम वृत्तांस्तु सर्वोचिता। अपीदानीं सकाल: स्यान्ममशोकापहारक:। ९। सभार्यंसाहितं भ्राता
पश्येयामिह यास्तु तं। कदावोध्यां महाबाहु: पुरीं राम: प्रवेक्ष्यति। १०। पुरस्कृत्यध्वसेनांपो
सोमीमिव वद्रहा। अन्वैवोपास्थिता रामं कदावोध्याभविष्यति। ११। यशस्विनीहृष्टजनापता
का ध्वजमालिनी। कदा प्रेक्ष्य नरव्याघ्रमरण्यात्पुनरागतं। १२। नंदिष्यंति पुरो रम्या समुद्रद्द

वपर्वणि। कदा प्राणिसहस्राणि राघवौ धनरागतौ ॥ २४ लाजैरवकरिष्यंति प्रविशंतावरिंद
मौ। कदा परिणतो बुद्ध्या वयसा चामरप्रभः ॥ २५ समुपैष्यति धर्मज्ञः सवत्स इव मातरं। कदा
सुमनसः कन्या द्विजातीश्च फलानि च ॥ २६ प्रविशंतौ पुरीं हृष्टाः करिष्यंति प्रदक्षिणं। प्रविश
तौ कदायोध्यां द्रक्ष्यामि शुभलक्षणौ ॥ २७ रथाभरणावीरौ निस्त्रिंशवरधारिणौ। आश
सितानि देवेभ्यः कदा तं प्रतिमानदं ॥ २८ नामे हृष्ट्वा प्रदास्यामि देवतानां पः प्रहर्षिता। निःसंश
यमहं मन्ये मया पूर्वं कदर्यया ॥ २९ यात्तु कामे सुवत्सेषु मातृणां वा विनाकृताः साहं गौरिव
वत्सेन विवत्सा विह्वलीकृता ॥ १ कैकेय्या पुरुषव्याघ्र बालवत्सेव गौर्बलात्। न मह्यं सज्जुणौ
युक्तं सर्वशास्त्रविशारद ॥ २१ एकपुत्रा विना पुत्रं जीवितुं नोत्सहे चिरं। न हि मे जीवितुं कोचि
त्सामर्थ्यमिह विद्यते ॥ २२ अपश्यंत्याः प्रियं पुत्रं महाबाहुं महाबलं। ॥ अयं हि मातापय
ने स्तु दारुणस्तनूजशोकप्रभवो हुताशनः। महीमिमां रश्मिभिकत्तमप्रभो यथा निदाघे
भगवान्दिवाकरः ॥ २३ ॥ इत्यार्षे रामायणे अयोध्याकांडे कौसल्याविलापो नाम सर्गः

अनुरक्ता महात्मानं रामं सत्यपराक्रमं । अनुजग्मुः प्रयांतं तं वनवासाय मानवाः २४ नि
वर्त्यमानाः सुहृदंशस्तु सुहृद्वर्गेण राघवान् । न स्मते विनिवर्त्तन्ते रामस्यानुगता रथं २५ अयोध्या
निलयानां हि पुरुषाणां महागदाः । बभूव गुणसंपन्नः पूर्णचंद्र इव प्रियः २६ स याच्यमा
नः काकुत्स्थः स्वाभिः श्लाघाभिर्वशी । कुर्वाणः पितरं सत्यं वनमेवान्वपद्यत २७ अवेक्ष्य
माणः सस्नेहं चक्षुषा प्रपिबन्निव । उवाच रामो धर्मात्मा ताः प्रजाः स्वा निवर्त्तयन् २८ याः प्रीतिर्ब
हुमानश्च अयोध्यानिवासिनः । मत्प्रियार्थमशेषेण भरते सा निवेश्यतां २९ स हि कल्या
णचारित्रः कैकेय्यानंदवर्धनः करिष्यति यथावद्वः प्रियाणि च हितानि च ३० ज्ञानविज्ञान
विनयैर्वृद्धः शीलगुणान्वितः अनुरूपः स वो भर्ता करिष्यति सुखावहः ३१ स हि राजगुणै
र्युक्तो युवराजः समाहितः विनीतश्च सदायं ते कर्त्तव्यं तस्य शासनं ३२ ज्ञानवृद्धो वयो
वृद्धो मृदुर्वीरो गुणान्वितः प्रियंकरः प्रियवादी च नित्यं बंधुजनप्रियः ३३ संनप्याते यथा मो
नवनवासं गते मयि । महाराजस्तथा कार्यो मम प्रियचिकीर्षुभिः ३४ यथा यथा दाशरथि

धर्ममेवानुकीर्तयन् । नष्टात्त्वयाप्रशान्तयोरामभेवान्वकांक्षिते ॥ ३५ वाग्येणपिहितोवीरोरामःसौ
मित्रिणासह । आचकर्षगुणैर्बद्धापौरजानपदंजनं ३६ अथद्विजातयःशी · ष्टेनशत्रुगुणान्विताः
तपसाज्ञानविज्ञानात्मानोवयसाचमहौजसः ३७ वचःप्रकंपशिरसोदूरादूचुरिदंवचः वहन्तेजव
नाराममंभोभोजवात्पात्तुरंगमाः ३८ नगंतव्यंनिवर्तध्वंहितानाम्रततमर्त्तरि । कर्णवन्तिहिभूतानि
विशेषेणतुरंगमाः उपवाह्योहिमर्त्तानापवाह्यात्वराघव । एवमार्तप्रलापानांवृद्धानांप्राणिनां
निशम्यसः अवेक्ष्यसहसारामोरथादवततारह । पद्भ्यामेवजगामाशुससीतःसहलक्ष्मणः
सन्निकृष्टपदन्यासोरामोवनपरायणः । द्विजातीन्हिपदातीन्स्ताग्रामश्चारित्रभूषणः । नचाशा
कायणोश्चक्षुः परित्यक्तुंरथेनसः । गच्छन्तमेवतंदृष्ट्वावनेसंभ्रांतमानसः । ऊचुःपरमसंतप्ता
राममवाक्यमिदंद्विजाः । अयंब्राह्मणसंघस्त्वभवंतमनुगच्छति । द्विजस्कंधाधिरूढस्त्वामग्नयो
प्यनुयांतिहि । वाजि सप्तुच्चानिछत्राणयेनानियास्यतः शरत्सोत्तुप्रयांतिन्वंहंसानामि
वपंक्तयः अन्त्ववाससानपत्यस्यरश्मिसंतापितस्यते । पत्रिकायाकरिष्यामःस्वैश्छत्रैर्वाज

राम
अयोध्या
६२
८२

राम
६२
८२

पेयकैः याहितःसततंबुद्धिर्वेदमंत्रानुसारिणी। हृदयेष्ववतिष्ठंतिवेदायेनःपुरंधनम्।
तेयास्यंतिवनंतद्वत्त्वद्रामकुबलमाश्रितः नपुनर्निश्चयःकार्यस्त्वद्गतौकृतनिश्चितावयं। वासि
ष्यंतितत्रगेहेष्ववदाराश्चारित्ररक्षिताः त्वयिधर्मव्यपेक्षेणनस्थास्यंधर्ममवेक्षितं। यादिधर्मनजाना
मिष्वजानांतवक्षणेऽहवं। ब्रह्मणानांमाननीयस्तेप्रजानांहितकाम्यया। यास्मिंनास्तिनिवर्त्तेव
हंसशुक्लाशिरोरुहैः शिरोभिर्विनयाचात्महीपतनपांसुलैः बहूनांवितताद्यज्ञाद्विजानांय
इहागताः तेषांसमाप्तिरायत्तातववत्सनिबंधने। भक्तिमंतिहिभूतानिजंगमाजंगमानिच।
याचंतेत्वांप्रशास्तानिकर्मणांतेषुप्रमोहितं। याचमानेषुतेषुत्वंभक्तिंनतोतुदर्शय। भक्ता
नांह्मिपरित्यागस्त्वैवववविदितोदाथा। अनुगंतुंनशक्ताहिमूलैरुद्धीनिवंधनैः ऊर्ध्वबा
ह्वाःसकरुणंविक्रोशंतीवपादपाः निश्चेष्टाहारसंचाराद्वृक्षैकस्थेषुदिप्तिमाः त्वंपक्षिणो
पियाचंतेसर्वभूतानुकंपितं। एवंविक्रोशतामेवद्विजानांतान्न्यवर्तत। लक्ष्मीमिवयथाम
मोवागमीसौमित्रिणासह। गच्छन्नेवाथसहसाराघवोधर्मवत्सलः ददर्शतमसांतत्रवा

वारयंतीमिवश्रुतः ॥ इत्यार्षेरामायणेयोध्याकांडेब्राह्मणवाक्यंनामसर्गः ॥ ततःसमव
स्तानीरेवासमाश्रित्यराघवः सीतामुद्दिश्यसौमित्रिमिदंवचनमब्रवीत् । यथ्यमेवानिशासौ
म्यसौमित्रेसस्तुपस्थिता । वनवासस्यतन्मद्रंतेनोत्कण्ठितुमिहार्हसि । पश्यशून्यांतरण्यानि
इंतीवसमंततः यथानिलयसंलीनैर्हीनानिमृगपक्षिभिः ॥ अयोध्यानगरीशून्याराजधा
नीपितुर्मम । सबालवृद्धानिर्यानानस्माच्छोचतिलक्ष्मण । भरतःखलुधर्मात्मापितरं
मातरंचमे, धर्मकामार्थसहितैर्वाक्यैराश्वासयिष्यति । भरतस्यानृशंसत्वंसंचिंत्याहंपुनः
पुनः नानुशोचामिपितरंमातरंचापिलक्ष्मण । त्वयाव्यातंनरव्याघ्रमामनुव्रजताकृतं ।
ईक्षितव्याहिवैदेह्यारक्षणार्थंसहायता । अद्भिरेवहिसौमित्रेवत्साम्योद्यनिशामिमां
पतझिरावनेमत्स्नंबन्येपिविविधेसति । एवमुक्त्वातुसौमित्रिंस्तुमंत्रमपिराघवः अप्र

मत्तस्त्वमश्वेषुभवस्वेत्यभ्युवाचह । सोश्वांस्तुसुमंत्रःसंयम्यपर्यस्तंप्रत्युपस्थितः प्रभूते
वयसंदत्ताबहुसवपत्यनंतरः उपास्यतुदिवांसंध्यांदृष्ट्वारात्रिमुपस्थितां रामस्यशय्यां

संचक्रे ततः सौमित्रिणा सह। तां शय्यां तमसातीरे वृक्षपर्णैः कृतां तदा। रामः सौमित्रिसार्धं
त्र्यः सभार्यः संविवेश ह। प्रक्षालयामास तदा पादौ रामस्य लक्ष्मणः स्वयं सलिलमा
दाय सीतायाश्चाप्यनंतरं। सभार्यं संप्रसुप्तं तं भ्रातरं वीक्ष्य लक्ष्मणः कथयामास सू
ताय रामस्य विविधान्गुणान्। गोकुलाकुलतां नीतं तमसातीरमास्थितः आवसत्तत्र
तां रात्रिं रामः प्रकृतिभिः सह। जाग्रतो रेव सा रात्रिः सारथेर्लक्ष्मणस्य च। जग[illegible]तम
सातीरे रामस्य ब्रुवतो गुणान्। उत्थाय चिररात्रे स प्रजाः सुप्ता निशाम्य च। अब्रवीद्भ्रातरं
रामो लक्ष्मणः शुभलक्षणं। अस्मद्व्यपेक्षया तात निर्व्यपेक्षान्पुरेष्विमान्। वृक्षमूलेषु
संसुप्तान्पश्य पौरान्गृहेष्विव। यथैते निश्चिताः सर्वे यतन्ते संनिवर्त्तने। अपि देहमत्यक्ष्य
न्त्यजिष्यंति निश्चयं। यावदेव तु संसुप्तास्तावदेव वयं लघु। रथमारुह्य गच्छामः पंथानं
न तपोवनं। एवमेते विमोक्ष्यंति भक्तिमस्मद्व्यपेक्षणे। अतोन्यथा हि कृतेस्माभिर्न त्वमोक्ष्य
ति निश्चयं। तावद्भूयोपि नेदानीमिक्ष्वाकुपुरवासिनः स्वपेयुर्वनुरक्ता मे वृक्षमूलानुपाश्रिताः

पौराह्यात्मकृताद्दुःखाद्विप्रमोच्यानराधिपः नतुखल्वात्मनायोज्यादुःखेनपुरवासिनः।अब्रवील्
लक्ष्मणंरामःसाक्षाद्धर्ममिवस्थितं।रोचतेमेमहाप्राज्ञक्षिप्रमाकुलतामिति। ततस्तूर्ण
तस्सूतिनःस्यंदनेनहयोत्तमाः।योजयित्वाथरामाय प्राञ्जलिःप्रत्यवेदयत्। मोहनार्थंतु
पौराणांसूतंरामोब्रवीद्वचः उदङ्मुखःप्रयाहित्वंरथमादायसारथे। मुहूर्तंत्वरितंगत्वानि
वर्तयरथंपुनः यथानविदुःपौरास्तथाकुरुसमाहितः रामस्यवचनंश्रुत्वातथाचक्रेस
सारथिः प्रत्यागम्यचरामायस्यंदनंप्रत्यवेदयत् स्यंदनमधिष्ठायराघवःसपरिच्छदः
शीघ्रगामाकुलावर्तांतमसामतरन्नदीं संतीर्यचमहाबाहुःश्रीमाञ्छिवमकंटकं।
प्रपेदेतपसामार्गमभयंभयदर्शिनं॥ प्रबुध्यपौरास्तुततोनिशाक्षयेरथस्यनेमिंददृ
शुर्निवर्तनं। नृपात्मजःसोनुगतःपुरीमितिव्यपेक्षयांतेनगरींपुनर्ययुः॥ इतिश्रीरामा
यणेयोध्याकांडेतमसातीरनिवासोनामसर्गः॥ अनुगम्यनिवृत्तानांरामंनगरवा
सिनां। उद्गतानीवसत्वानिबभूवुर्गतचेतसां। स्वंस्वंनिलयमासाद्यपुत्रदारैःसमागताः

राम
अयो
का
८८

राम
८८

आरण्यानिमुमुचुः सर्वैस्तस्त्वंवाष्पविक्लवा। नसमसोढाम्नान्काश्चित्तदुःखियानोपिबोधवान्।
नथारोञ्चत्ययोध्यायांयथारामविवासने। नरश्रीतांविशत्किंचिन्नचैवकुड्डुद्विजाः। श्रीष्म
नप्रभवन्किंचिन्नचधर्मोऽभ्यवर्त्तत। व्यनदन्वाष्पमुत्सृज्यकेचित्तत्रस्तदुःखिताः। शयनेष्वप
तेष्वन्येनिष्ठं जरश्वपादपाः। इष्टंदृष्ट्वाचनाकृष्यन्विपुलंवाधनागमं। पुत्रंप्रथमजंदृष्ट्वान
नोनाभ्यनंदत। कुलेकुलेकदेत्यश्चन्नर्तंसंरुदमागतं। विन्दन्तिस्मदुःखार्ताबाष्पिस्त्रीत्रोरि
वद्विपं। किंनुतेषांगृहैः कार्यंकिंदारैः किंधनेनवा। प्राणैर्वाप्रमुखैर्वापियोनपश्यंतिराघवं।
सएकः पुरुषोलोकेलक्ष्मणः सहसीतया। योऽनुगच्छतिकाकुत्स्थंराममपरिचरन्वने। आपगाः
हतपुण्याश्चपद्मिन्यश्चवनेषुताः। यासुयास्यतिकाकुत्स्थोविगाह्यसलिलंशुचि। विचित्र
कुसुमापीनामंजरीमधुधारिणः पादपाः पर्वतायस्त्रारमयिष्यंतिराघवं। अकालेचापिमु
ख्यानिमूलानिचफलानिच। दर्शयिष्यंतिहृष्टासुगिरीणांवासमागतं। काननंवापिशैलंवा
यंरामोऽतिगमिष्यति। प्रियातिथिमिवप्राप्तंनैनंशक्ष्यंतिचार्चितुं। विचित्रकुसुमैर्हसैर्लंबम

नविधाविभिः विदर्चयंतोविविधान्यान्तूंछुभ्रांछुनिर्कराह। नमायिष्यंतिकाकुस्थामदव्याश्वि
न्नकाननः आपगाश्चतथान्नपाः श्मांडमंतश्चपर्वताः। सहिभूतोसशौत्तायावस्तुमत्यामहा
यशाः धर्मपालश्चल्लोकस्यवीरोदशरथात्मजः यत्रवामाभवद्दत्तोनास्थितत्रपरामवृः। स
हिनाथोस्यजगः संगतिस्मपरायणः। युष्माकंराघवोत्यर्थंयोगक्षेमंकरिष्यति। ऋणंतिम
नुगच्छामोयावद्दूरंनगच्छति। पादच्छायासुखंतस्यसंश्रयाभाक्तोनोमयाः वयंयत्किंचिद्विष्य
मः सीतायाःस्वयंचराघवं। इतिपौरस्त्रियोमहृन्नदुःखेतामारुन्नदाब्रुवन्। युष्माकंराघवोर
क्षेन्योगक्षेमंकरिष्यति। सीतानारीजनस्यास्ययोगक्षेमंकरिष्यति। साहिस्तवामहाबाहु
प्रुन्नोदशरथस्यवै। कोन्वतेनप्रतीयेतवसानोद्विग्नमानसः संप्रीयेनामनोज्ञेनस्त्रकोपि
मन्नेनेनच। कैकेय्यायदिदंराज्यंस्यादधर्म्यमनाथवत् नात्रनोजीवितेनार्थः कुतः पुत्रैः
ऊतोधनैः यः पुत्रंपार्थिवेन्द्रस्यप्रवासयतिनिर्घृणः। इक्ष्वाकुादिमहाराजस्तांराज्येनाभिषि
चितं। नजिज्ञासुचिरंजीवेद्भ्रातापरमदुःखिताः गात्देशरथस्वर्गेभधर्मंप्राप्तिपत्स्यते। यद्यपि

रात्र
याका·
८५

राम
८५

न्नाश्च भर्त्ता चनत्यक्ता वैश्वर्यं कारणात्। नमासंवत्सिंडंशक्ता केकेयीत्कलपासनी। कैके

य्यानवयंराज्ये च्चूतकानिवमेमहि। जीवंन्त्यांसाधुजीवामः पुत्रैरपिशपामहे। नहिप्रव्रा

नेवामेजीविष्यतिमहीपतिः इतिदशरथेव्यक्तं विलापस्तदनंतरं। मिथ्याप्रव्राजितोरा

मः सीतालक्ष्मणएवच। नरनार्यो विसृष्टास्मस्तुद्धायपत्सावोयथा। नेवितेपिवत्तालोड

शीरणुरणः स्तदुर्गतिः राघवंचानुगच्छंतुं प्रणाशंसाधिगच्छतः। विलेपुरेवमार्तः स्याश्चरा

रेनागरस्त्रियः॥ इतिस्मतारामानिमित्तमातिदाययथापितुर्भ्रातरिवाविवासिते। वि

लप्यदीनाऽऽकंदुःस्वदुःखिताः सुनैर्हितासामधिकःसराघवः॥ इत्यार्षेरामायणे

श्रीत्रिकांडे मामक [illegible] ॥ रामोपितिविरोधेनतेनैवमहदंतरं। जगामसुकसव्याद्रु पितुराज्ञा

मनुस्मरन्॥ २ तथैवराज्ञतस्सस्यपञ्चमानाव्रजंतेश्रुता। सपुरस्थाटात्तनः संध्यांतष्ट्वाविर्द्वादि

नेरवो। नंस्यंदनमधिष्ठायप्रतस्थोराघवेनदा। गोमतीमाउत्लावर्ताभतेराद्वेमहानदीं

। नास्तुतीरम्हावहुः श्रीमद्भिवमकंदमं। प्रपेदेतमसामागम्भिनुतपंथिविस्तुतं श्रीमानदु

लक्ष्मीमिक्ष्वाकुपुष्पितानिवनानिच । पश्यन्तेवरथौ शीघ्रैः श्वेतैरेवहयोत्तमैः । श्रुण्वन्वाचोमनु
ष्याणांग्रामसंवासवासिनां । राजानंधिग्दशरथंकामस्यवशवर्त्तिनां । हानृशंसाद्यकैकेयी
पापापापानुबंधिनी । तीक्ष्णासाभिन्नमर्यादाक्रूरेकर्मनिवर्त्तने । यापुत्रमीदृशंराज्ञःप्रवा
सयतिधार्मिकं । अरण्यायमहात्मानंसानुक्रोशंजितेन्द्रियं । एतावाचोमनुष्याणांग्रामपथि
यामेषुराघवः श्रुण्वन्नतिययौवीरःकौसल्यानंदवर्धनः सोमन्तींचाप्यतिक्रम्यराघवः
शीघ्रमैर्हयैः मयूरहंसाभिरुतांततस्मारसरयूंनदीं । सम्महीमनुनाराज्ञादत्वाचेक्ष्वाकवेपु
रा । स्फीतराष्ट्रवृतांरामोवैदेहीमन्वदर्शयत् । सूतइत्येवमाभाष्यसारथिंतमभीक्ष्णशः
मत्तहंसस्वनःश्रीमानुवाचपुरुषर्षभः कदाहंपुनरागम्यसरय्वाःसलिलेशुभे । मृगयांप
र्यटिष्यामिपित्रामात्राचसंगतः इत्येवमभिकांक्ष्यामिमृगयांसरयूतटे । रतिर्ह्येषा
पालोकेराजर्षीगणसेविता । सतमध्वानमिक्ष्वाकुःसर्वमधुरजल्पिकः तंतमर्थमभि
प्रेत्ययौवाक्यमुदीरयन् । गत्वाचदेवसंकाशःशीघ्रंशीघ्रपराक्रमः अथाससादसाया

रा॰ अयो॰ का॰ ८६

राम ८६

ङ्गेश्टंगवेरंपुरंमहत्‌। विगाह्यसत्पूर्वंरम्यांवीरोलक्ष्मणपूर्वजः। अयोध्याभिमुखोरामः प्राञ्ज
लिर्वाक्यमब्रवीत्‌। सोऽश्रुसहृदयः पश्यन्सीतांलक्ष्मणमेवच। आपृच्छामिपुरिश्रेष्ठेकाकुत्स्थ
परिपालिते। देवतामवनानित्वंपालय वसंतिनः। निवृत्तवनवासस्त्वामनृणोजगतीप
तिः पुनर्द्रक्ष्यामिपित्राचमाताचसहसंगतः ततोरुधिरताम्राक्षोभुजमभ्युद्यदक्षिणं। उ
वाचास्रमुखोदीनोरामोजनपदान्वचः अनुक्रोशोदयाचैवयथार्हाभिर्दर्शितोमयि। शिवदुः
खीचपापीचगम्यतामर्थसिद्धये। तेप्रणम्यमहात्मानंकृत्वाचापिप्रदक्षिणं। विवदंतोघना
घोरंन्यवर्त्तंतकचिन्क्वचित्‌। तथाविलपितांतेषामतृप्तानांचराघवः अचक्षुर्विषयंप्रागा
द्यथार्कःक्षणदागमे। ततोधान्यधनोपेतांदानशीलजनाहतां [तथाविलपितांतेषामतृ
प्तानांचराघवः अचक्षुर्विषयेप्रागाद्यथार्कःक्षणदागमे। ततोधान्यधनोपेतान्‌) अकुत
श्चिद्भयांरम्यांचैत्ययूपसमाकीर्णां। उद्यानोपवनोपेतांसंपन्नतरगोरसां। तुष्टपुष्टजनाकी
र्णांगोकुलाकुलसेवितां। रथेनमनुजव्याघ्रः कोसलानत्यवर्त्तत॥ संबद्धानिस्त्रिंशमुद

रत्नत्वचीरोन्नरामंगधरंसुवानं। हृष्टाभिजग्मुर्मुदितानिषादाउहंपुरस्कृत्यसुदृढखरणीः ॥ इत्या
र्षेरामायणेऽयोध्याकांडेशृंगवेरपुरोपगमनेनामसर्गः ॥ तत्रत्रिपथगांगंगांशोभनतोयामशै
वलां। ददर्शराघवःपुण्यांदिव्यांगामृषिसेवितां। पवित्रसलिलस्पर्शांहिमवच्छैलसंभवां।
स्वर्गारोहणनिःश्रेणीमहर्षिगणसेवितां। समुद्रमहिषीमिष्टांसारसक्रौंचनादितां। हंसगृ
ध्रैःपिबद्भिश्चवारणैश्चाभिनादितां। तामूर्मिकलिलावर्त्तामन्ववेक्ष्यसराघवः। सुमंत्रमब्रवी
त्सूतमिहैवाद्यवसामहे। अविदूरेऽयमेनद्याबहुपुष्पप्रवालवान्। सुमहानिंगुदीवृक्षोव
सामात्रैवसारथे। लक्ष्मणश्चसुमंत्रश्चबाढमित्येवराघवं। मेत्वातामिंगुदीवृक्षंसुमंत्रोभिय
यौहयैः रामोभिषायतंवृक्षंरम्यमिक्ष्वाकुनंदनः रथादवतरत्तस्मात्सभीतःसहलक्ष्मणः
सुमंत्रोप्यवतीर्यैवस्नापयित्वातुरयोत्तमान्। वृक्षमूलगतंराममुपतस्थेकृतांजलिः। त
त्रराजानिषादानांरामस्यदयितःसखा। धार्मिकःसत्यसंधश्चगुहोनाममहाबलःसश्रुत्वा
पुरुषव्याघ्रंरामंविषयमागतं। वृद्धैःपरिवृतोमात्यैर्ज्ञातिभिश्चाप्युपागमत्। ततोनिषादा

पतिंदृष्ट्वादूरादवस्थितं । ~~दृष्ट्वैः पतिं~~ सोमात्यैर्ज्ञातिभिश्चाभ्युपागमत् । ततोन्वितं । सहसौमि
त्रिणा । समसमागच्छद्गुहेनसः । तमार्त्तःसंपरिष्वज्यगुहोवचनमब्रवीत् । यथायोध्यातथेदंतेरा
म किंकरवामहे । सशुचीन्यन्नपानानिगुणवन्तिचराघवे । अर्घ्यंचोपानयत्क्षिप्रंवाक्यंचेदमु
वाचह । भक्ष्यंभोज्यंचपेयंचलेह्यंचसमुपस्थितं । शयनानिचमुख्यानिवाजिनां वसंतथा
स्वागतंतेमहाबाहोतवेयंनिखिलामही । वयंप्रेष्याभवान्भर्त्तासाधुराज्यंप्रशाधिनः । आस्ताम
य महाबाहोयथेष्टंरघुनंदन । अर्चितामानिताश्चैवसर्वथाभवतावयं । पद्भ्यामभिगतेचैवस्नेहा
दाद्धायसूर्धनि । भुजाभ्यांसाधुपीनाभ्यांपीडयन्वाक्यमब्रवीत् । दिष्ट्यात्वांगुहपश्यामिह्यरो
गंसहबांधवैः । अपितेकुशलंराष्ट्रेमित्रेषुचधनेषुच । यदिदंभवताकिंचित्प्रीत्यासमुपकल्पितं ।
सर्वंतदनुजानामि नकाल्लोमेप्रतिग्रहे । चतुर्दशसमाः सौम्यवत्स्यंतांपितुराज्ञया । कुशचीरा
जिनधरंफलमूलाशनंचमां । विद्धिप्रणिहितंधर्मेतापसंवनगोचरं । अश्वानांखादनेनार्थी
नाहंमन्येनकेनचित् । एतावताहंभवताभविष्यामिसुपूजितः । एतेहिदयिताराज्ञःपितुर्द

रावयस्य च। एतैः स्तुतजितैर्वैर्मविद्याभ्यह मर्चितः स एव स्तुत्तो रामेण गुहो गहन गोचनः। अश्वा
नां प्रतिमानं च यवसं चैव सोन्वशात्। गुहस्ततेषु वद्वक्र भान्दीयना मिति संत्वरं। ततश्चीनोत्त
रासंगः संध्यामन्वास्य पश्चिमां। जलमेवाददे रामो लक्ष्मणेनाहृतं स्वयं। तस्यात्थमा
यनस्य पादौ प्रक्षाल्य लक्ष्मणः सभार्यस्य ततः पश्चात्तस्थौ वृक्षमुपाश्रितः गुहोपि सहस्व
तेन सौमित्रिमनु जाग्रत। अनुताशन्ततो राममप्रमत्तो धनुर्धरः॥ तथा शयानस्य च तस्य
धीमतो यशस्विनो दाशरथेर्महात्मनः अदृष्टदुःखस्य सुखोचितस्य सा तदा व्यतीयाय सुखे
न शर्वरी॥ इत्यार्षे रामायणे अयोध्याकांडे गुहाश्रमनिवासो नाम सर्गः॥ तं जाग्रतमसं
भ्रांतं भ्रातुरर्थेय मात्मनः। गुहः परमसंतप्तो लक्ष्मणं वाक्यमब्रवीत्। इयं तात सुखा शय्या
त्वदर्थमुपकल्पिता। प्रत्याश्वसिहि सरव्यस्त्वं राजपुत्र निशामिमां। न हि रामात्प्रिय
तरो ममास्ति भुवि कश्चन। ब्रवीम्येतदहं सत्यं वीरसत्येन ते शपे। अस्य प्रसादादाशंसे।
लोकेस्मिन्सु महद्यशः धर्मवाप्तिं च विपुलामर्थसिद्धिं च केवलां। सोहं प्रियसखं रामं शया
नं सह सीतया। रक्षिष्यामि धनुष्पाणिः सर्वतो ज्ञातिभिर्वृतः नमेद्य विदितं किंचिद्वनेस्मि

श्चेतसः सदा। चतुरंगं हि पिच्छिलं स्तु महत्त्वसदाम्यहं। लक्ष्मणस्तामुवाचेदं रुद्यमाणास्स्वयानघ।
अनुनीतावयं सर्वे धर्ममेवानुपश्यत। कथं हि राघवं हृष्टमो शवानेसहसीलदा। शक्यानिष्क्राम
यात्सष्ठं जीवितं वास्तुखानिवा। योनदेवास्तुरैः सर्वैः शोक्यः प्रसहितुं युधि। तं पश्य गुहसंवि
ष्टं त्वमेषु सहस्रायंया। योमाता तातयसाल्लब्धो विविधैश्चापिपिताचितैः। एकोदशरथस्यैषपु
त्रः सद्वत्तालक्ष्मणः अस्मिन्प्रव्रजितेराज्ञानचिरंवर्त्तयिष्यति। विविधामेदिनीहृनं क्षिप्र
मेवगमिष्यति। विनद्यश्चमहानादं श्रमेणचद्युतः स्त्रियः स्वकाइवस्थिताहृनमद्यनाज्ञ्यनि
वेदने। कौसल्याचैवराजाचतथैवजननीमम। नाशमेष्यदिजीवंतिसर्वेत्तेशार्वरीमिमां।
ज्ञोवेदपिहिमेमातामंत्रघ्नस्यान्ववेक्षया। एतद्दुःखंतुकौसल्या विवृत्सानसहिष्यति।
अनुवत्तांजनं कीर्णा शोकदुःखसमन्विता। रामव्यसनसंतप्ता साधुरीविनशिष्यति। चि
रसंकाल्पितं हृनमनवाप्यमनोरथं। रामेराज्यमनिक्षिप्यपितामेविनशिष्यति। सिद्धार्थाः पि
तरं वृद्धंतस्मिन्काले ह्युपस्थिते। प्रेतकार्येषु सर्वेषु संस्करिष्यंति राघव। नस्यचन्द्रनसंस्थानो

स्तुविमतंचनृपथाः। हर्म्यप्रासादसंबद्धांगणिकागणशोभितां। रथाश्वगजसंबाधांतूर्यनाद
निनादितां। सर्वकल्याणसंपन्नां हृष्टपुष्टजनाकुलां। आरामोद्यानसंपन्नां समाजोत्सवशालि
नीं। सुखिनो विचरिष्यंति राजधानीं पितुर्मम। अपि सत्यप्रतिज्ञेन सार्धं कुशलिनो वयं। निवृत्ते
वनवासेस्मिन्नयोध्यां प्रविशेमहि। परिदेवयमानस्य दुःखार्तस्य महात्मनः तिष्ठतो राजपुत्र
स्य शर्वरी सात्यवर्तत। चिंतात्रासात्तु सौमित्रिर्निद्रया परिवर्जितः भयसन्यायेभ्य कांतः स
केत प्रतिलब्धया। रामोपि सह वैदेह्या मार्यया लब्धरूपया। एकस्मिन्संस्तरे सुप्तः पर्णाम
यित्वं निशां। उपादाय वृहन्मूलं पादपस्यायहृकया। न त्वेवास्य प्रसुप्तस्य निद्रा नेत्रे ह्युपा
गत। विप्रलंबस्य नाथस्य दृष्ट्वा गोवनाश्रयः सममेव कृतं यत्तद्धि निद्रां तस्य गह्वरं॥ तथा
तु तस्मिन्व्रजति प्रजाहिते नरेन्द्रपुत्रे गुरुसौहृदात्कुरुः सुमोच वाष्पं व्यथया निपीडितो गज
वरो नीगइवाश्वसन्बली॥ इत्यार्षे रामायणे वाल्मीकीये अयोध्याकांडे लक्ष्मण विलापो
नाम सर्गः॥ ततः प्रभातायां तु शर्वर्यां पृथुवक्षा महाभुजः उवाच रामः सौमित्रिं लक्ष्मणं शु
भलक्षणं। नागच्छन्नोदयकालोयं गता भगवती निशा। असौ सुकृष्णो विहगः कोकिलस्तो

रामा
अयो
का.
८९

राम
८९

वोर्हिरण्गेचैवनिर्घोषः श्रूयतेनदतांवने । स्वामोजाकुर्वीसौम्यशीघ्रंगांभागरंगमां । विज्ञायका
मस्यभर्त्तंसौमित्रिर्मित्रनंदनः । रुक्मसामंव्यस्तंजंपस्तोतिष्टङ्गात्तुवयत्तः व स्त्नातुसमात्तुत्ताकोक
र्णधावर्वनीहृढास्त्र । स्तुश्चनातंसमेत्तोधीक्षिप्रनावस्तुपोक्तिन । तंनिराम्यसमादेवासंनिवृत्यमाणोभ
हावः । रूपोह्मनावंकचिरायुक्षयप्रत्यवेदयत् ततःसप्रांजलिर्हृत्वा गुह्नोवचनमब्रवीत् उपस्थि
तेयंनौदेवभूयः किंकरवाणिते । ततःकलापंसंनह्यखड्गाबद्धाचधन्विनौ । जग्मतुर्येनकेगंगा
सीतयासहराघवौ । राममेवतुधर्मज्ञमभिगम्यविनीतवत् किमहंकरवाणीतिसूतःप्रांजलिर
ब्रवीत् अथाब्रवीद्दाशरथिः सुमंत्रंमंत्रिसत्तमं । सुखशान्त्वेणधर्मज्ञोदक्षिणंदक्षिणेनतु ।ग
छसौम्यनिवर्त्तस्वचक्षतमेतावतामम । पद्भ्यामेवगमिष्यामिसीतायासहितोवनं । आधानंत्वप्य
तुज्ञातमथाज्ञायसमारथिः सुमंत्रः पुरुषव्याघ्रमिदंवचनमब्रवीत् । अत्रविजनोयंलोकेपुरु.
षेणेहकेनचित् नवसभ्रातृभार्यस्यवासःप्राकृतवद्वने । नतन्येब्रह्मचर्योस्तिस्वधीतेवाफल
म्भवि । सोऽयंसवार्निवदोवापिवाचेद्व्यसनमागतं । सहराघववैदेह्या भ्रातृाचवंवनेवसन् गतिसं

शश्वत्प्रसेवी निलोकान्निर्जयन्निव । कथं खलु हि मां वीरयोन्नद्यानित्यसान्त्वितः । कैकेय्या व
शमेष्यामि पापायाः दुःखभागिनः इति ब्रुवन्नात्मसमं सुमंत्रः सारथिस्तदा । दृष्ट्वा वनगतं
रामं रोदन्दुःशिखः शिवतः नतस्तं विगतबाष्पं स्नं तस्पृष्टोदकं शुचिं रामःसुमधुरं वाक्यं पु
नः पुनरुवाच ह । इक्ष्वाकूणां त्वया तुल्यः सुहृदन्यो न विद्यते । यथा दशरथो राजा मां नानु
शोचेत्तथा कुरु । शोकोपहतचेता हि वृद्धश्च जगतीपतिः माद्वियोगात्स्वसंतप्तस्तस्मादेतद्ब्र
वीमि ते । यद्यदाज्ञापयेत्किंचित्स महात्मा महायशाः कैकेय्याः प्रियकामार्थं तत्का
र्यमविशंकया । एतदर्थं हि राज्यानि प्रशंसंति नराधिपः यदेषां सर्वकार्येषु वचो न प्रति
हन्यते । तद्यथा स महाराजो नालीकमधिगच्छति । नचापि चिंतयति मां सुमंत्र कुरु त्वं तथा ।
कृतमद्वचनाज्ञानं तं वसंतं हि वनान्यचिंतं । उपाध्यायांश्च संप्राप्य ब्रूयास्त्वमभिवादनं । कौ
केयीं च सुमित्रां च यश्चान्या पितरं मम । तां चाल्पभाग्यां कौसल्यां यद्दिजीवति मां वि
ना । अदुःखदुःखराजानं हृष्टमार्यं जितेन्द्रियं । ब्रूयास्त्वमभिवाद्यैनं मम हेतोरिदं वचः नावि
षादो न संतापः कर्तव्यो राम कारणात् । लक्ष्मणेवानरव्याघ्रे सीताया वानराधिप ।

अपिवर्षसहस्राणि नानस्य वचनाद्वने । विहरमस्यिनाधर्मे स्वर्गलोकश्चवासरः व्यसनं
हि पितुः पुत्राः कोन्यो व्यपनायिष्यति । अनुवत्स्यादिवास्युत्तं धन्वंतरिविवर्णं । दसनु पुत्रो
नवचंचपितुः कार्यादिनं इतिः आत्मानं पातयेद्वासौढव्यं वा निवर्तिच्छ्रियः । नरकेव्यापते
द्रामोछ्लत्लनंवाङ्गलाशन । नतुकुर्वीतनत्कर्मयेनवाच्यः पितामिथेत् । नैवाहंशोचितव्यस्त्वेन
सीतन्नचलक्ष्मणः अयोध्यायांच्युताः सेतिनिवत्स्यामि महावने । चतुर्दशसुवर्षेषु वर्षे
षुव्यतीतेषु पुनः पुनः लक्ष्मणेनाथसीताच द्रक्ष्यसे पुनरागतान् । एवमुक्त्वा महाराजं कौस
ल्यां मातरं मम । अन्यश्चदेवीसहिताः कैकेयीचपुनः पुनः भूयः सर्वेचमातरः प्रणम्य पादानि
वंदनं । त्वत्तमद्वचनादेवसीतायाः लक्ष्मणस्य च । विज्ञाप्यचमहाराजो भरतं शीघ्रमानय । भा
ज्यैचैवाभिषेक्तव्यः क्षिप्रमेवनरर्षभः अभिषिक्तोचभूतलेयौवराज्यपदेधार्मिके । स्वात्म
संतापजंदुःखं न त्वामभिगमिष्यति । भरतश्चापिवक्तव्यो यथा राजा निवर्तसे । तथामातृ
षुवर्तेथाः सर्वास्वेवाविशेषतः ॥ प्रजास्त्विमां गां भरतस्य मानार्थं तास्सुपुत्राः हृपनेः श्री
नर । संप्रेषितं केकयराजपुत्री महावनं नो विनियोज्य वासरः ॥ इत्यार्षे श्रीरामायणे

ध्याकांडेस्वजनसमादेशोनामसर्गः ॥ एवंसन्दिश्यमानस्यराघवस्यमहात्मनः लक्ष्मणोवरमा
साद्यन्तंतंवचनमब्रवीत् । कैकेयीप्रतिसंरुद्धोनिःश्वसन्भुकुटीमुखः अमर्षेणान्वितायाहृष्ट
पक्षामवलोकयन् । ममापिवचनात्तत्त्वंतन्नाथोभवतानृपः प्रणामंविदसाकृत्वाब
द्धमानान्पुनःपुनः कोनायमपराधेनराघवोधर्मवत्सलः गुणश्रेष्ठोममज्येष्ठोममभ्रात
विवासितः सर्वथाभवताराजन्कैकेयीपरिरक्षिता । त्वयासंचयशोद्धंच सुमहद्दुष्कृतंकृतं
कैकेय्यावचनंश्रुत्वाहृष्टांसारावंमुदाकेण । पक्षिवद्धदयेक्षितः पुत्रःकिंरामततत्वया ।
प्रसादतश्चार्यशीलश्चसर्वभूतप्रियंवदः रामःकिमकरोत्पापंयत्तोयत्त्वयावने ।
पित्रपैनामहंराज्यंप्रतिज्ञांपरिरक्षिता । भयाद्वायादितिदत्तंमे त्वस्वार्थेभवान्प्रभुः नत्नुप्रव
वसेत्पत्नुमपधारंविनास्वतः । स्त्रीविधेयजनयाराजन्गुणवंतंविरोधितः यदपत्येनक
र्तव्यंयशोधर्मंचरक्षता । तदकर्तव्यमप्येतद्राघवेनोपपादितं । पित्रायदपिकर्तव्यंय
शोधर्मंचरक्षता । अनुरूपंवपुस्तंचवान्ववानदृष्टहितं । तदस्मात्त्वयमुत्सृज्यस्नेहवस
ह्यापिवि । शोचितुंनार्हसित्वयंपीन्द्रिवपाकलोभ । त्वद्विधाहिमहात्मानोमहाभागान

रर्घर्माः पतितापैर्नकुज्यंते चिंतं कार्यमनुष्ठितं । लक्ष्मणोप्येवमिसंक्रुद्धं ब्रुवाणं परुषं रुषः
विनिवार्याब्रवीद्रामः सीतं दीनमधोमुखं लक्ष्मणोपि समभिक्रुद्धः सुमंत्रं यदभाषत । मुक्त
धेनत्र संश्राव्यो भवता कस्तु धाधिपः रुद्धः कारणवेदीच मन्ये वासाश्च लोकवादः । महसा
मुक्तपंक्षात्वासंत्यजेदपि जीवितं । सुमंत्र पकयंतस्मान्नव्यक्तव्यो जनाधिपः विधिया
मुजीवा जिनपथ्यां तिमवहिषाः न चास्मात्तुगतं स्नेहं पतत्वान्पृथिवीपतिः । सत्यपाशेन
संबद्धः स्नेहाद्वयेन लुप्यते । कैकेय्या वरदानेन पिता मे तत्र मोहितः भावनेत्यसकापात्तु
त्रमवध्यः सत्यसंश्रितः मुनिवेशाधरः क्रुद्धो लक्ष्मणोयममब्रवीत् श्रुतं किमिव नब्रूयात्पार्थि
हार्श्चेन्चयात्तजनं । सर्वदेवाधिपं वाच्यः श्रिपाहोहपतिस्त्वया । अभिवादनपूर्वं च कौशल्या
उवाच लोह्यसि । नैनमस्संभाव्यते त्वत्तं पिताम्युत्तयदामम । नाद्योपियितांपराधं हि भाविनोर्थ विद्या
हते । इत्यार्षे रामायणे अयोध्याकांडे लक्ष्मणसंदेशो नाम सर्गः ॥ निवर्त्य रामो रामेण
सुमंत्रः शोककर्षितः ततः सर्वं वचनं श्रुत्वा स्नेहात्काकुत्स्थमब्रवीत् । उपचारेणयदीनूर्य

ह्येषि ह्येवं नाकिमानितिमद्भावयंतन्मेत्वंक्षंतुमर्हसि । कथंनुत्वद्विहीनोहंशीतियास्यामितां
पुरीं । नवतातवियोगेनपुत्रशोकातुरामिव । भरामीमिनितवाह्निरमे इष्टुमुत्संतत । त्व
याविहीनंदृष्ट्वातुविदीर्येत्येवसापुरी । दैत्यांहिनगरींगच्छेद्दृष्ट्वाशून्यामिमंरथम् । हतावशे
षस्वसैन्यंहतवीरमिवाहवे । दूरेपिवसंतंत्वांतिन्पसेवाश्रुतःस्थितं । चिंतयंत्येवतावत्स
निराहाराः क्लेशाः प्रजाः । आर्तनादोहियःपौरैर्मुक्तःपूर्वविवासने । रथस्थंमांनिशाम्यै
कंकुर्युःशतशुणंततः । अहंकिंचापिवक्ष्यामिदेवींतवसुतोमया । नीतासौमातुलकु
लंसंतापंत्यजतामिति । असत्यंचेवप्रियंचैवब्रूयामहिवचनंशुके । कथमप्रियमेवाहंब्रू
यांशुकनिदंवचः । ममाशिष्यत्वमापन्ना इक्ष्वाकुकुलवाहिणः । कथंचापित्वयाहीनंरथं
वक्ष्यंतिवाजिनः । यदिमेयाचमानस्यत्यागमेवकारिष्यति । भवथोग्निंप्रवेक्ष्यामित्यक्त
मात्रोत्म्यहंत्वया । भविष्यंतिचनेप्राणितयोविघ्नकराणिच । रथेनप्रतिबाधिष्येतानिस
र्वाणिराघव । त्वत्कृतेनमयाप्राप्तंरथचर्याकृतंसुखं । आशंसेत्वत्कृतेनाहंवनवासा
कृतंसुखवश । प्रसीदेच्छामिचारण्येभवितुंप्रत्यनंतरः । वनेपिप्रयहंवीरनिवसेयंत्व

दाक्षिन्त ः । पारिचर्यां हि नेकन्या शाप्नुयां परमां गतिं । नवप्सुश्रूसए नैस कैकेयि प्रसिवनेवसन् ।
अयोध्यां शक्रलोकं वा सर्वमेव त्यजाम्यहं । न हि भावयपश्वहुं सामर्थ्यायोध्या त्वया विना
राजधानी महेन्द्रस्य यथा दुष्कृतकर्मणा । इमे ये पि हि या वीर यदि ते वनवासिनः परिचर्यां
करिष्यंति प्राप्स्यंति परमां गतिं । वनवासे क्षयं प्राप्ते ममैष हि मनोरथः । यदनेन रथेन
त्वां प्रत्यानयेयं पुनरीमितः चतुर्दशाहि वर्षाणि सहितस्य वने त्वया । वाहनानि यास्यंति तु
ग पक्षविपर्यये । न तावत्सलातिष्ठेत्त भर्त्समतो गतेन पथि । अत्यन्तं तां स्थितां सत्येन मां त्वं प
हुमर्हसि । एवं बहुविधं दीनं याचमानं पुनः पुनः रामो भृत्यानुकंपी कौकुतस्थो इदं वचनमब्र
वीत् जानामि परमां भक्तिं मयि ते भर्तिवत्सल । शृणु चापि यदर्थं त्वां प्रेषयामि पुरीमितः
नगरीं त्वां गतं दृष्ट्वा जननी मे यवीयसी । कैकेयी प्रत्ययं गच्छेदिति रामो वनं गतः । परितु
ष्टा हि सा देवी वनवासं गते मयि । राजानं नानृतिशंकेतं मिथ्यावादीति धार्मिकं । एष मे
परमः कामो यदि त्वं नगरीं वससी । ममैवं हि तेस्पर्धी न स्तुत्रे राज्यमवाप्नुयात् । ममात्रियार्थं

गाहश्च निवर्त्तस्व चपुरीं व्रज। सन्दिष्टश्चापि यानर्थांस्तांस्तान्ब्रूयास्तथा तथा॥ इत्यार्षे रा
मायणेऽयोध्याकांडे सुमंत्रविसर्जनं नाम सर्गः॥ इत्युक्त्वा वचनं सूतं सान्त्वयित्वा पुनः
पुनः गुहं वचनमक्लीबं रामो हेतुमदब्रवीत्। जटाः कृत्वा गमिष्यामि न्यग्रोधक्षीरमानय। सो
क्षिप्रं राजपुत्राय गुहः क्षीरमुपानयत्। लक्ष्मणस्यात्मनश्चैव रामश्चक्रे जटास्ततः वृत्तबा
हू नरश्रेष्ठौ जटामंडलधारिणौ। अशोभेतामृषिसमौ भ्रातरौ रामलक्ष्मणौ। ततो गंगाम
भिमुखः पुण्यां सरितमुत्तमां। राघवः प्रयतो मार्गमास्थितः सह लक्ष्मणः तपसा व्रत
माश्रित्य ततो गुहमुवाच ह। अप्रमादो बले कोशे दुर्गे जनपदे तथा। कार्यस्ते गुह राज्यस्या
सदा रक्षितमंगनम्। ततस्तं समनुज्ञाय गुहमिक्ष्वाकुनंदनः जगाम वनमव्यग्रः सभा
र्यः सह लक्ष्मणः स तु दृष्ट्वा नदीतीरे नावमिक्ष्वाकुनंदनः शीघ्रां तितीर्षुर्गंगायां लक्ष्मणं
वाक्यमब्रवीत्। आरोह त्वं नरव्याघ्र स्थितां नावमिमां शनैः सीतां चारोपयस्व त्वं परिगृह्य
यशस्विनीं। स भ्रातुः शासनं कुर्वन्सर्वमप्रतिकूलवत्। आरोप्य मैथिलीं पूर्वमारुरोह

स्वयंनतः अथाकेवोहनेजस्वीस्वयंलक्ष्मणपूर्वजः ततोनिषादाधिपतिर्गुहोज्ञातीनचोदयत्।
आज्ञायसस्मन्त्रंचसामान्यंचैवतंगुहं। आस्थायनावंकाकुत्स्थश्चोदयामासनाविकान्।
ततस्तैश्चोदितासानौःकर्णधारसमाहता। बाहुवेगप्रतिहतागंगासलिलमध्यगा। मध्यंतु
मनुप्राप्यभागीरथ्यास्तुमध्यमा। वैदेहीप्रांजलिर्भूत्वातांनदीमिदमब्रवीत्। पुत्रोदशरथस्यायं
महाराजस्यधीमतः निर्देशंपालयत्वेषगंगेत्वदभिरक्षितः चतुर्दशहिवर्षाणिप्रत्युष्यकानने
वने। भ्रात्रासहमयाचैवप्रत्यागच्छेत्पुनःपुरीं। ततस्त्वांदेविसुभगेक्षेमेणपुनरागता। यक्ष्येप्र
मुदितागंगेसर्वकामसमृद्धये। त्वंहित्रिपथगादेविब्रह्मलोकान्प्रवर्तसे। भार्याजलधिराजस्य
लोकेस्मिन्संप्रदृश्यसे। सात्वंदेविनमस्यामिप्रशंसामिचशोभने। प्राप्तराज्येनरव्याघ्रेशिवेन
न्यभुनक्त्वया। गवांशतसहस्राणिवस्त्राण्यन्नंचपेशलं। ब्राह्मणेभ्यःप्रदास्यामितवप्रियचि
कीर्षया। तथासंभाषमाणान्तुसीतागंगामनिंदिता। दक्षिणादक्षिणंतीरंक्षिप्रमेवाभ्युपागमत्
पुषितायांततोनाविभ्रातरौरामलक्ष्मणौ। ततस्तौगुहस्ततोनावीक्षन्तोबाष्पविक्लवौ। सावासु
वेगाभिहताबाहुवीर्यप्रचोदिता। निरुद्धसत्रपुत्रौतौपरंपारमुपागमत्। तीरंतुसमनुप्राप्यनौ

यं हित्वा नरर्षभौ। प्रणम्य चक्रतुर्वीरौ गंगायै तु समाहितौ। प्राविशत् ततो रामः सभार्यः सहलक्ष्मणः
सनाथवत्तनाधीमान्वनवासाय निश्चितः अथाब्रवीन्महाबाहुः सुमित्रानंदवर्धनं। अग्रतो गच्छ
सौमित्रे सीता त्वामनुगच्छतु। पृष्ठतोऽनुगमिष्यामि त्वां च सीतां च पालयन्। अद्यैव दुःखं वैदेही व
नवासस्य वेत्स्यति। सिंहव्याघ्रवराहाणां निनादं दुःसहिष्यति। आनायलोकमानीतौ सुम
त्रेयत्रवैदिशि। जग्मतुस्तौ धनुष्पाणी सीतायाः सह तद्वनं। अदर्शनगतौ ज्ञात्वा भ्रातरौ पार्थि
वात्मजौ। गुहः सुमंत्रः सस्नेहन्यवर्तेतां ततः पुनः नानाविहगसंघुष्टं वनं तद्यवगाहतां। सु
पुष्पितायैस्तरुभिर्नानाविटपसंकुलं। सहस्रमथ गत्वा तौ भ्रातरौ रामलक्ष्मणौ। आवशाह
दनाकीर्णं वटमासाद्य तस्थतुः तौ तत्र सुखमासीनौ नातिदूरे न्यपश्यतां। सुदर्शनामिति
ख्यातां पद्मिनीं पद्मसंकुलां। हंसकारंडवाकीर्णं चक्रवाकोपशोभितां। दर्शयामास का
कुत्स्थो वैदेह्यालक्ष्मणस्य च। पश्य लक्ष्मण पद्मिन्या ॥दिव्यतोयामिव
हिन्यां मंदाकिन्यां यथा दिवं। इहैवाद्य निवत्स्यामः पश्यंतां हि मे मैथिली। रम्ये पुष्प्यकी
र्णीतीरे पद्मवासित माकृते। अथ पुष्पकिर्णी शीघ्रमवतीर्य तु लक्ष्मणः पद्मानि समालं

राम
अयो.
का.
५८

राम
५८

लानिसुगंधीनिबहूनिच। उत्पाद्यचनीवासीतायैप्रीत्यर्थंसमुपानयत्। आदायतानिवैदे
हीसपद्माक्षीनिवासमवत्। त्रयस्तेहिविरात्रायसृष्टानालैःप्राणधारणं। ज्ञात्वान्यग्रोधमाश्रि
त्यरात्रौवासमकल्पयन्॥ गुहेनसार्धंतुततःसुमंत्रोरागवर्जितं प्रतनंसमीक्ष्य। अथाश्र
वार्षीद्विनिष्टनष्टाष्टिर्भूमोचवाष्पंव्यथितस्तुनात्मा॥ इत्यार्षेरामायणेऽयोध्याकांडे
गंगावतरणंनामसर्गः॥ तंन्यग्रोधमुपागम्यसंध्यामन्वास्यपश्चिमां। रामोरम
यतांश्रेष्ठःसौमित्रिमिदमब्रवीत्। अद्यनःप्रथमेरात्रिर्निर्गतानामियंपुरात्। गतीना
मिवसुक्तानांस्वजनेनविद्यति। मातेभीर्मांस्तुरवोत्कण्ठरामाव्यथास्वजनंविना। अ
स्मिन्हिविजनेनारण्येनानासत्त्वनिषेविते। अद्यप्रभृतिकर्तव्यंसीतायारक्षणंत्वया। मयाच
सततंकार्यमप्रमत्तेहलक्ष्मण। त्वया नाहन्तुसौमित्रिममर्थंरायनेऽज्ञा। मत्तएवाविद्व
चरावतेचयात्मनः। इत्युक्तोलक्ष्मणस्तुत्वेभ्रातुःशय्यामथात्मनः आस्तपर्णैस्तृणै
श्चैवतस्याधस्ताद्वनस्पतेः तत्रसंविश्यकाकुत्स्थोमहार्हशयनोचितः चक्रेसहकथास्तत्रो
सीतयालक्ष्मणेनच। एवमद्यमहाराजःस्वरवंस्वपितिलक्ष्मण सकामयासेव्यमानः

कैकेय्याःपरितुष्टया ।। राज्यंलब्ध्वान्दशंसाचकैकेयीनंनराधिपं । आगमेभवतेप्राणैःकथं
नश्यापयेदपि । वृद्धोनाथश्चनृपतिर्मयाचैवविनाकृतः नावेक्षतेसकामात्माप्राणांस्त्
स्याववैरोस्थितः इदंव्यसनमालोक्यराज्ञश्चमतिविभ्रमं । कामएवार्थधर्माभ्यांगरीया
निनिसेमतिः कोहिविद्वानपिपुमान्प्रमायाःकृतेत्यजेत् छंदानुवर्तिनंपुत्रंमिष्टंमामिव
लक्ष्मण । सुखीबतसुभार्यश्च कैकेय्याभरतःसुतः मुदितःकोसलानेतान्यभोक्ष्यत्यधिरा
जवत् । सहिसर्वस्यराज्यस्यसुखमेकंभविष्यति । तातेचवयसातीतेमयिचारण्यमाश्रिते । एवं
परित्यज्यधर्मार्थौ काममेवानुवर्तते । संकष्टंमहदाप्नोतिराजादशरथोयथा । मन्येदशर
थांतायममप्रव्राजनायच । अत्यन्नासौम्यकैकेयीराज्यार्थेभरतस्यच । अपिनाभाद्य
कैकेयीसौभाग्यमदमोहिता । नवबाधेतमद्द्वेषात्कौसल्यंमद्विनाकृतां । मंदक्षयाहिणी
नूनंस्तु मित्रांचतपस्विनीं । इदानीमपितस्मात्त्वमयोध्यांगच्छलक्ष्मण । अहमेकोगमिष्या
मिसीतयासहितोवनं । अनाथायास्तुमेमातुर्गतिर्नाथोभवानह । क्षुद्राचापिनृशंसा
चकैकेयीपापनिश्चया । असंशयंममद्वेषात्कौसल्यापीडयिष्यति । ज्ञातिपुत्रवमन्यास्तु

राम
अयोध्या
९८

राम
९८

स्त्रियःपुत्रैर्नियोजिताः जनन्याममसौमित्रेनूनंस्वप्नमिदमागतं।मयाद्यहिचिरंलब्धेनदुःखसं
वर्धितेनच। विप्रोष्युत्क्रान्तकौसल्याफलकालेधिगस्तुमां।मास्मसीमंतिनीकाचिज्जन
येत्पुत्रमीदृशं।सौमित्रेयोहमंबायाजातःशोकायदुःखदः शोचन्यश्चाल्पभाग्यायाद्येनकिंचि
दुपकुर्वता।पुत्रेणकिमपुत्रायामयाकार्यमरिन्दम। अल्पभाग्याहिमेमाताडुःखानामेव
केवलं भागिनीनन्तुसौमित्रेदुःखानामितिमेमतिः एकोप्योहमयोध्यांचपृथिवींचापिल
क्ष्मण। ईप्यामिषुभिःक्रुद्धोनात्रवीर्यमकारणं। अधर्मभयभीतोहंल्लोकवादभयेनच।
नेनलक्ष्मणेनाद्याहमात्मानमभिषेचये। एतद्वान्यच्चविविधंविलप्यबहुदुःखितः अश्रु
पूर्णमुखोरामोनिशायांन्यविशद्भुवि। विलप्योपनतंचैनंशान्तार्चिषमिवानलं।समुद्र
मिवनिर्वेगमितिवाचलक्ष्मणः महासत्त्वेनशोकस्यवशमागन्तुमर्हसि। त्वद्विधाहिन
शोचंतिहेत्वपिव्यसनागमे। इदंदीनेनव्यसनमवगच्छाम्यहंप्रभो। अनुरागेणुयेप्राणा
मन्यंतेस्मुदयागमं।अयोध्यासापुरीव्याकुलासंप्रत्यपिपितृदुःखिता।नराजतेत्वयाहीना
विचंद्ररजनीयथा। नैनदाल्पंचतेराजन्पादिदेपदिवसे। विषादयसिसीतांचमांचैवबु

कषर्षभ । नाहंसीतान्यथादीनानचाहमपिराघव । मुहूर्त्तमपिजीवावोजलान्मत्स्याइवोद्धृतः
नहितातंनशत्रुघ्नंनसुमित्रांपरंतप । अद्याहंद्रष्टुमिच्छामिस्वर्गंचापित्वयाविना ॥ सलक्ष्म

दुर्जिनं

यास्यार्थंवचो । निशम्यरामो हितमेवचात्मनः । शृणुशोकपरित्यक्तलक्ष्मणस्थितोस्मिशो
दिनिराघवंवाब्रवीत् ॥ इत्यार्षेरामायणेअयोध्याकांडेरामविलापोनामसर्गः । तांतुरात्रिंसु
खित्वातेनतस्मिन्न्यग्रोधपादपे । विमलेप्युदितेसूर्येतस्माद्वासात्प्रतस्थिरे । यत्रभागीरथी
युतापायमुनामभिपद्यते । ततस्तांदिशमुद्दिश्यविगाह्यसुमहद्वनं । नेभूमिभागान्विवि
धान्देशांश्चापिमनोरमान् । अदृष्टपूर्वान्पश्यंतोविचित्रोद्भसमाश्रयान् । यंथानंक्षेममा
साद्यप्रययुःसुमनस्विनः । ततोनिवृत्तेदिवसेरामःसौमित्रिमब्रवीत् । प्रयागमभितःप
श्यसौमित्रेधूममुत्थितं । अग्नेर्भगवतःकेतुमन्येसंनिहितोमुनिः । नूनंप्राप्ताःस्मसंयोगंगां
गायमुनयोःशिवं । तथाहिश्रूयतेशब्दोवारिसंघर्षजोमहान् । दारूणीवविशीर्णानिव
नस्थैरुत्कजीविभिः । भरद्वाजाश्रमेचैतेदृश्यंतेविविधाद्रुमाः । तएवंप्राप्तमशोगत्वालंबमा
नेदिवाकरे । भरद्वाजाश्रमंपुण्यमासेदुःश्रमकर्षिताः । तदाश्रमपदंप्राप्यरामःसौमित्रि

राम
अयो०
८६

राम
८६

णासह । तासतान्साधुयस्तत्रान्विवेश ह्मगपक्षिणः । आगत्य चाश्रमद्वारं मुनेर्दर्शनकांक्षया ।
तस्थौ रामः सह श्रीमान्सीतया लक्ष्मणेन च । तौ विदित्वागतौ चापि भ्रातरौ रामलक्ष्मणौ । प्रवेश
यामास मुनिः स्वमाश्रमपदं तदा । कृतासिद्धोग्रमासीनं महात्मानं कृतांजलिः रामः सौमित्रि
णा सार्धं सीतया चाभ्यवादयत् । सुगपक्षिनिभामीनेर्दृष्टो मुनिनिरीक्ष्य च । राममागतमभ्यर्च्य
सौम्य भाषत वै मुनिः । न्यवेदयत चात्मानं तस्मै लक्ष्मणपूर्वजः । पुत्रौ दशरथस्यावां भ्रात
रौ रामलक्ष्मणौ । भार्या मम इयं कल्याणी वैदेही जनकात्मजा । भ्रमात्तु व्रत मानेयं मयोव
नमुपागता । पित्रा प्रव्राज्यमानं मां सौमित्रिश्चानुजः प्रियः । स्वयमन्वगमद्भ्राता वनमेव दृढ
व्रतः । पित्रा नियुक्तो भगवन्प्रवेक्ष्यामि महद्वनं । धर्ममेव चरिष्यामि पत्रमूलफलाशनः । त
स्य तद्वचनं श्रुत्वा राजपुत्रस्य धीमतः । उपानयत धर्मात्मा तामायार्घ्यमुपस्थिततः प्रतिग्र
ह्य च कालज्ञस्थमासनेनोदकेन च । न्यमंत्रयत मूलैश्च फलैश्च फलभोजनं । प्रतिगृह्य तु
तं पूजां मुपविष्टं स राघवम् । सद्वाजो ब्रवीद्वाक्यं धर्मयुक्तमिदं हितं । चिरस्य खलु काकुत्स्थ
पश्यामि त्वामिहागतं । श्रुतं तव मया चेदं विवासनमकारणात् । अवकाशो विविक्तोयं

रमणीयश्च राघव। गंगायमुनयोः पुण्ये संगमेलोकविश्रुतः इहवासमयासार्धंवसत्वंयदि
रोचते ।वनंसाधारणंह्येतत्तपोवननिवासिनां। इत्येवंस्यपसेसार्धंसीतयालक्ष्मणेनच। नमे
ववादिनंरामः कृताञ्जलिरभाषत। वसतोनुगृहीमस्पादिहब्रह्मंस्त्वयासह। इमस्तुविष
योस्माकमभ्याशेनपत्तनावर। सुदर्शमिहपश्यामियोवृणामिहचागमं। अभ्याशेवर्त्तमा
नंमांश्रुत्वाहृतादृष्टस्तवः आगमिष्यंतिवैदेहींमामपिप्रेक्षकाजनाः अनेनकारणेनाह
मिहवासंनरोचये। एकांतेपश्यभगवन्नाश्रमस्थानमुत्तमम्। रमतेयत्रवैदेहीसुखार्हाज
नकात्मजा। वसेयंयत्रवैदेह्यासहितोलक्ष्मणेनच। स्वजनेननपरिज्ञातोनिरुद्वेगःसुखी
मुने। इतिरामवचः श्रुत्वाभरद्वाजोमहामुनिः ध्यात्वामुहूर्तमेकाग्रोराममेवचनमब्रवीत्। इतो
जनमितस्त्वाततगिरिर्यत्रनिवत्स्यसि। महर्षिजनसंजुष्टः सर्वतःसुखदःशिवः गोलांगू
लानिनदितोवानरर्क्षनिषेवितः चित्रकूटइतिख्यातोगंधमादनसंनिभः यावंतिचित्रकू
टस्यनरः शृंगाण्युदीक्षते। तावत्कल्याणमाप्नोतिधर्मेचकुरुतेमनः ऋषयस्तत्रबहवोवि
हृत्यशरदांशतम्। तपसादिवमारूढाः सुहानेकनिषेवणात्। तंविविक्तमहंमन्येवासंतेरघुनं

राम अ० का० ८७

राम ८७

दन। इहवापुरुषव्याघ्रवसत्वाममयासह। सर्वथासंस्पसेगामतस्मिन्नाश्रममंडले। लक्ष्मणेनसह
भ्रात्रावैदेह्यापिचमायया। एवमुक्तानतःकामैर्भरद्वाजोथराघवं। सहभार्यंसहभ्रात्रामहर्षिःप्र
त्यपूजयत् तस्यमुतावतस्तत्रतंमुनिंसमुपागतः जगामरजनीपुण्यपाविचित्राःश्रुएवताह्वयःत
स्यगोत्रावप्नतीतायांसंध्यामन्वास्यसानुजः उपास्यमहर्षितमुवाचवचनंतामुनिः चित्रकूटमितो
गत्वारामस्त्वंसहसीतया। लक्ष्मणेनचविस्त्रब्धंतत्रत्वंविहरिष्यसि। शुचिशीतांबुवाहिन्यामंदा
किन्योपिशोभिते। मन्येहंतत्रतेवासंरम्येस्वादुफलोदके। नत्रकुजरयूथानिमृगयूथानिचाभितः
विचरंतिवनांतेषुतत्रद्रक्ष्यसिराघव॥ दात्यूहकोयष्टिककोकिलस्वनैर्विनादितंतंवसुधाधरंशि
वं। मृगैश्चमत्तैर्बहुभिश्चकुंजरैःसुरम्यमासाद्यतमावसाश्रमं॥ इत्यार्षेरामायणेयोध्याकां
डेभरद्वाजाभिगमनंनामसर्गः॥ तोतत्ररजनीमुष्यमुखमिक्ष्वाकुनंदनौ। अभिवाद्यमहर्षितं
दधतुर्गमनेमनः। प्रभातांरजनींप्रेक्ष्यभरद्वाजोमहामुनिः चित्रकूटस्यपंथानमुपदेष्टुप्रचक्रमे।
राघवत्वमितोदेशापश्चिमावमथान्वब्रहर। नातिदूरेसमासाद्यतेरथायमुनानदीम्। तांत्वेड
पंथाहवतीसाहिनित्यंमहानदी। तस्यातद्याःपरेपारेनातिदूरेमहाद्रुमः सत्यायिसावितःश्रीमा

न्यग्रोधोहरितच्छदः नानासत्त्वगणावासः श्यामइत्यभिविश्रुतः । सीतापितंनमस्कृत्यसमभ्यर्च्य
चपादपं । अस्तियाचेतकल्याणंवरयदभिकांक्षितं । क्रोशमात्रंततोगत्वानीलंदृष्ट्वाथकाननं ।
पलाशबदरीमिश्रंमधुकास्त्ववनायुतं । सपंथाःचित्रकूटस्यगतःसुबहुशोमया । रम्यश्चाश्रम
युक्तश्चवनदावैश्चवर्जितः पंथानमुपदिश्यैवंभरद्वाजोन्यवर्तत । रामेणलक्ष्मणेनापिसीतया
चाभिवंदितः । उपावृत्तेमुनौतस्मिन्रामोलक्ष्मणमब्रवीत् । कृतपुण्योस्मिसौमित्रेमुनिर्यन्नो
नुकंपते । इतितौपुरुषव्याघ्रौकथयंतौयशस्विनौ । सीतामेवाग्रतःकृत्वाकालिंदींजग्मतुस्त
दा । तत्रबद्ध्वोडुपंकाष्ठैर्वेणुभिश्चाचितेजले सीतामारोपयांचक्रेरामस्तत्रस्वयंतदा । परिष्वज्यहृ
दाबालांकंपमानांलतामिव । सीतामारोप्यलक्ष्मणंलक्ष्मणश्चाप्यरोहयत् तेनप्लवे
नाश्मवतीशीघ्रगामूर्मिमालिनी । तीरजैर्गहनावृक्षैःसंतेरतुर्यमुनांनदीं । संतीर्यप्लवमुत्सृज्य
प्रस्थाप्ययमुनांनदीं । शीतद्रुमांसमासेदुःश्याममन्यग्रोधपादपं । अर्चयित्वाचतंसीताया
चतेदंकृताञ्जलिः । चिरंजीवतुमेश्वश्रूश्वशुरःकोसलेश्वरः भर्तामेदेवराश्चैवजीवंतुभरतादि
यः । कौसल्यांचैवजीवंतींपश्येयमितिमैथिली । यथाचैतंनतोभ्येत्य न्यग्रोधसत्ययावा

राम
अयोका
५८

राम
५८

श्चदक्षिणमुपाश्रित्यततस्तेप्रययुस्तदा। क्रोशमात्रंततोगत्वानीलमासाद्यतद्वनं। हत्वातत्रमृगेभक्ष्यं
श्चएवतमुपयुज्यच॥ विहृत्यतस्मिन्बहुपक्षिनादितेवनेयथेष्टंबहुसत्वसेविते। ततोनिवासार्थ
मुपाययुःशिवंशुभंनदीतीरमुपस्थितंक्षमम्॥ ॥इत्यार्षेरामायणेयोध्याकांडेयमुनातीरनिवासः
सर्गः॥ अथरात्रौव्यतीतायांसुप्तवस्तंश्रमालसं। रामस्तूत्थापयामासलक्ष्मणंशनकै
स्तदा॥ स्वनानाशृणुसौमित्रेवल्गुव्याहरतांवने। सप्रतिष्ठामहेभूयोयदिलक्ष्मणमन्यसे। ससुप्तः
समुत्थायभ्रातालक्ष्मणःप्रतिबोधितः। जहौनिद्रांक्लमंचैवतंचैवाध्वपरिश्रमं। ततउत्थायसहितः
स्पृष्ट्वाचसलिलंशुचि। उपास्यचशुभांसंध्यांतत्रैवाभिप्रतस्थिरे। चित्रकूटस्यपंथानमासाद्यरा
ततनिश्चयः तत्रवासंसमुद्दिश्यययुःशीघ्रपराक्रमः अचिरेणसमासाद्यततस्तंचित्रपादपं। चित्र
कूटवनंरामःसीतांवचनमब्रवीत्। पश्यैतान्पुष्पितान्सीतेमालिनीःसरितांप्रति। शिशिरात्यय
दग्धाहिंप्रदीप्तानिवकिंशुकान्। कर्णिकारवनंचापिपश्यमंदाकिनीमनु। दीपितंकचिरैःपु
ष्पैःप्रदीप्तैःकांचनैरिव। पश्यभल्लातकान्बिल्वान्पनसांस्तिन्दुकांस्तथा। फलभारनतांश्चैव
नश्यान्याऽश्मुतपादपान्। शक्ष्यमत्रफलैर्वजीवितुंतत्तुमध्यासे। अहोस्वर्गोपिमाझ्ञाप्राप्ति

न्द्रकारमिमंवयं। पश्यद्रोणप्रमाणानिलंबमानानिलक्ष्मण। चित्राणि चित्रकूटेस्मिन्मधूनिम
धुपैःखगैः। असौकूजतिदात्यूहस्तंशिखीप्रतिकूजति। तंचोपहसतीवायंकूजंश्चजलकुक्कुटः
परपुष्टकृतश्रव्यागायतेऽवकानने। भ्रमराविचरंत्येतेपुष्यमानकलंबनाः। पश्यमंदाकिनी
तीरेरुतैस्तमधुकरैःप्रिये। विमानीवशुभ्राणिशयनानिद्रुमेद्रुमे। शिलातलानिनीलानि
विमलानिशुचिस्मिते। लताद्रुमाश्रितानीहपश्यरम्याणिभामिनि। भालंगसंघनिचितेनाना
विहगनादिते। नानामृगगणाकीर्णेशैलेस्मिन्रम्यकानने। वैदेहिविचरिष्यामःसुखमत्र
वयंप्रिये। इहप्राप्स्यसिवैदेहिमयासहपरांगतिं। अवेक्षमाणाएवंतेरम्यांमंदाकिनीं। चित्र
कूटंसमाजग्मुर्नानार्थसमितद्रुमं। तस्यशैलस्यपादेतुविविक्तेसलिलाप्लुते। आश्रमंचक्र
तुश्चाकश्चानतौरामलक्ष्मणौ। राजमधान्युपाहृत्यदार्थमुपवनान्तरात्। लताविमानबद्धंवै
चक्रतुःसदनंशुभं। वृक्षपर्णैश्चबहुभिश्छादयामासतस्तनः। नेपर्णशालेशाखाथशोद
यामासलक्ष्मणः। शृदोपलेपनंचक्रेवैदेहीतद्गृहमध्यमा। कृत्वाश्रमपदंरामस्ततोलक्ष्म
णमब्रवीत्। मृगमाहृत्यसौमित्रेचकंथ्यपद्यमाचिरं। तेनयक्ष्येमिहक्षामिवकरणोश्रमदेवताः

इत्युक्तो लक्ष्मणेनाथ भ्रात्राहत्वा कृष्णमृगं वने । आहृत्य चानयित्वाग्निं श्रपयामास तं चरुं । तं सुगं
संस्थितं कृत्वा सुहृष्टपकं च लक्ष्मणः उवाच रामं मे रत्यं कृतांजलिरिदं वचः आज्ञया ते मयाहृत्य पक्व
ष कृष्णमृगो वनात् । यष्टुमर्हसि तेन त्वं देवता अभिकांक्षिताः इत्युक्तो राघवः स्नात्वा जप्त्वा च विधिव
नाः पुरनिवासिनः अनिष्टान्येवपश्यामिनिमित्तान्यद्यसर्वशः केनापिचशरीरंमेव्यथतीवहि
सारथे ॥इतिब्रुवन्नेववचोभरतःश्रांतवाहनः विवेशातांपुरींरम्यांद्वास्थैश्चप्रतिपूजितः द्वयेनेको
पहृदयोद्वास्थसंसंपूज्यमनंतरं । सूतमश्वपतेःश्रांतमब्रवीद्रघुराघवः अनानोत्वाहृताःपूर्वंनि
वेशोपृथिवीपते । आकारान्नानहंसर्वान्बाधायपश्यामिसारथे ।भवितंचास्तुपुराणीरव्यंदीनंधा
नपंकरं । भस्त्रीपुमांसंपश्यामि ।जनमुत्कण्ठितंपुरे । इत्येवमुक्त्वाभरतःसूतंतंदीनमानसः
अनिष्टांस्तानयोध्यायांप्रेक्ष्यधीमान्ययोगृहं ॥तांशून्यशृंगाटकवेश्मरथ्यांराजोरणद्वारकवा
टयंत्रां दृष्ट्वापुरींदीनजनानुकीर्णांशोकेनसंपूर्णतराबभूव ॥ बहूनिपश्यन्मनसोऽप्रि
याणियान्यस्यदीनस्यपुरेबभूवुः अवाक्शिरादीनतरोमनस्वीपितुर्महात्मासविवेशवे
श्म ॥ ॥इत्यार्षेरामायणेअयोध्याकांडेभरतागमनंनामसर्गः ॥ ॥अपश्यमानःपितरंस
तत्रपितुरालये । जगामनिष्क्रम्यततोभरतोमातुरंतिकम् । सतत्रगत्वाभरतोमातुःकाम
कमानसः जग्राहाथनतःपादौशिरसापतितोभुवि । तंचसामूर्ध्न्युपाघ्रायपरिष्वज्यचकैकयी ॥

राम
यो॰का॰
१२३

राम
१२३

उपवेश्याथभरतंसंप्रष्टुमुपचक्रमे। प्राप्तोसिकतिभिरेणाद्यमातामहपुरात्सुत। सुखेनाभ्यागतः काच्चि
त्पथिश्रांतपरिश्रमः कच्चित्कुशल्यार्यकस्ते युधाजिन्मातुलस्तथा। सुखवमस्युषितः कच्चित्पुत्रमा
तामहकुले। इतिपृष्टस्तुकैकेय्याभरतोदीनमानसः शशंसमातुःसाक्षिपंगमनागमनक्रमं। अ
द्यमेदिवसाः सप्तनिर्गतस्यगिरिव्रजात्। अंबायाः कुशलीतातोयुधाजिन्मातुलश्चमे। यन्मेप्रीति
धनंरत्नंविदत्तंमातामहेनवै। पथियातस्सर्वंमुक्त्वाद्यपतमोहंशीघ्रमागतः। राज्ञानुप्रेषितैर्दूतैःत्वरया
नत्त्वरान्वितः। नत्रत्वांप्रष्टुमिच्छामितन्मेमाव्याख्यातुमर्हसि। नयथावत्सुरमिदंहृष्टपौरजनंहितंतदु। ह
कस्माद्दीनजनाकीर्णं लक्ष्यतेविगतश्रिति। किंतत्सहानिरानंदं विरतंध्ययनस्वरं। कस्माच्चमां
राजमार्गेजनोनायातिचाग्रतः पितरंचनपश्यामिकेनाद्यभवनेनिजे। किंवाभवेत्ततोस्वायाः
कौसल्यायानिवेशने। वर्जितंशयनीयंमेभर्त्राकेनाद्यहेतुना। अद्रष्टहृष्टोजनश्चायंकेनवाद्य
हितन्मम। अथवाराजाभवद्यत्रास्तेतत्राहंगन्तुमुत्सहे। नहिशर्माधिगच्छामितमहदृष्ट्वानराधिप। इति
ब्रुवाणंभरतंकैकेयीप्रत्यभाषत। निर्लज्जादारुणंवाक्यमप्रियंप्रियसंहितम्। स्वर्गंगतोमहा
राजःपितातेस्वहतेःस्ववेः त्वयिराज्यंविसृज्यैवपुत्रशोकपरिक्षतः इतिश्रुत्वावचोमातुर्भ

रनोदाकरणोत्तरं। पपातसहसाभूमौछिन्नःशालइवद्रुमः सभूमौविनिपत्येदंविललापाकुलेंद्रियः
हाकाहंस्वर्गतोराजाकस्मांवाकेनहेतुना॥ यत्पुरानेनमेपित्राशयानेभात्यपर्लंकृतं। तदेवरहितंतेन
नश्रियाहीनंनराजते। मज्जिहासार्थमापिवायादिनेनिहितंशुभं। प्रसीदास्वचंद्रशोनाहं। रामसेवाग
तोनृपः इत्यातस्वपंपतितंपितुर्दर्शनलालसं। कैकेयीपतितंभूमौवुत्थाप्येदंवचोब्रवीत्। उ
त्तिष्ठत्तनक्षिप्रंनतुशोचितुमर्हसि। त्वद्विधानहिशोचंतिसंतधर्मःपरंतप। पालयित्वामहींस
म्यगिष्ट्वादत्वाचतेपिता। दिष्टांतंसमनुप्राप्तोनत्वंशोचितुमर्हसि। इतऊर्ध्वंनरंस्थानेराजाद
शरथोगतः नसशोच्यस्त्वयापुत्रसत्यधर्मपरायणः। इत्येतद्भरतः श्रुत्वाकैकेय्यादारुणं
वचः जननींपुनरेवेदंसुवाचभृशदुःखितः अभिषेक्ष्यतिरामंनुराजायज्ञंनुयक्ष्यति। इत्याशा
कृतसंकल्पस्तरमाणोहमागतः तदद्याशंसितंसर्वंमममोघमचेतसः पितरोकृतपुण्योहि
कोद्युतंश्रोतुमर्हति। अंबकेनहतोराजाव्याधिनामय्यनागते। धन्योरामोलक्ष्मणश्चाप्युपिता
यात्र्यांसमसर्द्धनिः नूनंमांनपिताहृष्टिः प्राप्तंज्ञानातिवत्सलः उपाजिघ्रेनमांस्नेहात्संपरिष्वज्य
मूर्धनि। कुचपाणिः सुखस्पर्शस्तानस्याशुभलक्षणः येनमांरजसाध्वस्तमभीक्ष्णंपरिमार्जयत्।

योमेमातापितावंधुर्यस्यदासोस्मिधीमतः । तंनाथंमेत्वमाचक्ष्वरामंभ्रातरमग्रजं । यंदृष्ट्वापितृशो
कांतोत्वमेयंनिर्वृतिंपरां । यस्यपादावुपाश्रित्यजीवेयंतंप्रचक्ष्वमे । क्वमेपितृसमोभ्राताज्येष्ठो
धर्मभृतांवरः सर्वमेतद्यथातत्त्वंत्वंसमाख्यातुमर्हसि । इतिपृष्टाथभरतंकैकेयीवाक्यमब्रवीत् ।
राजपुत्रमहासत्त्वशृणुतत्त्वमशेषतः श्रुत्वाचनविषादंत्वंकर्तुमर्हसिमानद । यथापितातेध
र्मात्माप्राणांस्त्यक्त्वादिवंगतः शृणुतेत्वभिधास्यामियच्चोवाचपितामृते । हापुत्ररामेत्युक्त्वा
चहापुत्रलक्ष्मणेतिच । विलप्यैवंसुबहुशःप्राणांस्तत्याजतेपिता । इदंवापश्चिमंवाक्यमुक्त्वान
आदिवंगतः पुत्रशोकाग्निसंतप्तःकालदंडनिपीडितः सिद्धार्थास्तेहिरामंयेपश्यंत्यभ्यागतंव
नात् । निस्तीर्णसमयंसार्धंसीतयालक्ष्मणेनच । श्रुत्वैनद्विसमादांतोद्वितीयाप्रियकाम्यया ।
विषण्णवदनश्चैवभूयःपप्रच्छमातरं । क्वेदानींवर्ततेरामःकिमर्थंवागतोवनं । वैदेह्यासहक
स्माच्चगतोसौलक्ष्मणेनच । इतिपृष्टस्ततस्तेनकैकेयीवाक्यमब्रवीत् । पुनर्वैनंततदुःखंदीनम
प्रियशंकया । चीरवल्कलसंवीतोगतोरामस्ततोवनं । पितुर्नियोगात्सहितोवैदेह्यालक्ष्मणे
नच । मयाचतत्प्रयोजनंयेनरामःप्रव्राजितोवनं । स्वर्गतःपुत्रशोकात्तस्तंचप्रव्राज्यतेपिता । तत्कृत्वा

भवतस्तस्यामात्युः पापविशंकितः स्वावंशशुद्धिमन्विकन्युकुमारब्धवानिदं । कश्चिन्नब्राह्मणोध
वंहतेरामेणधीमता । येनानिर्वासितः श्रीमान्प्राणेभ्योपिप्रियः सुतः कश्चिन्नपरदारान्समभम्रा
नाभ्यपश्यत । येनासौदंडकारण्येपत्तूणाद्देवविवासितः स्त्रीचापल्यात्ततः श्रुत्वाकैकेयीपुनरब्रवीत्
भरतंश्लाघमानेवस्वकर्मारव्यापयंतेदा । श्रुत्वाभाष्टुभमाम्नायाच्चभरतायमहात्मने । शशंससा
यथातत्वंश्रद्धापंडितमानिनी । नब्रह्मस्वंहृतंतेननचकिंचिद्विहिंसितं । नचैवपरदारांस्समनसा
पिप्रधर्षति । शीलवान्धार्मिको विद्वान्विपाप्माविजितेंद्रियः नसकिंचिन्महासत्वः श्रुतवा
न्यापमेवपि । येनधर्मात्मनालोकः कृत्स्नोयमनुरंजितः । राज्याभिषेक्तुकामोवैयौवराज्य
पदेस्वके । ततः श्रुत्वामयाउक्तस्तथाशतमतिर्नृपः त्वदर्थयाचितोराजायौवराज्याभिषेचनं
रामस्यचवनेवासंनववर्षाणिपंचच । तेनानिर्वासितोरामः पित्रातेनगराद्बहिः । सचापिवत्सनाद्दासः
पितृधर्मपरायणः वनंगतः स्तः सार्धंसीतयालक्ष्मणेनच । नत्रपश्यन्प्रियंपुत्रं पितातेधर्मवत्स
लः पुत्रशोकपरोदीनः प्राणांस्त्यक्त्वा दिवंगतः त्वत्प्रियार्थमिदंकर्मकृतमेतद्विगर्हितं । यत्सर्व
गुणासंपन्नोरामः प्रव्राजितोवनं । नद्विषोगात्स्वराजासौ पुत्रशोकाकुलेंद्रियः प्रियान्प्राणान्परित्यज्यवै

नृपराजवरोगतः । गृहाणत्वमिदंराज्यंसफलंकुरुमेश्रुतं । मनोनंदयमित्राणांममचामित्रकर्षण ॥ श्वःपुनश्शी
ष्ट्रं विधिवत्स्वराज्येपविशैर्वसिष्ठप्रमुखैःसमेत्य । सत्कृत्यराजानमनंतरंच आत्मानमस्मिन्नभिषेचयस्व ॥
इत्यार्षेरामायणेवाल्मीकीये अयोध्याकांडे भरतप्रश्नेकैकेयीवाक्यंनामसर्गः ॥ श्रुत्वाथपितरंवृत्तंभ्रा
तरौचविवासितौ । भरतोदुःखसंतप्तोमातरंपुनरब्रवीत् । रामंराष्ट्रात्प्रव्राजयित्वाकैकेय्यनर्थकारिणि
परित्यक्तासिधर्मेणगर्हितेपापनिश्चये । राज्यलोभात्पतिंप्राणैर्वियोज्यचयशस्विनं । गतासिनरकंघो
रंसर्वलोकैर्विगर्हितं । यदित्वंराज्यलोभेनगंतुंनिरयमिच्छसि । पतंत्यानिरयेकस्मादहमप्यनुपाति
तः । हादग्धोस्मिहतश्चैवत्वयामात्रानृशंसया । त्यक्ष्याम्यहमपिप्राणान्मातस्त्वंसुखिनीभव । किंतु
तेपकृतंभर्त्रा किंरामेणमहात्मना । ययोर्हेतुर्विवासस्त्वंत्वयात्तल्पभुयाहितो । नूनंहत्वात्वयापा
श्रा भौवृत्तमहत्पापंचकांक्षिता । रामंराज्यात्प्रव्राजयित्वापतिंप्राणैर्वियोज्यच । मातेस्त्वथंसुभोलोकेम
परोनर्थंघातिनि । कैकेयिनरकंगच्छ भर्तृशापपरिक्षता । हादग्धोनाशितश्चास्मित्वयाहंसात्य
तुव्यया । किंमेराज्येनभोगैर्वादग्धस्याघवासात्वया । विप्रयुक्तस्यमेपित्राभ्रात्रापितृसमेनच । जीवि
तेनापिनार्थोस्मिकश्चिद्राज्येनवैशिरः देवकल्पेनपित्रायद्विहीनोराघवेनच । केनोस्क्षेयंहतनाहं

राज्यंप्राप्तुंभवान्किमाह।भवेद्यपिवाक्किमेराज्यंश्रामिन्नसूर्जितं। नह्यापिनसकामांत्वांकारिष्येमात्ट्ग
धिनि। मान्निमिन्नंपिताप्राणैस्त्वयामेविप्रयोजितः प्रव्राजितोवनंचैवरामोधर्मभृतांवरः अहोपापं
महत्कृधिंन्त्वयामेविनिपातितं। अपापःपापसंकल्पेसर्वथाहहतस्त्वया। श्वलेसातंविनिक्षिप्तंदुःखे
दुःखंनियातितं। त्वयापतिंघातयित्वारामंकृचापितापसं। कुलस्यास्यविनाशायपित्रामेत्वमिहाहृता।
त्वांकालरात्रिंइतिमांयितामेनावबुद्धिमान्। आहृताघोरसंकल्पाराज्ञांत्वाइष्टसुरात्मनः व्याली
घोरविषेवत्वंभर्त्रामेपरिपालिता। अपापःपापसंकल्पासत्यसंधःपितामम। कलयित्वाशि
येःप्राणैःसत्पुत्रेणावियोजितः नष्टेवसमहाभागोलक्ष्मणोभ्रातृवत्सलः प्रव्राजितोवनंरा
ज्यात्पिन्दगौरवयंत्रितः कौसल्याचसुमित्राचपुत्रशोकपरिप्लुते। दुष्करंयदिजीवेतां। त्वयापापेनि
राकृते। नत्वंकेकयराज्ञोसिजातामतिमतांवनाद्। पापवत्त्रांचत्वानेत्वंजाताघोरेणरक्षसा। रा
मेत्वांकिन्तुकल्याणमकल्याणंपन्तुपश्यासि। येनात्वयासाधुवृत्तोरामःप्रव्रजितोवनं। मातरी
वधर्योवृत्तिंरामस्त्वय्यनुवर्त्तते। तस्यप्रव्राजनंपापेकिंपश्यंत्यात्वयाकृतं। पितर्यसाधुकिंमे
त्वंरामेवाहृष्टवत्यासि। येनाकार्यंकृतवती भभत्वमयशास्करं। यदामातावमेज्येष्ठाकौसल्या।

धर्मदर्शिनी। त्वयिदृष्टिंपरांप्राप्याग्निगत्यामिववर्त्तते। अथकस्मात्त्वयानार्येतस्याः सुतः प्रवासितः
त्वयात्मानंदूषयंत्याद्दूषितोहंदुराशया। अदृष्ट्वासमहात्मानमपापंपापनिश्चये। निवर्त्तयिष्यतं
गत्वावनवासादहंस्वयं। विज्ञाप्यबंधुशार्दूलंरामंभ्रातरमग्रजं। वत्स्याम्यहंवनेघोरेनववर्षाणि
पंचच। पितुर्नियोगाद्भ्रातामेरामोराजाभविष्यति। ॥ इत्येवमुक्त्वाभरतोतिरोषाद्विगर्हयित्वाऽ
ननींस्वरवार्हः शोकातुरः सस्वनमुन्ननाद सिंहोयथापर्वतकंदरस्थः ॥ इत्यार्षेरामायणे
[illegible]ध्याकाण्डेकैकेयीविगर्हणंनामसर्गः ॥ ततः सगर्हयित्वातांमातरंभरतस्तदा। दुःखेनमह
ताविष्टः पुनरेवेदमब्रवीत् योषित्स्वभावकैकेयिनिर्हासेनिरपत्रपे। किंतेपराद्धंरामेणभर्त्रावा
पापनिश्चये। एवंक्रूरस्वभावायाः सर्वथैवधिगस्तुते। मातस्त्वयंश्रुभेलोकोमापरः कुलपांस
नि। सर्वलोकप्रियंहत्वाकथंनामनलज्जसे। कथंत्वानयतेभूमिस्त्वामित्वंभर्तृघातिनि। कथं
तेनर्षिकल्पेनममपित्रामहात्मना। तवापराधः ज्ञातोयंसर्वलोकविगर्हितः। कथंत्वापापिना
तेननदग्धासिमहात्मना। देहेप्यदूषितश्चाहंनदग्धः केनहेतुना। प्राणैर्विमोजितोभर्तारामः प्रव्रा
जितोवनं। ममचाप्ययशोभूयिष्ठंपतितंलुब्धयात्वया। तस्मात्पापसमुद्भारतेपश्याम्यसिगर्हिते। लोका

नां पतिव र्तेपि निरयं नमरिष्यसि । मा त्वद्रूपेण सौमित्रे त्वद्वंशे राज्यकामिके । न तेहमभिधातव्यो
निर्घृणे मर्त्तृघातिनि । कौसल्या च सुमित्रा च तथान्या मम मातरः त्वदेकया पापशीलया पीडि
तानि परंतपे । न त्वं केकयराजस्य दुहिता विदितात्मनः राक्षसी कापि राक्षसं त्वं दुहितृत्वमुपा
गता । सर्वलोकप्रियो रामो यस्त्वया पापनिश्चये । प्रव्राजितः पापरता कात्वदन्या भविष्यति । पितृ
वियोगजं दुःखं मह्यं दापादितं त्वया । भर्तृनाशहतं चैव सर्वलोकविगर्हितं । शुद्धस्वभावां सहतं कौस
ल्यां पुत्रलालसां । विवत्सां वत्सलां हत्वा कांस्त्वं लोकान्गमिष्यसि । नाभिजानासि किं दुःखं
मह्यं पुत्रवियोगजं । पुत्रेणैतेन कौसल्या तथा तेविप्रयोजिता । अंगप्रत्यंगजो भाति दुःपुत्रो
हृदयसंभवः तस्माद्धते ख्रियतरः पुत्रान्मातुर्नविद्यते । पुरा किल गवां माता सुरभिः सुर
सस्मृता । शयोपद्रुतो च्चांगो वहमानो महीतले । दृष्ट्वा पुत्रौ करोदांता सीदंती च मुहुर्मुहुः तामि
ड्रोरुदंती दृष्ट्वा धर्मात्मा वैहायसं गतः आकाशेगच्छतस्तस्य स्तुत्या अस्रु बिंदवः शोकोत्था
पतिता गात्रे सूक्ष्मः सुरभिर्गंधयः नेत्रस्रु बिंदुभिः स्पृष्टः समुद्वीक्ष्याथ वासवः सुरानि प्राञ्ज
लिर्वाक्यमभिगम्येदमब्रवीत् कच्चिन्न भयमस्माकं कुतश्चिदनुपश्यसि । यन्निमित्तं सुदुः

खंजातंनोदिदिपिवृद्धिनत्मम। इत्युक्तस्तुभगिस्तेनशक्रेणामिततेजसा। इत्युवाचसुदुःखंतांतुपुरन्दर
मिदंवचः नाहंनैष्ठंवः पश्यामिउत्तस्त्विदमराधिप। आकंहिस्वाकुश्योपुत्रौ शक्रशोचामिदुःखि
तौ। पुत्रौतदग्रविनिर्भिन्नांगौसीदंतौसुबुभुक्षितौ। पुत्रौतदग्रविनिर्भिन्नांगौ। पीड्यमानौलांगलेनका
र्षकेणदुरात्मना। अंगप्रत्यंगसंभूतौनानावेतौहृदयोद्भवौ। दृष्ट्वाविवर्ततेदुःखंनास्तिपुत्रात्मनःप्रि
यः तमब्रवीत्ततःशक्रोदेवानामीश्वरःप्रभुः। शृणुतेहंप्रवक्ष्यामिसुरभेलोकपूजिते। पुराकृ
तयुगेदेविगोभिर्ब्रह्माभियाचितः इक्षेसलोकान्परमान्प्राप्स्यंतुवैःकर्मभिर्निजैः। अब्रवीद्ब्र
ह्माब्रह्मागाः प्रह्वावनताः स्थिताः भूमध्येमानुषेलोकेनयःपापभयापहः। योवःक्रोशेताड
येक्षाचवधोबंधश्चमानुषे। लोकेभविष्यतिनयःशुद्धंपापभयापहं। योदुर्लभंपरिशोतंवा
धितंचापिनिर्दयः वाहयिष्यतितद्वाहंगोघ्नःपापमवाप्स्यति। शक्तंसमर्थंबलिनंसुपुष्टंयो
वाहयिष्यति। ग्रासोपदानसंयुक्तोनसपापमवाप्स्यति। नम्नुद्वेष्वेतेषुप्राणिःकोऽपिमा
नैःकथंचन। तेनाक्षयांस्तुवांल्लोकान्नयसाप्राप्स्यथदुर्लभान्। तस्मादेतत्पुरंदत्तंधात्राकृत
यवांप्रति। तस्मान्मन्युर्नकार्यस्तेश्रुत्वातिष्ठान्तमासक। इत्येवंशोचितंवर्तींगवांमातामुत

प्रिया। यस्याःपुत्रसहस्राणिबहून्यासन्महौजसः एकएवत्वमेवास्याः स्त्वयारामोविवासितः
प्राणेभ्योपिप्रियःसोद्यःकथंजीवेन्नुदुःखिता। यस्मादेवंतुकैकेयिकौसल्यायास्त्वयाकृतं।
दुष्करंकर्मनःशोकदुःखंपुत्रवियोगजं। तस्मात्त्वमपिकैकेयिदुःखंप्राप्स्यसिवाव्ययं। महत्प्रा
प्स्यसिदुर्मेधेनिश्चयंपापमास्थिते। अहंत्वमपिचितिंमातुःकरिष्येपितुरेवच। अस्यचयशसोलो
केकाविष्यामुपमार्जनं। इतिनागइवारण्येसहसाबंधनंगतः निःश्वस्योत्तंसुदुःखार्तंकरोद
नरनरस्तदा॥ संरक्तनेत्रःशिथिलः श्लिष्टाम्बरसंन्यस्तशुभ्राभरणोंबरस्रजः। बभूवभूमौपतितो
नृपात्मजः शचीपतेःकेतुरिवोत्सवोत्क्षये॥ इत्यार्षेरामायणेऽयोध्याकांडेभरतविलापो
नामसर्गः॥ अथतस्यतथावानोतक्रुन्दान्लक्ष्मणानुजः सतमुत्थापयामासशत्रुघ्नोभ्यनंदत।
श्रुत्वाप्रव्राजितंरामंकृष्णामेदितयाततः कैकेय्यादुःखशोकार्तःशत्रुघ्नोथाब्रवीदिदं। विद्वान
यौतिशंसश्चसर्वस्यलहितेरतः स्त्रियानामकथंरामोवनंप्रव्राजितोवशः बलवानस्त्रसंपन्नो
लक्ष्मणोलक्ष्मिवंधनः किंनानिविनिकृतवान्नामंकृत्वापिपितृनिग्रहं। पूर्वमेवसनिग्राह्यो
राजाधर्मार्थदर्शिना। लक्ष्मणेनपितामूढःकामस्यागवशंगतः इत्येवंभाषमाणेतुशत्रुघ्ने

लक्ष्मणानुजे । शाद्वां विभूतदा कुब्जा सर्वाभरणभूषिता । मेखलादामभिश्चित्रैरापिनद्धा कंजरी यथा । समी
क्ष्यैनं ततो द्वास्था भरतः पापकारिणीं । अंतःपुरगां कुब्जां शत्रुघ्नाय न्यवेदयन् । यस्याः कृते गतो रा
मो न्यस्तदेहश्च मे गुरुः । सेयं पापा नृशंसा च तस्याः कुरु यथोचितं । तामभ्याशागतां दृष्ट्वा शत्रुघ्नोऽम
र्षणस्तदा । चकर्ष विनिगृह्यैतां महीं रोषसमन्वितः । टाष्टाहतं महद्दुःखं त्राहि णां सा पितृकल्पथा । नि
मित्तां मंथरामय्यनया मियमस्सादतं । शत्रुघ्नेन तथा कुब्जा कृष्यमाणा महीतले । सहसा विनना
दं नो दृष्ट्वा कुब्जा सुहृज्जनः । क्रुद्धमाज्ञाय शत्रुघ्नं भयं संविग्नमानसः । असंस्पृशंस्तथैवांते कुब्जाः प
रिजनस्तदा । सख्यासामपि संक्रुद्धो निःशेषं न करिष्यति । मानवृशोरां शरणं याच दीनानाथां तबांध
वाः । कौसल्यां शरणं यामः सा हिनोऽद्य परायणं । सचापि रोषताम्राक्षः शत्रुघ्नः शत्रुतापनः । विच
कर्ष भृशं कुब्जां क्रोशंतीं पृथिवीतले । तस्या विकृष्यमाणायां मंथरायास्ततस्ततः । भूषणान्यवकी
र्णानि चित्राणि रुचिराणि च । तस्यास्तैर्भूषणैश्चित्रैर्विनिकीर्णं महीतलं । राजामलगताग्र्य
शारदं गगनं यथा । तामाकृष्य च शत्रुघ्नः कैकेयीं संनिधौ तदा । क्रोधसंरक्तनयनः प्रोवाच
परुषं वचः । यथेदमशुभं कर्म कृतं त्वत्सदृशं वहेत् । असन्त्वं सा तु यकैकेयी कथं त्वां मिष्ठायिष्यामि ॥

यथानावेक्षितःपुत्रोनगराज्ञानात्मनोयशः साध्वाश्यत्यशुभस्यास्य येत्पापफलोदयं ।मूलंनस्व
मनर्थस्य ।कलङ्कस्यकारस्यहि । तस्मात्कुब्जेयहत्वातांनयामिपमसाधनं ।इत्थोपणंमहदुः
खंमद्यरामवियोगजं ।अहंहत्वाविमोक्ष्यामिपापंपापानुसारिणीं । इत्युक्तोन्यरासंक्रुद्धःश
त्रुघ्नोलक्ष्मणानुजः ।विचकर्षबलात्कुब्जांनिश्वसंतींमहीतले ।तैर्वाक्यैःपरुषैस्तेनकैकेयी

श्री

मूरामर्दिता ।शत्रुघ्नभयसंवीता ऽङ्गंशरणमभ्यगात् तत्रेन्द्रप्रमतःक्रुद्धंशत्रुघ्नंवाक्यमब्रवीत्
अवध्याःसर्वभूतानांप्रमदाःक्षम्यतांत्वया ।हन्यामहमिमांपापांकैकेयीस्वयमेवहि ।यदि
मांनधर्मात्मात्यजेत्भ्रांमातृघातिनं ।इत्येतद्वचनंश्रुत्वाशत्रुघ्नोभरतेरितं ।व्यापकदीत्मनोर
धंपरिचिक्षेपमंथरां ।संक्षिप्तासहसोत्थायमंथराभयविह्वला ।कैकेयीमभिगम्यांताय
याचेयाचरणांतदा ॥शत्रुघ्नविक्षेपविमूढसंज्ञांसमीक्ष्यकुब्जांभरतस्यमाता ।शनैस्तदाश्वास
यदांतसंपं [illegible] क्रौंचीयथार्तामिवसारसस्त्री ॥ इत्यार्षेरामायणेऽयोध्याकाण्डेकुब्जाकर्षणं

राम
अयो
१२९

नामसर्गः ॥ गर्हयन्नेवद्धावनंनीदुःखशोकाकुलेंद्रियः भरतोऽविक्ष्यशत्रुघ्नमिदंवचनमब्रवीत् ।

राम
१२९

अनीश्वरोयंपुरुषःसुखदुःखाश्रयोमनः कार्यतेऽत्यवशोह्येनकृतांतःसुखदुःखयोः अहो

कृतांतोबलवान्येनसर्वगुणान्वितः स्वरवार्हस्त्ववचोरामंबलाद्दुःखेनयोजितः । पुत्रशोकपरिद्यू
नाभर्तृव्यसनकर्षिता । कौसल्यामेहिसहितोमयापश्चाद्यदुःखिता । गर्हितंचायशस्यंचकार्यं
मात्राकृतंमम । यदिदंतद्वियपश्यामिकृतांतंशतमेवहि । शत्रुघ्नस्त्वौसुमान्वापिकृतांतबलमोहितः ।
सुविपश्चिदपिशत्रुघ्नवेत्यात्महिताहितं । कृतांतमोहितामाता ममशत्रुघ्नकैकयी । इयंकृतवती
पापंसर्वलोकविगर्हितं । इदंतुमेमहद्दुःखंशत्रुघ्नहृदिवर्तते । किंनुवक्ष्यामिकौसल्यांपुत्रशो
केनगर्हितां । इत्युक्त्वाभरतोवाक्यंशत्रुघ्नसहितस्तदा । रुरोदातस्वरेणोच्चैः कृत्वानिवतद्गृहं ।
ततश्रुत्वानदानादं भरतस्यमहात्मनः ददतस्तस्यकौसल्यः सुमित्रामिदमब्रवीत् । आगतः
क्रूरधर्मिण्याः कैकेय्याभरतःसुतः नमहंद्रष्टुमिच्छामिभरतंदीर्घदर्शिनं । इत्युक्त्वादुःख
संतप्ताकौसल्याकरुणंवचः भरतस्थेनगंद्रष्टुंसुमित्रासहितातदा । सचापिभरतश्रीमा
ञ्शत्रुघ्नःसहितस्तदा । भरतस्येदुःखितांद्रष्टुंकौसल्यांस्वनिवेशने । ततोभरतशत्रुघ्नौकौ
सल्यांप्रेक्ष्यदुःखितौ छिन्नादपिशरणाम्येमोदुःखांतमभिपेततुः तांपरिष्वज्यकौसल्याशत्रु
घ्नभरतावुभौ । परितापेनदुःखेनकरोदन्दुःखादुःखिता । इत्याचचेनंशरणातसुतत्वाप्यभरतंतुमिन॰॰

ं नस्त

…दनीवाक्यमेतत्सा ः कौसल्यापापकर्षादरं। दिष्ट्या ते राज्यकामेन प्राप्तं राज्यमकण्टकं।
कैकेय्या ते स्वयं दत्तं भर्तारमवहन्य हि। प्रव्राज्य चीरवसनं पुत्रं मे न पकारिणं। येन युक्तार्थयो
गेन कैकेयी जननी तव। क्षिप्रं मामपि कैकेयी प्रव्राजयितुमर्हति। यत्र मे दयितः पुत्रो गतो रा
मः स लक्ष्मणः। अथवा स्वयमेवाहं सुमित्रानुचरा वने। आस्यामि यत्र रामोसौ गतः सीता स
हायवान्। कामं वा स्वयमेवं त्वं तत्र मां नय पुत्रक। न पस्तप्यानि यत्रासौ पुत्रो मे तत्र राज्ञया।
इदं त्वं धनरत्नाढ्यं चतुरंगबलान्वितं। पित्रा निसृष्टं कल्याणं राज्यं प्राप्नुहि वांछितं। इति ला
लप्यमानां तां कौसल्यां भरतस्तदा। प्राञ्जलिः प्रयतो वाक्यमिदं वचनमब्रवीत् ॥ इत्यार्षे
रामायणे [illegible] नाम सर्गः ॥ तामेवं ब्रुवतीं दीनां कौसल्यां राममातरं। कृतांज
लिरुवाचेदं भरतो बाष्पगद्गदः। आर्ये कस्मादजानन्तीं गर्हसे मामकल्मषं। विपुलां हि
मम प्रीतिं स्थिरां जानासि राघवे। वेदान्विदितसांगांस्तु ब्राह्मणांश्चाविशेषतः। सत्यसंधः स
तां श्रेष्ठो यस्यार्योनुमते गतः। प्रेष्यां पापीयसीं यातु सूर्यं च प्रति मेहतु। पादेन हन्याद्गां सुप्तां
यस्यार्योनुमते गतः। अक्लिष्टः स्मरस्त्वरातु गामभिप्रा ब्राह्मणमेव च। स नि दातु युकं चैव यस्या

राम
अ॰को
१२॰

श्री
१२॰

योऽनुमनेगतः सखिंमार्यागुरोर्भार्या मनसासोऽभिपद्यतां। जंबुद्वीपमतिः पापीयस्यायोऽनुमनेगतः
। बलिषड्भागमादायराज्ञश्चारक्षतः प्रजाः किल्बिषंसमवाप्नोतियस्यायोऽनुमनेगतः परिपाल
यमानाद्यराज्ञेभृता निपुत्रवत्। तस्मैसदुह्यतोपापीयस्यायोऽनुमनेगतः कारयित्वामहत्कर्म
त्यक्त्वाभृत्यान्निरर्थकं। किल्बिषंसमवाप्नोतियस्यायोऽनुमनेगतः संश्रुत्यचतपस्विभ्योयज्ञे
वराङ्गदक्षिणां। सविप्रलंभात्पापीयस्यायोऽनुमनेगतः। सैहस्त्यश्वरथसंबाधेयुद्धेशस्त्र
समाकुले। मास्मकार्षीत्सतांकर्मयस्यायोऽनुमनेगतः। उद्दिष्टंतुस्वकमार्थंशास्त्रंतत्वेन
धीमतो। सनाशयतुमद्धर्मयस्यायोऽनुमनेगतः हन्येविविदमानेषुपक्षमाश्रित्यजल्पतः
सपापंसमवाप्नोतियस्यायोऽनुमनेगतः। देवतातिथिभृत्यानांमातापित्रोस्तथैवच। स्वयम
श्नात्वदत्त्वैवयस्यायोऽनुमनेगतः नैवशास्त्रानुगावाचप्रयुंजीतकदाचन। सत्यंतुचशतिविधे
नयस्यायोऽनुमनेगतः। आषाढीकार्तिकीमाघीवैशाखीचैवस्तिथिः। अप्रदानवतो
द्याद्। यस्यायोऽनुमनेगतः पापसंहसरंमांसंदृष्ट्वापाप्नं तुनिर्घृणाः शुकंचाप्यवज्ञानात्तुय
स्यायोऽनुमनेगतः पितरंमातरंवृद्धंमाचार्यंब्राह्मणंगुरुं। दुष्टात्मासोवमन्येतयस्यायोऽनुमनेगतः॥

समो लोकान्नमो कीर्तिः साद्भिर्ज्ञहा श्चकर्षणः सच्च श्च यत्तु दुराचारो यस्यार्योनुमते गतः यत्पापं ब्र
ह्महत्यादौ यत्पापं कपिलावधे। तत्पापं समवाप्नोतु यस्यार्योनुमते गतः। विश्वासघातिनां
पापं यत्पापं गुरुघातिनां। गुरोश्चालीकनिर्बंधे तत्पापं प्रतिपद्यतां। उभे संध्ये शयानस्य
यत्पापं परिकल्पितं। तत्पापं समवाप्नोतु यस्यार्योनुमते गतः। अमाधि निनवेपापं यद्वै
वाहनवादिनी। तत्प्राप्नोत्वहत प्रज्ञा यस्यार्योनुमते गतः। ग्रामे वसतु सर्वमासान्स्ववसु
तो जीवपजीवतु। एकाकी मिष्टमश्नातु यस्यार्योनुमते गतः एवमाश्वासयामास भरतो दुः
खकर्षिणा। कौसल्यां शोकसंतप्तां पतिपुत्रविनाकृतां। एवं च शपथान्कृत्वा शपमा
नमकल्मषं। भरतं दुःखसंतप्तं कौसल्याऽनवब्रवीत् शुद्धस्वभावधर्मात्मा नवैमि त्वामकल्मषं।
ईदृशान्शपथान्कुर्वन्प्राणानुपकरणान्मिमे। दृष्ट्यासि रामसहितः पुत्रधर्मानुपालितः सह
रामेण धर्मात्मन्दीर्घमायुरवाप्नुहि। अपि त्वं सह रामेण पश्येयं लक्ष्मणेन च। तीर्णप्रतिज्ञमा
यान्तं गतं पितुरकल्मषं। पूर्वेषां पुण्यकीर्तीनां राजर्षीणां महात्मनां। प्रपुष्कृत्स्वपकीर्तिं च
धर्मं चैवोदितं कुले। चतुर्दश सु वर्षेषु गते ष्वपि निसूदन। रामं सीतां लक्ष्मणं च द्रष्टास्मि पुत्रका

गताव्र । तैलद्रोण्यांशरीरंतेपितुस्तिष्ठतिपुत्रक । त्वदृतेकोमहार्हस्यतत्संस्कारंमिहार्हसि ॥
धर्मेणेमाःप्रजाःपुत्रयथास्वंशासितंकुरु । स्वर्गतेसौम्यधर्मात्माराजातिष्ठत्यथातथाकुरु । पितुर्वि
योगजंदुःखंरामत्यागकृतंतथा । नत्यक्तित्वयाहंपुत्रगुर्वीराजधुरंवह । एवमाश्वास्यमानस्य
भरतस्यमहात्मनः शोकभारसमाक्रांतंबभूवाकुलितंमनः कौसल्यायाविलापितंश्रुत्वाति
करुणाक्षरं । सोहमभ्यागमद्भूयोभरतश्चेष्टाविह्वलः लाल्यमानःपतितोधरण्यांशो
कलालसः सतदांनीतिकारुणोविललापकुलेंद्रियः पितरंभ्रातरंचैवस्मृत्वाभ्रातृज्ञनचे
तसः तस्यलाल्यमानस्यजगामास्तंदिवाकरः श्वसतोदीर्घमुष्णंचदुःखार्तस्यमुहुर्मुहुः
तस्यसावर्षशतवद्व्यापावर्तततशर्वरी । रात्रिक्षयेवीक्ष्यबलंप्रधानान्नैगद्विजातयोमंत्रिग
णाश्चसर्वेनृपालयंतंविविशुःसमेताहीनंमहेन्द्रप्रतिमेनराज्ञा ॥ तमार्तमस्तुप्रतिपूर्ण
नेत्रंशोकेनिमग्नंपतितंधरण्यां । उपाविशन्सान्त्वयितुंसमेताविसंज्ञकल्पंभरतंसमीक्ष्य
॥ इत्यार्षेरामायणेअयोध्याकांडेभरतसंतापोनामसर्गः ॥ संप्राप्तोव्यसनंहृष्ट्रहीनवर्ण
स्वरेंद्रियः भरतोनरशार्दूलःशचीवसमभिप्लुतः पितुश्चमरणाद्दीनोरामःप्रव्राजनेनच ॥

कैकेय्याश्चार्थलुब्धाया धर्मत्यागेन पीडितः। अपश्यंस्तस्य दुःखस्य मगरस्येव संक्षयं। अक्षीणदुःख
वेगाश्च शर्म नैवाध्यगच्छत। पितृपैतामहं राज्यं शाश्वतं स च चिंतयन्। आसीत्परमसंपूर्णः प्राप्यावि
षांमृतामिव। अगाधपारे महति पतितः शोकसागरे। सन्निमित्तं मृते तात राजा रामश्चापि विवासितः।
अपापः पापतां नीतो मात्रा लोभ्यलुब्धया। विहीनश्चंद्रसूर्याभ्यां यथा मे कर्ण राजने। तथा भ्रा
त्रा च पित्रा च शून्यं पुरमिदं मम। अत्यंतसुखसंवृद्धः पित्रा मात्रा च लालितः। कथमेवं विधं दुः
खं प्राप्य जीवामि दुःसहं। पित्रा तेन सहैवाग्निं सहरामेण वा वनं। प्रविशामि विना ताभ्यां नाहि
जीवितमुत्सहे। अहं तस्य यदि रामस्य पादौ नौ शुभलक्षणौ। स व हेत्यं वनस्थस्य तस्य तन्मे राज्यमकंट
कं। शुश्रूषमाणश्चरणौ वन्ये वन्येन जीवितः। अहमार्यस्य वत्स्यामि तस्यार्थे मम जीवितं। रामे
णाहि विना नाहं निष्क्रामो व वत्रिविष्टपे। राज्यं किमु मनुष्याणुमात्मह्यपि तमद्भवं। आर्ये रामस्य पू
र्णेन्दुसदृशं चारुलोचनं। मम शोको सुखं वीक्ष्य न स्यात्पितृवियोगजः। इति श्रुत्वा वचो धर्मसंभृ
तस्य महात्मनः। अमात्या बंधुवर्गाश्च दुःखादश्रूण्यपवर्तयन्। तमवाग्शिरसं दीनं धरण्यां प्रुद्य
राघवं। विलपंतमुवाचेदं वसिष्ठो भगवानृषिः। आपत्सु ह्येव धृतिमान्यः समावधृतिपद्यते॥

राम
आ॰का॰
२३२

राम
२३२

कार्मण्यप्यवश्यकार्याण्येतमाहुः पंडितं बुधाः सत्वं धैर्यं समाश्रित्य विहायहृदयज्वरं ॥ कर्तुमर्हस्य
संमूढक्रियाः पितुर्वंनतराः पित्रा ते पुत्रशोकार्तो रामे प्रव्रजिते वने । त्वय्यनागच्छति शरणानि
ष्टांस्त्यक्त्वा दिवंगतः अनाथ इव धर्मात्मा लोकनाथः पिता तव । निर्हार्यः सकथं नाम सूतस्त्वान
घेयाविना । इत्यस्माभिर्विचार्यैतन्नेत्वं द्रोणपां संस्थापितः तस्य निर्हरणांता न पितुस्त्वं कर्तुमर्हसि ।
परिसान्त्वयमातृस्त्वं साधशोकेमनः क्लिष्टाः अवश्यभाविनो भावा नैव शोच्या भवद्विधाः त्वं बुधै
रागतज्ञानः सत्ववद्भिर्महात्मभिः तस्मात्संगं भयात्मानं मा भूर्भवतवालिशः ॥ काकुत्स्थाबल
वान्कालः शक्यते नातिवर्तितुं ॥ सर्वैः न भाव्यमस्माभिः तन्न शोचितुमर्हति । सूक्ष्मां हि दुःखाभिहतां वि
चेतनां भर्तुर्वियोगेन विवर्णतां गतां ॥ इमां पितुः त्वं महिषीमुपेक्षितुं न राजपुत्रार्हसि नाथतां गतः ॥ त्र
यम्बमः ते पितुरेष योविधिः प्रदर्शितः तत्र हिते द्विजोत्तमैः तमाशु सम्पादय धैर्यमास्थितो विषादमस्मिन्न
नृपात्मजार्हसि ॥ आर्षे रामायणे अयोध्याकांडे वसिष्ठवाक्यं नाम सर्गः ॥ एवमुक्तो वसिष्ठेन भरतो धीमतां
वरः ॥ वसिष्ठमभिवाद्येदमुवाचांतरतो वचः ॥ त्वय्यप्येवं ब्रुवति मे दीर्यतीव मनो मुने । लोकनाथे स्थिते रामे ना

धन्त्वंमयिवीक्ष्य । किंतु तत्र नयध्वंमां यत्र राजा पिता मम । कारिष्येतत्र संस्कारं भवद्भिः सहितो वशः ने
दानींहृदयंचेन्मेस्फुटिष्यतिसहस्रधा । दर्शयंतुभवंतस्त्वं पितरं श्रीराजीविनं । ततो वसिष्ठप्रमुखाः
सर्वेतेनृपमंत्रिणः आनयंस्तं तत्र यत्र राज्ञः कलेवरं । अर्धसप्तशतानां तु स्त्रीणां चिर्यादाजपारि
गृहः महतं पुत्रतः कावायदुद्धर्षं सुतं नृपं । ततः प्रविश्य भरतः महाराजग्रहियहे ददर्शपितरं शोते
तामसातुर्निविज्ञाने । सततं गतास्तु पितरं दुःखेनोपहतस्तथा । हा राजन्निति संकुश्य पपात पृथिवीतले ।
विसंज्ञकाल्पसंज्ञंतु पुनर्लब्धास्तु दुर्मनाः जीवितमिव संप्रेक्ष्य पितरो सोम्यभाषत । राजंस्तु त्विष्टं किं रो
पेमातोऽहमुपागतः वंदाज्याम महास्तवशात्रुघ्नसहितस्त्वच । ममं मातरं मूर्छितान करालत्वाक्ष्य
क्वासि । प्रणम्य शिरसा तदृक्षंकधजिन्मातुल्योमम । यतः कृतं शिक्षितं संश्राश्रमं वा मातेत्यमाश्रय ।
आनतं सुष्णुपात्राय प्रत्यादंदासि त्वमियं । सद्दानीम नुप्रासे किमर्थं नाभिभाषते । ततोऽपदृश्य
श्री
राम
वान्किंचिदहंमात प्रसीदमे । धन्यः सदा भोयेनास्मि प्रहृतान्येवमुधाधिप । लक्ष्मणश्चापि धन्यो
अ॰का
सीयेरामममनुनिर्गतः । अधन्यास्म्यहं पुण्यपश्य धर्मं प्रतिस्तु पुत्रवान् । दुःखेन महतात्विष्टः प्राणाः १४२
१४३
संन्यतावानासि । हन्तंतोन विजानीतो दृष्टुं तेराम लक्ष्मणौ । अथ्याहि वनमस्तुत्वरज्यप्रनागताविः

दुःखितो। मा त्वं दोषाद् ददाति नो यदि तावदहं नृप। शत्रुघ्नमपि तावत्त्वमाभिभाषितुमर्हसि। निर्वास्य
चैनं वसनं रामं लक्ष्मणमेव च। स्त्रीकृतो किं मासि ज्ञानं त्यक्त्वा राजेंद्र दिवंगतः। विलपंतं नृपात्मजं
तु भरतं शोकार्षितं। वसिष्ठो जयंतोऽथ श्रेष्ठो जाबालिश्च द्विजसत्तमः। मा शुचेति राजेन्द्र नैव शोच्यो महीपतिः
आनंदेन धर्मसंमूढः कर्तुमस्य त्वमर्हसि। शोचंते न तु मन्ये हा बांधवाः सुहृदस्तथा। पालयंति गतं स्व
र्गं मन्युपालेन राघव। श्रूयतें हि नरव्याघ्र पुत्रः परम धार्मिकः। अविघ्नेन राजा स्वर्गं राजा पुण्येन कर्मणा।
न तु न बंधुवर्गस्य शोकावाप्तेन राघव। तस्मै वै पतितं तेषु पुण्येषु तु स्वर्गाद्विनिपातितः। तस्माच्छोकं न चैव
पुत्र पितृस्नेहसमुत्थितं। त्यजत्वं नार्हसि स्वर्गान् पुनः श्रावयितुं नृपं। अति शोकाभिनादस्तु पितात
स्वर्गाच्च्युतः। शापेन त्वां मन्युना विज्ञः तस्मात् त्विह मा शुचः। नायं शोच्यस्तव पिता सत्कर्मा राजसत्तमः।
कृ। मृतो नायं स्तु नायस्य पश्चात् तव समरेगमः। धर्मात्मा नो महात्मा नो लोके प्रथित पौरुषः। देवोप
मः सत्त्वं नाम महेंद्रवरुणोपमः। एवमुक्तो वसिष्ठेन भरतो धर्मकोविदः। त्यक्त्वा शोकमिदं वाक्यमु
वाच वदतां वरः। ब्रुवंति यद्भवंतो मां तथा न दिनि भेमतिः। बलवांस्तु पितृस्नेहो मन्मनो मोहयानीव मां।
संतापितो नैव चाहं स्तंभितुं कर्मो हि न वादिभिः। त्यक्त्वा शोकं विधायामि पितृवर्ग्योर्ध्वदैहिकं। आनयांतु

थोद्दिष्टं मवृद्धिर्दिपमंत्रिणः सत्कारायपितुर्मेधसर्वसंभारविस्तरं ॥ इतिनृपतिः सुतस्यजल्पतः सहृदप
मंत्रिभुतोहितैश्चितैः अधिकमिव विहड्यामिनीशामदामेवबहुवत्रावती ॥ इत्यार्षेरामायणे आयो-
ध्याकांडे भरतविलापोनाम सर्गः ॥ ततस्तांरात्र्यांव्यतीतायांभरतंस्तूतमागधाः प्रभातेबोधयिष्यंत
स्तुष्टवुर्मधुरस्वनाः सहस्राचाम्यहन्यंत तथादुंदुभयः पृथक् । शवार्ध्यतस्तुघोषाश्चशंखवेणु
गणाःयथा । ततस्तूर्यघोषः सुमहान्पूरयंनिवतांपुरीं । बोधयामासभरतंशोकव्याकुलचेतसं ।
प्रतिविध्याथभरतस्तंप्रबोधकानिस्वनं । नाहंराजेतितानुक्त्वा । ततः शत्रुघ्नमब्रवीत् । पश्यशत्रुघ्न
कैकेय्याऽवैत्यालोकगर्हितं । अमत्राः पतितंशृद्धिंसमासस्त्वमनागमः उक्तधर्मज्ञानरवाङ्गः पि
तुर्मेतद्विनाहृता । पवित्रसलिलाजश्रीवर्कर्णोद्भावद्विवानसि । इत्येवंभरतंदुविलपंतंमुनः पुनः दृष्ट्वाप
रुरुधुः सर्वादुःखार्त्तानृपयोषितः । भरतेनततः सार्धंवसिष्ठोवेदवित्तमः । प्रविवेशसभांराजस्तदा
मंत्रयितुंनृपं । शातकौंभैः स्तंभशतैर्भरितांचित्रैर्विभूषितां । बृहस्पतिरिवेंद्रेणसुधर्मांसहितोंऽस
भां । तत्रासनेरत्नचितेसव्यस्तरणसंस्तृते । उपाविश्यततः सर्वानानयामाससमंत्रिणः सुमंत्रंजे
मितंचैववामदेवंजयंतथा । मंत्रिणोनेगमाश्चान्यौप्रधानाश्चतथाजनान् । उवाच सुमहातेज

सम्रुपायात्समंततः । समायांमवनंतत्र शत्रुघ्नसहितंतदा । ततोहलहलःशब्दः सुमहान्समजायत । कौ
तूहलाज्जनौघस्यसमंताश्चत्यमिश्रावत । ततो ग्रोध्रमवनंदृष्ट्वासमायांसप्तरोहितं । प्रत्यनंदन्प्रहृष्टास्ते यो
ध्यादशरथंतथा ॥ नृपजनप्रकमंत्रिमिस्तथा मणिकचितासनरत्नभूषिता । दशरथरहितस्तु तत्रोभिनस
भा सदशरथैव राजसा तदा ॥ इत्यार्षे रामायणे अयोध्याकांडे भरतप्रवेशो नामसर्गः ॥ समाहते
जनेतस्मिन्प्रदिनेचदिवाकरे । वसिष्ठस्त्वनुवाचेदं भरतं तंतोस्थमंत्रिणः । एताः प्रकृतयः सर्वा नागराश्च पृथ
क्तः । राजसंस्कारकार्य समादाय समुपस्थिताः । अग्निहोत्रमरो मंत्रिप्रमानुसत्काल्लात्ययः प्रभो । पितुः
अकयथान्याय्यं संस्कारं हरिदक्षिणं । होतारश्चोपितरिमे वेदवेदांगपारगाः । अग्निहोत्रं समुपादाय बा
ल्लिप्रमुखाः स्थिताः । गंधकाष्ठानि चेमानि सेवकार्थं पितुस्तव । उपादायागताः प्रेष्याः प्रतीक्षंतउपा
सते । सर्पिस्तैलंचगंधाश्च सज्जिताश्चापिते पितुः । अग्नेः समिन्धनार्थाय गंधमाल्यं च पुष्कलं । ग
न्धतैलानि गंधाश्च सपाश्चपृदसेवकाः । सज्जिता शिबिका चेयं पितुस्तेरत्नभूषिता । अष्टौ वृद्दिविका
यांत्वां संवेशाय नराधिप । शिबिकागतमुद्दिश्य नयेन बहिर्वाप्रवे । एवमुक्तो वसिष्ठेन भरतः
प्रत्युवाचतत्र । वसिष्ठं वदतां श्रेष्ठं पितुर्बहुमतानुकंप । यथाज्ञापयसि प्राज्ञ करवाणि तथा प्रभु

दैवतंत्वसिनान्यश्चगुरोश्चापितुकर्मम । वाक्येनानेनतस्याथ भरतस्यमहात्मनः आजगामपरंहर्षंएव
सिष्ठोद्विजसत्तमः शोकवेगमसह्यंतु धारयंश्चततस्ततः कल्लेवरंभूमिपतेः समस्तंतद्ददेसत । नाशु
तोऽस्त्वेवशोकस्यवेगंधारयितुंतदा । महानवमथापनतस्तोयवेगमिवोद्धतं । तमानिर्मान्नीयमाने
ततःसविलपन्बहु । शत्रुघ्नसहितःश्रीमान्शिविकामानयन्नृप । शिविकास्थंसमुद्राराजभर्त्तलक्ष्म्य
विधानतः वासमसातुमहार्हेनसमाक्राद्यसुसंवृतं । अवकीर्यचमाल्येनदिव्यधूपेनधूपितं । मधुपुष्पैः
स्तुवभिर्भिःपरिकीर्यचसर्वशः तवानीत्वाश्रिप्याशिविकांशत्रुघ्नसहितस्तदा । हाराजन्क्वगतोसिगतैर्निक
दन्नाँतःपुनःपुनः तस्मिंस्तदाप्रकादितेवसिष्ठकरदेशिताःययुःशीघ्रतरंप्रेष्याकरमुःशोकविह्
लाः दीप्यमानंहुतंशूर्वंजाबालिःप्रमुखैर्द्विजैः अग्निहोत्रंनरपतेःप्रतस्थेतस्यचाग्रतःशकटानिच
पूर्णानिरत्नानांकनकस्यच । दद्धुर्धनंविसर्गार्थंदीनानाथांतरेष्वपिच । सद्यःप्रेक्ष्यजनस्तत्ररत्नानिविविधा
निच । और्ध्वदैहिकदानार्थंनृपतेविसृजंतिवै । अग्रतःप्रययुश्चैनंसत्वकर्मस्तुजितिर्निर्दपं । अग्निहव
नोमधुरंस्तनमागधवंदिनः तस्मिन्निर्हरणेराज्ञःसूताःसुमहास्तदा । आर्त्तनादोभवत्स्त्रीणांयथा
स्यमरणेतदा । तथापी ततःपौरजनःसर्वःसस्त्रीबालकुमारकः अन्वगच्छच्छरीरंतंनिर्यथोत

राम
अ॰का
२३५

राम
२३५

गराद्बहिः तथाभरतशत्रुघ्नौशिबिकांपरिगृह्यतौ । दुःखशोकसमाविष्टौरुदंतावनुजग्मतुः ।कौस
ल्याद्याश्चताःसर्वाराजयोषितस्तथापराः अर्धसंस्रस्तनानार्यःप्रकीर्णासितमूर्धजाः क्रोशंत्यश्चरुदंत्यश्च
ऊर्ध्वबाह्वश्चसर्वशः अनुजग्मुःशरीरंतद्राज्ञोराजीवलोचनाः अथाभ्यंतरतीरेविविक्तेसुकुशाद्वले ।
चंदनागुरुकाष्ठैस्तैःप्रेष्याश्चक्रुश्चितांतथा । कालीयकमृणालैश्चवालकोशीरपद्मकैः । तांचितांवि
धिवद्बद्ध्वाविपुलामत्युग्रतेजसाः । तस्यांचितायांनृपतेःशरीरंतत्सुहृज्जनाः आनयंतस्सुहृद्भिश्च
शोकव्याकुलचेतनाः तांचितांपृथिवीपालमारोप्यक्षौमवाससं । यज्ञपात्रचयंचक्रुर्न्यसंतस्त
स्योपरिद्विजाः यथास्थानेतुविन्यस्यत्रीनग्नीन्विधिवत्तदा । मंत्रानंतन्मनानित्यंजपंतोजुह्वतस्रुवः
स्रोतारोपयज्ञपात्राणिपवित्रैर्मंत्रसंस्तदा । प्रस्तृष्यानेनतंतस्यांचितायांपरिचिक्षिपुः स्वकपात्राणिच
पात्राणिस्रुक्स्रुवोलूखलंतदा । अरणीसहितंचैवयविष्ठाणिचसर्वशः विशस्यचपशुंमेध्यंमंत्र
संस्कारसंस्कृतं । अन्वास्तरणिकंराज्ञःसमंतात्परिचिक्षिपुः शाल्मलीवल्कविरूढान्तुचितांस्तमि
समंततः कृत्वाविधानतोधेनुंसवत्सांसमुपास्थिताः । सर्पिस्तैलवसाभिश्चसमंतात्परिषिच्यतां
चितांप्रज्वलयांचक्रेभरतःसहबंधुभिः धूमज्वालनतोवह्निःमहसेवसमेधितःमहार्चिष्मान्म

हात्राज्ञः चिताग्रदं कलेवरं । विधिवत्संस्कृतं तेन ताजा ब्राह्मणैर्वेदपारगैः जगाम परमं स्थानं यज्वानां पुण्यकर्मणां ॥ ततः प्रज्वाल्य महात्मा मिद्धो हिरण्यरेतः शदहन्महीमः दृष्ट्वा चतं प्रज्वलितं चिताग्निरात्रेस्त्वं च कुरु जीवनार्थ ॥ पौराश्च सर्वे सहसा विलेपुस्तथैव राज्ञः स्त्रियं दुःस्तुतोच । कनाथ काद्य भूमिपते किमर्थं या सिब्वमस्मानवशानिवहाय ॥ इत्यार्षे रामायणे अयोध्याकाण्डे दशरथसंस्कारः सर्गः ॥ ॥ अवकीर्य च माल्येन तां चितामपसव्यतः सगणो भरतश्चक्रे विसर्पीत इव स्त्रवल्लरू । विह्वलत्रिवदुःखेन विभ्रमन्निव चातुरः ततामस पितुः पादौ निपत्य धरणीतले । न मातृ इप पतितं विह्वलं चाप्यचेतसं । उत्थापयामास वलान्यारिष्टत्वस्वहरुज्जेनः अवेक्ष्य स पितुर्दीप्तं सर्वगात्रेषु पावकं । प्रगृह्य बाहू चुक्रोश दुःखेनावसमादच । मंथरावाक्यतो योधं वरदानमहाह्रदं । कैकेयी निश्चययाहमगाधं शोकसागरे । वाष्पोपहतकण्ठश्च स वाष्पमन्निनिःश्वसन् । शोकदुःखपरीतात्मा सदृशीविश्वसन् । विललापातिकरुणं भरतः प्राप्य विह्वलः यस्य गतिरनाथाद्याः पुत्राश्च ज्ञातितो वनं । तामिमां नाथ कौसल्यां किमर्थं नाभिभाषसे । एवमाद्यतिदुःखार्तो विलपन्नथ राघवः भूमौ पपात शक्रस्य यद्वन्त्रच्युत इव ध्वजः परिपेतुः पतंतं तं पुरुषाः परिचारकाः ॥

राम
अ॰ का॰
२३६

श्री
२३६

पुण्यक्षयच्युतं स्वर्गाद्ययातिमिष्टयज्ञयोयथा। शत्रुघ्नश्चापि भरतं पतितं समवीक्ष्य तं। विसंज्ञकल्पो न्य
पतत्क्रोधन्वितमानसः उन्मत्त इव विक्षिप्तश्च विललाप निपत्य सः गुणसंकीर्तनं कुर्वन्नेयन्वैः पितुर्व
शीलः। इदमाह महातेजाः शत्रुघ्नः शत्रुसूदनः सुकुमारं च बालं च सततं लालितं त्वया। इतानगर
न्तं हित्वा विलपन्तं गमिष्यसि। यतः सुताविमौ तस्मान्नभोजनाच्छादनादिभिः संवर्धयसि नः सर्वा
न्धुनः कोऽद्य करिष्यति। एवं दुःखाभितप्तानां पृथिवी नो विदीर्यते। पित्रा गुणविशिष्टेन लालि
तानां विध्वस्तचेतसां। त्वयि राजन्गते स्वर्गं रामे चारण्यमाश्रिते। न जीवितुं व्यवस्यामि प्रवेक्ष्यामि हुताश
नं। पित्रा हीनं तथा भ्रात्रा शून्यामिव महीमिमां। अयोध्यां न प्रवेक्ष्यामि प्रवेक्ष्यामि हुताशनं। ए
वमादितयोः श्रुत्वा भ्रात्रोर्विलपितं तदा। सर्वः परिजनोऽप्यस्य दुःखमार्तस्वरो रुदन्। ततः शोक
परिश्रान्तौ शत्रुघ्नभरतावुभौ। विलपित्वाति कारुण्यं ध्यानमेवान्वपश्यतां। तौ तु दृष्ट्वा ध्यानगतौ
पितुरिष्टः पुरोहितः वसिष्ठो भरतं वाक्यमुत्थाप्योत्तदुवाच ह। द्वंद्वदुःखं जगत्सर्वं मानितं शमिदं
यथा। अवश्यंभाविनं भावं तत्र शोचितुमर्हसि। जातस्य नियतो मृत्युः सर्वेषां जन्मभृत्तः सदा च। तस्मा
दपरिहार्येऽर्थे न त्वं शोचितुमर्हसि। सुमंत्रश्चापि शत्रुघ्नं पतितं धरणीतलात्। उत्थाप्य पद

विशांतसर्वञ्जनहितावहस्य ॥ गच्छतौ तोजनस्थानाद्धावत्स्वस्ति केनीतनरेशात ॥ अरण्येणिपरिमार्जनोवाख्याति
नेष्टगौतुनौ ॥ अमात्यस्त्वरयामासुः पितुः कर्तुंजलक्रियां ॥ इत्यार्षेरामायणे भरतविलापो
नामसर्गः ॥ ॥ एवंविधायसत्कारंभरतः पृथिवीपतेः जलक्रियांततः सर्वांकर्तुंसमुपच
क्रमे । पुण्यांतु पुण्यजनलांप्राप्यमहर्षिगणसेवितां । उदकंसपितुर्मीतंसरयूंसरितांवरां । अव
गाह्यततः पुण्यांसरयूंचसुहृज्जनः । ददौपितरमुद्दिश्यभरतःसजलांजलिं । ददतःसलिलं
तस्यभरतस्यमहात्मनः सान्निध्यंसरितःपुण्याः सर्वांविदधुस्तदा । विपाशाचशतद्रुश्चगंगा
चयमुवस्तथा । सरस्वतीचंद्रभागास्तथान्याःसरितांवराः तासांनदीनांपुण्यानांसलिलंन
दिवंगतं । पितरंतर्पयामासभरतःससुहृज्जनः सवयोरजनःसर्वैःसामात्यःसपुरोहितः तर्पया
मासराजानंसलिलेनविधानतः ततःशान्त्वोदकंतेन विधानेननृपस्यच । पृथगास्थापयामा
सुर्भवनंशोककलाकलं । आश्वास्यमानस्तैश्चापिप्रकृत्यैर्भरतस्ततः तैरेवसहितःसर्वैरयोध्यांन
गरींतदा । इत्यादेवचतांहृष्टादीनांतुरजनाहतां । पुरीमयोध्यांभरतः पौरान्वचनमब्रवीत् । गतेस्वर्गं
नरपतेरामेचवनमाश्रिते । नातीयंमेनिरानंदाप्रभ्रष्टानसदृशीपुरी । प्रमदाहतवीरेवविधवेवचरावती ।

राम अ॰का॰ १३७

राम २३७

विहेनानवदेवेन पुरीयं न विराजते । नेच्छाम्येतामहं द्रष्टुं प्रवेष्टुं वा हतत्विषं । इहैव प्रायमासिष्ये पितुर्दर्शन
काम्यया । किंमे पित्रा विहीनस्य जीवितेन सुखेन वा । इच्छामि जीवितुं नाहं मनुयास्यामि भूमिपं । अथ
राज्ञो महामात्यो धर्मपालेति श्रुतः परिदेवयमानं तं भरतं वाक्यमब्रवीत् । शोको विमुच्यतामेष यः शो
त्तो भरताभुवे । उत्पलस्यत्वस्यत्तेनेदमन्तुहृपं हि पात्मज । शोकं भरत नात्यर्त्तं त्वमेवं कर्तुमर्हसि । सर्वस्व
जननाशोपि नैव शोचंति पंडिताः शोचतो रुदतश्चापि यदि नाम सहस्रशः पुनः संजीवति चेज्जनः कश्चित्तदा
शोचेत्स सर्वदा । यदा त्वं वर्षाणि भर्तव्याः सर्वस्माभिरागतैः मृत्युकाले तदा शोके नास्ति सामर्थ्यमप्यपि ।
एवमाश्रु त्वं सहास्माभिर्मयोध्यां प्रविशाश्रमौ । स्वजनो शोकसंतप्तमाप्त्वा समयमाश्च च । ततोनंतर
मेव त्वं स्वर्गतस्य महीपतेः श्राद्धकर्मप्रयत्नेन विधिवत्कर्तुमर्हसि । त्वमद्य नाथः सर्वेषामस्माकं स्व
जनस्य च । शोचितुं नार्हसि त्वं नः प्रज्ञानां नाथतां गतः । एवमुक्ताः स विप्रेण धर्मपालेन धार्मिकः प्रविवेश
निरानंदां मयोध्यां सपरानुगः विशून्यचत्वरपथां विध्वस्तां विपणापणां । शोकातुरजनाकीर्णां दीनस्व
जननादितां ॥ ततो विवेश स्वजनैः संवृतः पितृनिवेशं भृत्यैर्निगूढः खिन्नः विहीनमिन्दुप्रतिमेन राज्ञा गतो
त्सवाकारमिवाति निष्प्रभं ॥ प्रविश्य तस्मिंश्च पितृनिवेशने द्वारेण निःसंस्तीर्यदशाहमात्तुरः ततः स

स्तुष्ठापनमेवचिंतयन्पितुर्विनाशं भरतः शतापवान् ॥ ॥ आर्षे रामायणे अयोध्याकांडे उदकप्रदानं नाम सर्गः ॥
समतीते दशाहे तु कृतशौचो नृपात्मजः । द्वादशिकं श्राद्धं त्रयोदशकमेव च । ददौ
चाहिस्थापितरं ब्राह्मणेभ्यो धनं तदा । महार्हाणि च वस्त्राणि गाश्ववाहनमेव च । यानानि दासीदासं
च वेश्मानि कस्तुमंतिच । रुक्माणि च मुख्यानि राज्ञस्तस्यौर्ध्वदैहिकं । त्रयोदशाहे तीते ह स्नेचानंतते
विधौ । समेता मंत्रिणः सर्वे भरतं वाक्यमब्रुवन् । गतः स नृपतिः स्वर्गं भर्ता सो यो गुरुश्च नः । प्रव्रा
ज्य दायेतं पुत्रं रामं लक्ष्मणमेव च । त्वमद्य भव नो राजा धर्मतो ह्यवरात्मज । आक्षेपाति नापदं यावदि
दं राष्ट्रमराजकं । आभिषेचनिकं द्रव्यमिदमादाय सर्वशः । राजानमभिषेक्तुं त्वामिच्छंति नृपमंत्रिणः
इदं राज्यं गृहाण त्वमन्ववायक्रमागतं । अभिषेचय चात्मानं पाहि चास्मान्नराधिप । इत्युक्तो भर
तो द्रव्यमभिषेचनिकं तदा । मंगलार्थं समालभ्य राज्ञस्तान्मंत्रिणो ब्रवीत् । ज्येष्ठो भ्राता न सदा राज्य
भाम नेनानुचितं कुले । भवंतो वक्तुमर्हंति नैवं मां कबालाइव । भ्राता मे गुणवाञ्ज्येष्ठो राजा भवितु
मर्हति । राजधर्मविदां श्रेष्ठो रामो राजीवलोचनः । कृत्यो नियोज्यस्तस्याहं रामो राजा भविष्यति । वने
त्वहं विनिवत्स्यामि नववर्षाणि पंच च । युज्यतामाशु महती सेनाश्च चतुरंगिनी । आनयिष्याम्यहं ज्येष्ठं
रामं

भ्रातरं राघवं वनात्। आभिषेचनिकं द्रव्यं सर्वमेतदुपस्कृतः। पुरस्कृत्य गमिष्यामि भवद्भिः सहितो
वनं। तत्रैव तं नरव्याघ्रमभिषिच्य पुरस्कृतं। आनयिष्याम्यहं रामं हव्यवाहमिवाध्वरे। नासकामं
करिष्यामि जननीं राज्यशुल्किनीं। वने वत्स्याम्यहं दुर्गे रामो राजा भविष्यति। क्रियतां शिल्पि
भिः पंथाः समो वा विषमे ध्वनि। दैशिकाश्च पथिज्ञाश्च रक्षशालायां त्वमेधतः इत्येवं भरतं धर्म्यं भा
षमाणं वचस्तदा। प्रत्यूचुर्हर्षमाणाः सर्वे नृपमंत्रिणः एवं ते भाषमाणस्य प[illegible] श्रीरुप
तिष्ठतु। यस्त्वं भ्रात्रे श्रियं दातुं ज्येष्ठायेच्छसि राघव॥ अनुत्तमं ते वचनं नृपात्मजः प्रजल्पतः संश्र
वनं निशम्य। प्रहर्षजाः संप्रति बाष्पबिंदवः पतंति नेत्रे राजात्मने त्रसंभवः॥ श्रुत्वार्थवचनमथो
निशम्य हृष्टास्ते मात्याः सपरिषदो बभुवुस्तदा च। पंथानं नरवर भक्तिमाञ्जनश्च व्यादिष्टस्तव वचनाच्च
शिल्पिवर्गः॥ ॥आर्षे रामायणे अयोध्याकांडे भरतवाक्यं नाम सर्गः॥ अथ भूमिप्रदेशज्ञाः सूत्र
कर्मविशारदाः। स्वकर्मनिरताः शूराः खनका यंत्रकास्तथा। कर्मांतिकाः स्थपतयः पुरुषा यंत्र
कोविदाः। तथा वार्धकिनश्चैव दारु त्रिणो वृक्षरोपकाः। कूपकाराः सुधाकारा वंशकर्मकृतस्तथा।
समर्था ये च विद्वांसः पुरतस्ते प्रतस्थिरे। विषमं च समं कर्तुं छिंदंतश्चैव पथिद्रुमान्। सेनापतिर्यथा वये

भरतस्यप्रयास्यतः सत्तहर्षात्समुत्क्रोशाज्जनौघोविपुलः प्रियः। आशोभतमहावेगः पर्व
णीवजलाशयः नेन्द्रस्थंस्थमधिष्ठायकर्मकर्मस्वकोविदः कुर्वंतः शोधयंतश्चपंथानंगहनेवने।
चिच्छिदुः शैलसंकाशान्कांश्चिद्वृक्षान्परश्वधान्। अवृक्षेषुचदेशेषुकांश्चिद्वृक्षानरोपयन्। लता
वितानगुल्मांश्चशालाकाकोशपर्वतान्। केचित्कुठारैर्वृक्षं केचिद्दात्रैश्चैवप्रचिच्छिदुः अपरेचि
च्छिदुः सालान्वलिनोबलवत्तराः विधमंतिस्मकुद्दालैः स्थलानिचसमंततः तथाकाण्टक
दुर्गांश्चपथस्थकूपकाण्टकान्। पांसुभिः पूरयामासुस्त्वन्येश्वभ्रांस्तथापरे। निम्नान्देशांस्तथा
चान्येसमीचक्रुः समंततः संक्रमांश्चैवकुर्वंतस्तीर्थानिचसहस्रशः नदीतीरतटाक्रायान्
कुर्वंतः समांस्तथा। अध्वमार्गंययुःपूर्वंतनकाभरताज्ञया बिबिदुर्मेदनीदांश्चदुर्गदेशा
भागांस्तथा। जलावायांस्तथाचक्रुर्नचिरेणाबहूदकान्। सागरप्रतिमान्मार्गेसुतीर्थान्विमलो
दकान्। चक्रुर्देशेषुदेशेषुयदशः पंचतोरणान्। उदपानानबहुविधान्वेदिकापरिवारितान्।
सुधाकुट्टिमतलनः सुपुष्पितमहीरुहः मत्तकृष्टद्विजगणः पताकाभिरलंकृतः चंदनोद
कसंसिक्तोनानाकुसुमभूषितः बह्वशोभतसेनायाः पंथाः स्वर्गपथोपमः सूर्यस्तुशोध

राम
अ०का
२५८

राम
२२९

यामासुर्भूषानिश्चाप्यशोभयाच। नक्षत्रेषु प्रशस्तेच मुहूर्ते चैव तद्विधः निवेशं स्थापयामासुर्भ
रतस्य महात्मनः बहुःपांसुचयाश्चासीत्परिखापरिवारितः यंत्रेन्द्रकीलपरिखाड्रतोलीपरिवेष्टि
तः प्रासादतलसंसिक्तः शोधवैश्च सुसंस्कृतः पताकाशोभितः श्रीमान्सुनिर्मितमहापथः
गृहैस्तत्त्वहितविरवंसविटंकविमानकैः ।समुच्छ्रितपताकैश्च शात्रसंघोपशोभितः जाह्नवीं च समा
साद्य विविधद्रुमकाननां। शीतलामलपानीयां महामीनसमाकुलां ॥ सचंद्रतारागणमंडि
तो यथा नभः पागमेवी नभसा विराजते। नक्षत्रमा[illegible]र्गः सतथा व्यराजत क्रमेण पंथाः शुभशि
ल्पिनिर्मितः ॥ इत्यार्षे रामायणे अयोध्याकांडे मार्गसंस्कारो नाम सर्गः ॥ रामायंज
नसे पूर्णां भरतश्च गृहं सतां। ददर्श बुद्धिसंपन्नो वसिष्ठो भगवानृषिः आसनानि यथान्याय
मार्याणां कुर्वतां ततः बिभ्रांतिस्म घनापाये ज्योतिषां ज्योतिता मिव। सर्वाश्च राजप्रकृतीः
समेतान्वीक्ष्य धर्मवित्। इदं शुश्रोक्तिं वाक्यं भरतं शत्रुमाषत। नातराजा दशरथः स्वर्गतो धर्मभा
चरन्। धनधान्यवतीं स्फीतां प्रदाय पृथिवीं तव। रामस्तथा सत्यधृतिः सतां धर्ममनुस्मरन्
नाजहात्पितुरादेशं लक्ष्मीशीनोपशुभमानिव। पित्रा भ्रात्रा च ते दत्तं राज्यं निहतकण्टकं। तद्भु

रामा
अ॰का॰
४॰

शान्तं सहामात्यः क्षिप्रमेवाभिषेचय । उदीच्याश्च प्रतीच्याश्च दाक्षिणात्याश्च केरलाः । कोटिधाराश्च सामु
द्रा रत्नान्युपहरन्तु ते । तच्छ्रुत्वा भरतो वाक्यं शोकेनाभिपरिप्लुतः जगाम मनसा रामं धर्मज्ञो धर्मका
म्यया । स बाष्पयानदा वाचा कलहंसस्वनो युवा । निजगाद सभामध्ये जगर्हे च पुरोहितं । चरितब्र
ह्मचर्यस्य विद्यास्नातस्य धीमतः धर्मे प्रयतमानस्य को राज्यं मद्विधो हरेत् । कथं दशरथाज्जातो
भवेद्राज्यापहारकः राज्यमाहत्य रामस्य कोऽवोऽज्यं मद्विधो हरेत् नाधर्मं वक्तुमर्हसि । ज्येष्ठः श्रे
ष्ठश्च धर्मात्मा दिलीपनहुषोपमः लब्धुमर्हति काकुत्स्थो राज्यं दशरथो यथा । अनार्यजुष्टम
स्वर्ग्यं कुर्यां पापमहं यदि । इक्ष्वाकूणामहं जातो भवेयं किलपांसनः । यन्मे मात्रा कृतं पाप
नाहं तदभिरोचये । इहस्थोऽहं वनस्थं तं नमस्यामि कृताञ्जलिः राममेवानुगच्छामि स राजा
द्विपदां वरः त्रयाणामपि लोकानां राघवो राज्यमर्हति । यदि त्वार्यं न शक्ष्यामि विनिवर्तयि
तुं वनात् । अहं तत्रैव वत्स्यामि यथार्यो लक्ष्मणस्तथा । अयोध्यामहं वस्तुं नोत्सहे भ्रात
रं विना । सर्वश्रेष्ठगुणं ज्येष्ठं रामं राजीवलोचनं । पित्रा भुक्तां नृपश्रीर्मे दायाद्यं तस्य धीमतः ।
नाधिगन्तुं मया शक्या सावित्रीव सुपत्नीति । पितर्युपरते तस्मिंल्लोकनाथे महात्मनि । शरणं च रा

श्री
२८॰

निश्चैवज्येष्ठेनभ्रातापिताचमे। तंनिवर्त्तयितुंबुद्धिर्वनवासेकृतामया। नकेनचिदियंशक्याभ्रात्या
वर्त्तयितुंशुभे। तद्वाक्यंधर्मसंयुक्तंश्रुत्वासर्वेसभासदः हर्षादश्रूणिमुमुचुरामेनिहितचेतसः
तत्रसमायांसचिवाःसोपाध्यायाविचक्षणाः साधुसाध्विनिहितार्थंशंसंतोभरतंगुणैः वसिष्ठस्त्वब्रवी
द्दृष्टोभरतंवाष्पगद्गदं। इदंपरिसदोमध्येप्रभयाम्बरसंपदा। शशांकविमलंचित्तंमनाश्चर्यमि
दंत्वयि। पित्रादशरथेनत्वंधर्मज्ञेनमहात्मना। अभिजातोसिपूर्वेणराज्ञादानवयोधिना। यस्त्वं
वनगतंरामंनिवर्त्तयितुमिच्छसि। अभिज्ञानासिरामस्यकृतज्ञगुणवतोगुणान्। धन्योसिसर्वधर्मा
त्माधन्योयस्यासिबांधवः ईदृशाहिमहात्मानोयत्रस्युःप्रियबांधवाः देशेकिंसिवतत्रस्या
द्दुर्लभंवीतकल्मषे॥ त्वयाह्यपत्येनगुणैःशतात्मानागतोदिवंभूमिःपातिःप्रतिष्ठितः। सत्रास
मयापरिक्षिप्यतेत्वियंयद्युक्तोरामनिवर्त्तनेह्यसि ॥ इत्यार्षेरामायणेअयोध्याकांडेभरत
प्रतिज्ञानामसर्गः ॥ एवमुक्तोवसिष्ठेनभरतोभ्रातृवत्सलः गुरुंप्रणम्यशिरसाततोवच
नमब्रवीत्॥ सर्वोपायान्प्रयुंजेततंनिवर्त्तयितुंगुरो। समहात्मायमिश्राणांगुरूणांगुरुवर्त्ति
नाम्॥। एवमुक्तासधर्मात्माभरतोभ्रातृवत्सलः समीपस्थंततदास्तूतंतत्रैवाब्रवीदिदम्।

तत्समुत्थाय गच्छ त्वं सुमंत्र मम शासनात्। यात्रामाज्ञापय क्षिप्रं बलं चैव समानय। एवमुक्तः सुमंत्रस्तु
भरतेन महात्मना। प्रहृष्टः सोऽदिशत्सर्वं यथासंदिष्टमेव तत्। ताः प्रहृष्टाः प्रकृतयो बलाध्यक्षश्च
णोदिता। श्रुत्वा यात्रां समाज्ञप्तां काकुत्स्थे विनिवर्तने। ततो योध्यागताः सर्वे हृष्टाः स्वे स्वे गृहे तदा।
यात्रां मम यमाज्ञाय रामस्यागमनं प्रति। ते हयैर्गोरथैः शीघ्रैः स्यंदनैश्च मनोहरैः। सह योधैर्बला-
ध्यक्षा बलं सज्जमवेदयन्। सज्जं तु तद्बलं ज्ञात्वा भरतो गुरुसंनिधौ। रथं मे त्वरयस्वेति सुमंत्रं पा-
र्श्वतोऽब्रवीत्। ततः सुमंत्रस्तामाज्ञां श्रुत्वा शीघ्रपराक्रमः। रथं गृहीत्वा प्रययौ युक्तं परमवाजिभिः॥
॥ स राघवः सत्यधृतिः प्रतापवान्ब्रुवन्सुयुक्तं दृढसत्यविक्रमः। गुरुं महारण्यगतं यशस्विनं प्र-
सादयिष्यन्भरतोऽब्रवीदिदं॥ तूर्णं समुत्थाय सुमंत्र गच्छ योगं ममाज्ञापय मे बलानां। आने-
तुमिच्छामि युक्तं वनस्थं प्रसाद्य रामं जगतो हिताय॥ स सूतपुत्रो भरतेन सम्यगाज्ञापितः संप-
रिपूर्णकामः। शशास सर्वान्प्रकृतिप्रधानान्बलस्य मुख्यान्सुहृज्जनं च॥ काल्ये समुत्था-
य ततः कुलीना राजन्यवैश्या नगरप्रधानाः। अयोजयन्नुष्ट्ररथान्समेतान्मत्तांश्च नागान्जवतुल्या-
न्हयांश्च॥ इत्यार्षे रामायणेऽयोध्याकांडे सेनाप्रस्थानिको नाम सर्गः॥ ॥

ततः श्वेतैर्हयैर्युक्तमास्थायस्यंदनोत्तमम्। प्रययौभरतः श्रीमान्रामदर्शनकाम्यया। अग्रतः
प्रययुस्तस्यसर्वेमंत्रिपुरोहिताः अधिरुह्यहयैर्युक्तान्रथान्सूर्यरथोपमान्। दशनागसहस्रा
णिकल्पितानियथाविधि। अन्वयुर्भरतंयांतमिक्ष्वाकुकुलनंदनं। षष्टीरथसहस्राणिध
न्विनोसायुधानिवै। अन्वयुर्भरतंयांतंराजपुत्रंमहाबलं। शतंचाश्वसहस्राणिसमारूढानि
राघवं। अन्वयुर्भरतंयांतंराजपुत्रंयशस्विनं। कैकेयीचसुमित्राचकौसल्याचयशस्विनी। रा
मानयनसंहृष्टाययुर्यानेनभास्वता। प्रययोश्चार्यसंघातारामंद्रष्टुंसलक्ष्मणं। तस्यचेष्टाःकथाःचक्रु
सर्वेसंहृष्टमानसाः मेघश्याममहाबाहुंस्थिरसत्वंदृढव्रतं। द्रक्ष्यामस्तंकदारामंजगतःशो
कनाशनं। दृष्टएवमतःशोकमपनेष्यतिराघवः तमःसर्वस्यलोकस्यसमुद्यन्निवभास्करः
इत्येवंकथयंतस्तेसंप्रहृष्टाःकथाःशुभाः परिष्वजंतश्चान्योन्यंययुर्नागरिकास्तदा। पुरश्चान्निर्य
युः सर्वेसमवायेननैगमाः रामदर्शनसंहृष्टाःसर्वाःप्रकृतयस्तथा। मणिकाराश्चयेकेचि
त्कुंभकाराश्चशोभनाः सूत्रकर्मकृतश्चैवतथायेशस्त्रोपजीविनः स्वर्णकाराश्चविख्यातास्त
थाकनकशोधकाः स्नापकाःस्नावकावैद्याःशौंडिकाःपौषिकास्तथा। रजकास्तन्तुवायाश्च

सूतमागधवंदिनः वाराबेत्रकाश्चैव गांधिकाः पणिकास्तथा। शवालिकाः सूपकारास्तथा शिल्पो
पजीविनः हैरण्यकाश्च शरव्यास्तथा हृद्युपजीविनः शाकारिकास्तथा चैव तथा शास्त्रोपजीविनः
स्थूलवाद्याः कांस्यकाराः चित्रकाराश्च शोभनाः। धान्यविक्रयिणश्चैव गंधविक्रयिणस्तथा। फलो
पजीविनः सर्वे पुष्पमूलोपजीविनः सूपकाराः स्थपतयस्तक्षाणः कारपात्रिकाः श्रीरामेणास्त
था सर्वे ईष्टकाकारकास्तथा। दिव्यमोदककाराश्च मालाकाराश्च शोभनाः श्रीरामेणास्त
था सर्वे तथा मांसोपजीविनः पांतिकाः पायसाश्चैव तथा तूर्णोपजीविनः। कार्पासिकाध
न्तुष्काराः सूत्रविक्रयिणस्तथा। वस्त्रकर्मकृताश्चैव कांडकारास्तथैव च। स्वस्तिकाराः कोच
कारास्तथा मत्स्योपजीविनः मर्जकाराः सक्तुकारास्तथा वाटविकाश्च ये। खंडकारास्तथा
सुरव्यास्तथा वाणिजकाश्च ये। काचकाराश्छत्रकारास्तथा बोधकरोधकाः खंडसंस्थापकाश्चै
व तथा ताम्रोपजीविनः श्रेणीमहत्तराश्चैव ग्रामघोषमहत्तराः शैलूषाश्च सहस्त्रीभिर्हूत
वैनसिकाश्च ये। सर्वे श्रेणीनिर्गमिंसं सर्वं नगरं सकुलीकृत। आतुरं बृद्धबालं च वर्जयित्वा ङ्केजनं
समाहिता वेदविदो ब्राह्मणाः श्रुतसंगताः। गोरथैर्भरतं यांतं मनुजग्मुः सहस्रशः। स्तुवे

राम
अ.का
२। ६२

श्री
२८२

शाः शुद्धवसनाः संतो मृष्टकुंडलधारिणः । सर्वे ते विविधैर्यानैर्यातेभरतमन्वयुः ॥ दृष्ट्वा प्रमुदितासेनाह्वा
न्वयात्कैकयीसुतं । शास्त्रदृष्टेनमार्गेणतथान्यैर्द्विजसत्तमैः । अतिहृष्टा सा तदा सेनागंगामासाद्य
वैनदीं । निरीक्ष्य च स्थिता सेनागंगां चैव बहूदकं । भरतः सचिवान्सर्वानब्रवीद्वाक्यकोविदः निवे
शयतमेसेनामभिप्रायेणसर्वशः विश्रांताः संतरिष्यामो गंगामेतां महानदीं । अस्यां तु तावदिच्छामि
स्वर्गतस्य महीपतेः । ऊर्ध्वदेहनिमित्तार्थं मह्यं दातुं जलांजलिं । तस्यैवं ब्रुवतो मात्याः स्वस्थेनसुत्कास
माहिताः न्यवेशयंस्तच्छंदेन स्वेन स्वेन पृथक् पृथक् ॥ निवेश्य गंगामनु तां महानवं चमूं यथा विधा
नं परिबर्हशोभितां । उवास वाष्पं भरतो महामना विचिंतयन्राम निवर्तनं तदा ॥ इत्यार्षे रामा
यणे अयोध्याकांडे भरतगंगाप्रयाणंनामसर्गः ॥ ततो निविष्टां ध्वजिनीं गंगामन्वाश्रितां नदीं ।
निषादराजो दृष्ट्वैव ज्ञातीन्स्वानिदमब्रवीत् । इयं सेना तु महती समंतात्परिदृश्यते । अंतं नैमस्या
नुपश्यामि विस्तृताया समंततः इक्ष्वाकूनामियं सेना संशयो नात्र कश्चन । एष सदृश्यते
ह्यानकोविदारध्वजो रथाः ग्रहीष्यति हि नस्त्वेनः किं नु गयां तु विदिष्यति । हनिष्यति नरव्याघ्रमु
कौनयमतदमानुषं । अपीदाशरथिं रामं पित्राप्रव्राजितं वनं । सामान्यो राज्यलोभेन भरतो हि

हंतुमभ्यागतः समर्थो राज्यलक्ष्मीर्हि सुश्लिष्टं प्राप्तसौहृदं । क्षणेन विध्वावयितुं सर्वं ध्यास्मि विशंकितः
॥ मम दाशरथी रामो भ्राता बंधुः स रवागुकः अहंतस्य हितार्थाय गंगामन्वाश्रितो नदीं । स मंत्रया
मि यश्च तं मंत्रज्ञैर्मंत्रिभिः सह । मंत्रयित्वाब्रवीत्सर्वान्यचो वनचरांस्तदा । गुहसन्नद्धाः सधनुष्कः स
र्वएव समाहिता । ब्रूह मे नो नदीं प्राप्य मम मा निष्ठ्य ज्ञासनात् । नौकाशतानां पंचानामेकैकस्य
शतं शतं । सन्नद्धानां तथा यूनां तिष्ठन्तु युद्धातधन्विनां । अदियास्यंति सन्दुष्टा रामस्याक्लिष्ट
कर्मणः । नेदं स्वस्तिमती सेना गंगामद्य तरिष्यति । रामावमानन कृतं क्रोधमद्य हृदि स्थितं । से
नाव्राते विमोक्ष्यामि निर्मोकं पन्नगं यथा । रामं वने वासयिता कैकेयी वरागेनयेत् । शतं पापं न
रेंद्रेण नत्प्रमोक्ष्यामि संयुगे । अद्य सेनावसंघाता मत्कार्मुकपरिच्युताः निपतिष्यंति गात्रेषु नरा
श्वरथदंतिनाम् । वाजिनां च सितांगानां क्रुद्धस्य मम सायकाः । अद्य भित्वा प्रवेक्ष्यंति शरीराणि
मर्यीरिताः हतयोधा हतरथा विद्रस्ता गजसादिनी । सेनामद्य करिष्यामि क्रव्यादखगभोज
नं । निविडायाय मे नेत्रास वाजिरथकुंजरा । तत्र भूमिं करिष्यामि शरैः शोणितकर्दमं ।
अद्याहतो वधिष्यामि क्रुद्धो मायायुवायसानू । सैनिकानां समस्तानां रुधिरैः स्नातजाशिनः ॥

राम
अका
२४३

राम
२४३

अद्यकर्मंकरिष्यामिरामस्यार्थेस्तिदुष्करं । स्वपस्येवाहंविनिहतः कथाशेषः किलद्विजौ ॥ निवार
यिष्यामिहिवाहिनीमिमांवनंव्रजंतीबहुवाजिकुंजरां । गुणैर्गृहीतोबहुभिर्महात्मनः श्रियस्यरा
मस्यहितंचिकीर्षुः ॥ ॥ इत्यार्षेरामायणेऽयोध्याकांडेगुहकोपोनामसर्गः ॥ अथोपायानमा
दायमत्स्यान्मांसंमधूनिच । अभिचक्रामभरतंनिषादाधिपतिर्गुहः ॥ तमायांतमभिप्रेक्ष्य सूतपुत्रः
प्रतापवान् । भरतायाचचक्षेचविनयज्ञोविनीतवत् । एतोज्ञातिसहस्रेणगुहस्त्वांशस्तुपस्थितः
कुशलोदंडकारण्येवृद्धोभ्रातुश्चतेसखा । तस्मादसौपश्यतुत्वांत्वत्प्रीत्यर्थमुपागतः ॥ असंशय
मयंवेत्तियत्रतौरामलक्ष्मणौ । एतत्तुवचनंश्रुत्वासुमंत्राद्भरतस्तदा । उवाचसारथिंश्रीमान्गुहः
पश्यतुमामिति । लब्ध्वाभ्यनुज्ञः संहृष्टोज्ञातिभिः परिवारितः । आगम्यभरतंप्रह्वोगुहोवचनमब्र
वीत् । निष्कुटश्चैवदेशोयमसंकीर्णश्चराघव । इदंचतेदासगृहंस्वकेदासगृहेवस । अस्तिमूलंफ
लंचैवनिषादैः समुपार्जितं । आर्द्रंचमांसंशुष्कंचवन्यंचोच्चावचंबहु । आशंसेत्वांजितामित्रंसोहि
र्दादहमीहरात्रं । अर्चितोविविधैःकामैः श्वः प्रभातेगमिष्यसि । एवमुक्तस्तुभरतोनिषादाधि
पतिंगुहं । प्रत्युवाचमहाप्राज्ञोवाक्यंहेत्वर्थसंहितं । सर्वेखलुकृताः कामास्त्वयाममसुदेःस

रवे । योमेत्वंमीदृशींसेनांमम्यर्चयितुमिच्छसि । इत्युक्त्वासमहातेजागुहंवचनमीदृशं । अब्रवीद्भरतः
श्रीमान्निषादाधिपतिंपुनः कतरेणगमिष्यामोभरद्वाजाश्रमंगुह । गहनेयोभृशंदेशोगंगानूपो
दुरत्ययः तस्यतद्वचनंश्रुत्वाराजपुत्रस्यधीमतः अब्रवीत्प्रांजलिर्वाक्यंगुहोगहनगोचरः दासा
स्त्वानुगमिष्यंतिधन्विनःसुसमाहिताः अहंचानुगमिष्यामिराजपुत्रमहाबल । कच्चिन्नदुष्टोव
जसिरामस्याक्लिष्टकर्मणः अनिमीमाहिमिनेयंशंकांजनयतीवमे । तमेवमभिजल्पंतमाका
शसमनिर्मलः भरतःश्लक्ष्णयावाचाशुभंवचनमब्रवीत् माभूत्सकालोयत्कष्टंनमांशंकितु
मर्हसि । राघवार्थमहिम्नातान्येष्टःपितृसमोमम । तंप्रावर्तयितुंयास्मिकाकुत्स्थंवनवासिनं ।
बुद्धिरन्यानतेकार्यागुहसत्यमेतद्ब्रवीम्यहं । सतुप्रहृष्टवदनःश्रुत्वाभरतभाषितं । पुनरेवाब्रवीद्वा
क्यंभरतंप्रतिहर्षणं । धन्यस्त्वंनत्वयातुल्यंपश्यामिजगतीतले । अयत्नादागतंराज्यंयस्त्व
सोयंजटाभारमिमंवहतेराघवःकथं। मन्निमित्तमिदंप्राप्तोदुःखंरामःसुखोचितः धिग्जीवितंनृशंस
स्यममलोकविगर्हितं। इत्येवंविलपन्दीनःप्रस्विन्नमुखपंकजः पादावुपेत्यरामस्यप्रापतद्भ
रतोभुवि। दुःखाभितप्तोभरतोराजपुत्रोमहाबलः उक्त्वार्येतिसकृद्दीनःपुनर्नोवाचकिंचन। बा
ष्पापिहितकण्ठोहिरामंदृष्ट्वायशस्विनं। हार्येत्येवसमाभाष्यव्याहर्तुंनशशाकह। शत्रुघ्नश्चा
पिरामस्यववंदेचरणौरुदन्। तावुभौतुसमालिंग्यरामोप्यश्रूण्यवर्त्तयत्। ॥ ततःसुमंत्रेणच
तेनचैवसमीयिवान्राजसुतावरण्ये। दिवाकरश्चैवनिशाकरश्चयथांबरेशुक्रबृहस्पतिभ्यां॥
तान्पार्थिवान्वारणयूथकल्पान्समागतांस्तत्रमहत्यरण्ये। वनौकसःप्रेक्ष्यसमेत्यसर्वेह्यपाष्ट
हीनाककु[illegible]दन्नदानी ॥ इत्यार्षेरामायणेअयोध्याकांडेरामदर्शनंनामसर्गः॥ आघ्रायचम

राम
अका
२६३

श्री
२६३

तंमूर्ध्नि परिघ्रज्यच राघवः अंकेभरतमारोप्य पर्यपृच्छत्समाहितः कन्नुतातपितातेभूद्यदरण्यंत्व
मागतः नहित्वंजीवतस्तस्य गुरोरागंतुमर्हसि । चिरस्यवत पश्यामि दूराद्भरतमागतं । दुःप्रणीतम
रण्येस्मिन्किंतात वनमागतः कच्चिद्दशरथोराजा कुशलीसत्यसंगरः । राजसूयाश्वमेधानामा
हर्ताधर्मतत्त्ववित् । सकच्चिद्ब्राह्मणोविद्वान्धर्मनित्यस्तपोधनः इक्ष्वाकूनामुपाध्यायोयथाव
त्तातपूज्यते । तातकच्चिच्चकौसल्या सुमित्राचतपस्विनी । सुखिनीकच्चिदार्याचदेवीनंदतिकैकयी ।
। कच्चिद्विनयसंपन्नः कुलपुत्रोबहुश्रुतः अनुसूयुरनुद्रष्टा सत्कृतस्तेपुरोहितः कच्चिदग्निषुतेयु
क्तोब्राह्मणोमतिमानृजुः हुतंचहोष्यमाणंचकालेवेदयतेसदा । इष्वस्त्रेपरमाचार्यमर्थशास्त्रविशार
दं । सुधन्वानमुपाध्यायंकच्चित्त्वंनावमन्यसे । कच्चिदात्मसमाः शूराः श्रुतवान्जितेंद्रियाः कुल
श्चेंगितज्ञाश्चकृतास्तेतातमंत्रिणः मंत्रमूलोहिविजयोराज्ञांभवतिराघव । सुसंवृतोमंत्रिवरैरमा
त्यैर्मंत्रकोविदैः कच्चिन्निद्रावशंनैषि कच्चित्काल्येचविबुध्यसे । कच्चिच्चापररात्रेषु चिंतयस्यर्थमर्थवित्
कच्चिन्मंत्रयसेनैकः कच्चिन्नबहुभिःसह । कच्चित्तेमंत्रितोमंत्रोनराष्ट्रमनुधावति । कच्चिदर्थंवि
निश्चित्यलघुमूलंमहोदयं । क्षिप्रमारभसेकर्तुंनदीर्घयसिराघव । कच्चिन्नक्रियमाणानिकच्चि

मन्त्रधरणानिवा। विदुस्ते सर्वकार्याणि कर्तव्यानि नरेश्वरः कश्चिन्न राजन्हेतोर्वा चरतापचरक्षोक्तिना।
न्वयाचाप्यथामात्यैर्बुध्यते तात मानवाः कश्चिन्मूर्खः सहस्रेणाप्येकं क्रीणासि पंडितं। पंडितो
ह्यर्थकृच्छ्रेषु कुर्यान्निःश्रेयसं वचः सहस्रैरपि मूर्खाणां योन्नृपः पर्युपास्यते। नद्यैवाप्ययुतैस्तस्य ना
स्ति तेषु सहायता। एकोप्यमात्यो मेधावी शूरो दांतो विचक्षणः राजानं राजपुत्रं वा प्रापयेन्महतीं
श्रियं। कश्चिन्मुख्या महत्स्वेव मध्यमेषु च मध्यमाः जघन्याश्च जघन्येषु भृत्यास्ते तात योजिताः क
श्चित्कोशिकरास्तात सन्ति विभ्राजनाकुलाः देवस्थानैः प्रपाभिश्च तडागैश्चोपशोभिताः प्रहृष्ट
नरनारीकः समाजोत्सवभूषितः सुकृष्टसोमः पशुमान्विहिंसापरिवर्जितः अदेवंड्रोह्लकः
कश्चिदापद्भिश्चैव वर्जितः कश्चिज्जनपदः स्फीतः सुखं वसति राघव। प्रहृष्टनरनारीकाः सु
निकद्विजगोकुलाः कश्चिन्नैगमिरता वैश्याः कृषिगोरक्ष्यकर्मसु। रक्ष्यादिनाज्ञाधर्मेण सर्वे वि
षयवासिनः कश्चित्प्रियास्तान्वयासि कश्चिन्नाश्च सुरक्षिताः कश्चिन्न श्रद्दधास्यासां कश्चि
द्गुह्यं न भाषसे। कश्चिन्नागबलं गुह्यं कैकेयी सुप्रजस्त्वया। कश्चिदुन्नतदन्तानां कुंजराणां न तृ
प्यसे। कश्चिन्न सभायां रससे कश्चित्काले विबुध्यसे। कश्चिद्वापररात्रेषु धर्मार्थौ विप्रबुध्यसे।

कच्चित्संग्रामनीतिज्ञः शूरस्ते वाहिनीपतिः असहायोङरक्षोहि लोको नित्यं च तिष्ठति। कच्चि
ल्लोकायतिकान्ब्राह्मणांस्तुपसेवसे। अनर्थकुशला ह्येते मूढाः पंडितमानिनः शास्त्रेष्वन्येषु
मुख्येषु विद्यमानेषु दुर्बुधाः बुद्धिमान्वीक्षिकीं प्राप्य ननिंदां वर्धयंति ते। कच्चिद्दर्शयसे नित्यं
मनुष्यान्समलंकृतान्। गत्वा यो न्यायपूर्वाङ्के मुक्ताच विदितं जने। कच्चित्काल्यं च सायं च नवा
मीनस्य चायतः। पिबंति मदिरां नागा भुंजते भोजनानि च। कच्चित्पितृसुहृन्निं वर्तसे पुरुषर्षभ।
पितामहानामपि वा वर्तसे तुल्यगौरवः अमात्यानुपधातीतान्पितृपैतामहाञ्छुचीन्। श्रेष्ठा
ञ्छ्रेष्ठेषु कच्चि नियोजयसि कर्मसु। कच्चिदृष्ट्वा तथा भोज्यमेको नादसि राघव। कच्चिदाशंसमाने
भ्यो भृत्येभ्यः संप्रयच्छसि। कच्चिदश्वांश्च नागांश्च मानयंति तवायतः शास्त्रकार्म हतो वैद्या दक्षाः
कुशलमानिनः कच्चित्ते वाहनं गुल्मं वंचका न हरंति ते। कच्चिन्नवाहवर्त्तंते परस्त्रापहारिणः कच्चि
न्नानावजानंति यान्तकाः पतितं तथा। उग्रं भूतिग्रहीतारं कामयानमिव स्त्रियः ये वा विज्ञा
ये च दक्षा ये मूढा ये च पंडिताः ध्यांतोजीवितं न वा कच्चित्ते ते न मूर्खाः क्षिताः उपायकुशलवैद्याह
त्यं संभाषणे रतं। शूरमैश्वर्यकामं च यो न हंति स वर्धते। कच्चिन्नो बलिनां मुख्याः सर्वेषु युद्ध

विस्मानदः इष्टप्रदानाविक्रांतस्त्वयासत्कृत्यमानिताः कश्चिद्धृष्टश्च शूरश्च धृतिमान्मतिमाञ्शुचि।
कुलीनश्चानुरक्तश्च दक्षःसेनापतिस्त्वया। कश्चिद्बलस्य भक्तं च वेतनं च यथोचितं। संप्राप्तकालं दा
तव्यं ददासि न विलंबसे। कालातिक्रमणादेव भक्तवेतनयोर्भृताः भर्तुरप्यतिकुप्यंति सोनर्थः
सुमहान्स्मृतः। कश्चित्सर्वेनुरक्तास्ते कुलपुत्राः प्रधानतः आहवेषु प्रियान्प्राणान्संत्यजंति समा
हिताः कश्चिज्जानपदो विद्वान्दक्षिणः प्रतिभानवान्। यथोक्तवादीदूतस्ते कृतो भरत पंडितः क
श्चिदष्टादशान्येषु स्वपक्षे दशपंचच। त्रिभिस्त्रिभिरविज्ञातैर्वेत्सि तीर्थानि चारकैः कश्चित्त्वंयुध्यता
मरप्रतिपन्नश्च सर्वदाः दुर्बलाननवारयंश्च वर्तसे रिपुसूदन। वीरैरध्युषितं नित्यमस्माकं
तात पूर्वजैः सत्यनाम्नीं दृढद्वारां हस्त्यश्वरथसंकुलां। ब्राह्मणैः क्षत्रियैर्वैश्यैस्वकर्मनिरतैस्स्वक
र्मसु। जितेंद्रियैर्महोत्साहैर्दृढवीर्यैः सहस्रशः प्रसादैर्विविधाकारैर्वृतांदिव्यौबल्लशता त्वं
श्रीराम श्चिवसुदिनां स्फीतामयोध्यां परिरक्षसि। कश्चिन्मनुष्य शार्दूलमनुष्यास्समलंकृताः। उ राम
अ.का त्सवाद्योत्साह्यस्य शर्वाङ्गे राजपुत्रादिवीक्षसे। कश्चित्सदा ते दुर्गाणि धनधान्यायुधादिकैः यंत्रै २६५
२६५ श्चपरिपूर्णानि तथा शिल्पैर्धनुर्धरैः आयस्ते विपुलः कश्चित्कश्चित्स्वल्पतरो व्ययः अपात्रेषु

श्रीगणेशायनमः

ननेकश्चित्त्यागोगच्छतिराघव। देवतार्थेषु पित्र्येषु ब्राह्मणाभ्यागतेषु च। योधेषु मित्रवर्गेषु कश्चि
न्नगच्छतिते व्ययः कश्चिदार्यो विशुद्धात्मा क्षपितश्चोरकर्मणा। अदृष्टशास्त्रकुशलैर्नार्यंध्यायति मानवः
गृहीतलोकेरक्षसः कुशलोदृष्टकारणैः कश्चिन्नमुच्यतेचौरैर्धनलोभान्नरर्षभ। कश्चिद्वाविदितार्थेषु बलि
नेदुर्बलस्यच। अपक्षपातात्पश्यन्तिकार्येष्वधिकृतानराः यानिमिथ्याभिशस्तानांपतन्त्यश्रूणिरोदतांशु।
तानिपुत्रपशून्घ्नन्तितेषांमिथ्याभिशंसिनां। कश्चिद्वृद्धांश्चबालांश्चसुख्यान्वैद्यांश्चसम्मतान्। दानेनवच
साचैवश्रद्धावत्वाचंसेनय। कश्चिद्गुरूंश्चवृद्धांश्चतापसान्देवतातिथीन्। चैत्यांश्चसर्वान्सिद्धार्थान्ब्राह्मणांश्चन
मस्यसि। कश्चिदर्थेनवाधर्ममर्थंधर्मेणवापुनः उभौवाशीतिसारेण न कामेन प्रबाधसे। कश्चिदर्थंच
धर्मंचकामंचवदतांवर। विभज्यकालेकालज्ञसर्वान्भरतसेवसे। कश्चित्तेब्राह्मणाःसर्वेधर्मकामार्थ
कोविदाः नशोचंतिमहाप्राज्ञाःपौरजानपदैःसह। नास्तिक्यमनृतंक्रोधः प्रमादोदीर्घसूत्रता। अदर्शनं
ज्ञानवतांमालस्यंपापदृष्टिता। एकंचिन्तनमर्थानामनर्थज्ञैश्चमंत्रणं। निश्चितानांचनारंभोमंत्रस्याप
रिरक्षणं। मंगल्यानामयोगश्चप्रीत्युत्सर्गश्चसर्वशः कश्चित्त्वंवर्जयस्येतान्राजधर्मांश्चतुर्दश। येरोवि
ष्टः श्रियंक्लिष्टं नाशयेत्पृथिवीपतिः तथातेचानुपृष्टंतंरामंव्यथितचेतनः आज्ञापयन्तशोकार्तो

भरतोमरणंपितुः ॥ त्वामेवशोचंस्तवदर्शनेप्सुस्त्वय्येवसक्तांनतुमविचार्यबुद्धिम्। त्वयाविहीनस्तवशोकरुग्ण
स्त्वदर्थमेवास्तमितःपितानः ॥ पूर्वंचराजास्तमिहानुगृह्य श्रुत्वाचवाक्यंभरतस्यतस्य। चिकीर्षुमा
णोरघुनंदनस्तदापितुःप्रतिज्ञांसबभूववत्सलीशः ॥ इत्यार्षेरामायणेऽयोध्याकांडेकश्चित्त्वोनामसर्गः ॥
॥ ॥ तंतुरामःसमाश्वास्यभरतंगुरुवत्सलं। उत्थाप्यमूर्ध्निचाघ्राय पादयोःपतितंतदा। किमेतदिच्छे
यमहंश्रोतुंयद्व्याहृतंत्वया। कस्मात्त्वमागतोदेशाभिमंचीरजटाधरः हित्वाराज्यंप्रविष्टस्तुतत्सर्वं
वक्तुमर्हसि। इत्युक्त्वाकैकयीपुत्रःकाकुत्स्थेनमहात्मना। प्रसृज्यवाष्पंबाहुभ्यांप्रांजलिर्वाक्य
मब्रवीत्। आर्येराज्यंपरित्यज्यशत्वाकर्मसुदुष्करं। गतःस्वर्गंमहाबाहुःपुत्रशोकाभिपीडितः
दुष्टांस्त्रीबुद्धिभास्थायकैकेयीराज्यकामिनी। चकारस्तुमहत्पापमिदंममयशोहरं। साराज्य
फलमप्राप्य विधवाशोककर्षिता पतिष्यतिमहाघोरेनिरयेजननीमम। तस्यमेदासभूतस्यप्र
सादंकर्तुमर्हसि। अभिषिंच्यस्त्वचाद्यैनराज्येनमघवानिव। इमाःप्रकृतयःसर्वाविधवामातरश्च
मे। त्वत्सकाशमनुप्राप्ताःप्रसादंकर्तुमर्हसि। तवमानुपूर्व्यतोयुक्तेनयुक्तंयुक्तंकामेनमानद। राज्यं
प्राप्नुहिधर्मेणसकामान्सुहृदःकुरु। भवत्वविधवाभूमिःसमग्रापत्यासमन्विता। शशिना
विमलेनेव शारदीरजनीयथा॥ भरतैःसचिवैःसर्वैःशिरसायाचितोमया। भ्रातुःशिष्यस्यदा

सत्यप्रसादं कर्त्तुमर्हसि । नादिदं शाश्वतं सर्वं पित्र्यं सचिवमंडलं । शृणितं भर्तुनव्याहुनावभानितुमर्हसि ।
एवमुक्त्वा महाबाहुः सत्वाढ्यः कैकयीसुतः रामस्य पादौ शिरसा जग्राह भरतस्तदा । तस्मार्त्तमिवमा
तंगं निःश्वसंतं मुहुर्मुहुः कुलीनः सत्वसंपन्नस्तेजस्वी चरितव्रतः रामोप्यथाब्रवीद्वाक्यं भरतं कैकयी
सुतं । राज्यहेतोः कथं पापमाचरेन्मद्विधो जनः नदोषं त्वयि पश्यामि सूक्ष्ममप्यरिसूदन । नचापि जन
नीं बाल्यात्त्वं विगर्हयितुमर्हसि । यावत्पितरि धर्मज्ञे गौरवं सम भमानद । तावदेव न नन्यो मे कैकेय्या
मपि गौरवं । महात्माधर्मशीलाभ्यां वनं गच्छेति राघव । मातापितृभ्यामुक्तोस्मि कथं कुर्यामतोन्य
था । त्वया राज्यमयोध्यायां प्राप्तव्यं लोकसत्कृत । वस्तव्यं दंडकारण्ये मया वल्कलवाससा ।
एवं कृत्वा महाभागो विभागं लोकसंनिधौ । व्यादिश्य च स्वधर्मात्मा दिवं दशरथो गतः स चेत्प्रमाणं रा
जेंद्रो राजा लोकगुरुस्तव । पित्रा भागं यथा दत्तं भुपभोक्तुं त्वमर्हसि । चतुर्दश समाः सोम्य दंडका
रण्यमाश्रितः उपभोक्ष्ये यथा दत्तं भागं पित्रा महात्मना ।। यदब्रवीन्मां नरलोकसत्कृतः पि
ता महात्मा विबुधाधिपोपमः तदेव मन्ये परमात्मसंहितं न सर्वलोकेश्वरतापि सत्कृतः ॥
त्यार्षे रामायणे ऽयोध्याकांडे रामवाक्यं नाम सर्गः ॥ रामस्य तु वचः श्रुत्वा भरतः प्रत्युवाच ह । कि

मेधर्म्माद्धिहीनस्य राज्यधर्म्मः करिष्यति । शाश्वतोयं सदा धर्म्मः स्थितोस्माकं नरर्षभ । ज्येष्ठे त्वयि
स्थितेराजन्नकनीयान्नवेन्नृपः । सुसमृद्धां गतां रम्यामयोध्यां गच्छ राघव । अभिषेचय चात्मानं कुल
स्यास्य भवाय नः । राजानं मनुषं प्राहुर्देवत्वे संमतो मम । यस्य धर्म्मार्थ चरितं वृत्तमाहुरमानुषं ।
केकयस्थी मयि स्थी मां त्वयि चारण्यमाश्रिते । दिवं यातो महाराज यितानः सम्मतस्सतां ।
उत्तिष्ठ पुरुषव्याघ्र क्रियतामुदकं पितुः अहं चायं च शत्रुघ्नः पूर्वमेव कृतोदकौ । प्रियेण किल
दत्तं हि पितृलोकेषु राघव । अक्षय्यं भवतीत्याहुर्भवांस्तस्य प्रियः सुतः । तां श्रुत्वा करुणां वाक्यं पि
तुर्मरणसंयुतां । राघवो भरतेनोक्तां बभूव गतचेतनः । वाग्वज्रं भरतेनोक्तं मनोज्ञं परंतप प्र
गृह्य रामो बाहुर्वै पुष्पिताग्रे द्रुमो यथा । वने परशुना कृत्तस्तथा भूमौ पपात सः । तथा निपति
तं रामं जगत्यां जगतीपतिं । कूलपातपरिश्रान्तं प्रसुप्तमिव कुंजरं । भ्रातरस्तं महेष्वासं द्विगुणं
शोककर्षितं । रुदन्तः सह वैदेह्या सिसिचुर्नेत्रवारिणा । स तु संज्ञां पुनर्लब्ध्वा नेत्राभ्यां वाष्पमुत्सृ
जन् । उपचक्राम काकुत्स्थः कृपणो बहुभाषितुं । करुणां नृपतिना हीनामयोध्यां पालयिष्यति
किं तु तस्य मया कार्यं दुर्ज्जनेन महात्मना । यो मृते मम शोकेन न मया चापि संगतः । अहो भरत सिद्धा

श्रीवनेराजाज्ञयानघ। शत्रुघ्नेन च सर्वेषु प्रेतकार्येषु सत्कृतः। निष्प्रधानामनेकाग्रां हीनांन

मे रवनैरैत्नं। निवृत्तवनवासोपि नायोध्यां गन्तुमुत्सहे। हे संपूर्णवनवासं मामयोध्यां तु न गतं। कोनु

शासिष्यति पुनस्ताते लोकांतरं गते। पुरा प्रेक्ष्य निवृत्तं मां यान्याह पितुः सांत्वयन्। कुतः श्रोष्यामि वाक्या

नि तानि कर्णसुखान्यहं। एवमुक्त्वाथ भरतं भार्यामभ्येत्य राघवः। उवाच शोकसंतप्तः पूर्णचंद्रनि

भाननां। सीते मृतस्ते श्वशुरः पित्रा हीनश्च लक्ष्मण। भरतो दुःखमाचष्टे स्वर्गतं पृथिवीपतिं। ग

न कीर्त्यश्रुतं गत्वा सर्वलोकप्रकृष्टं तं। नेत्राभ्यामश्रुपूर्णाभ्यां न शशाक निरीक्षितुं। ततो बहुगु

णं तेषां बाष्पो नेत्रैरजायत। तथाब्रुवति काकुत्स्थे कुमाराणां यशस्विनां। ततस्ते भ्रातरः सर्वे भ्रातृ

सांत्वास्य राघवं। अब्रुवन् जगतीपालं वाष्पसंदिग्धया गिरा। उत्तिष्ठ पुरुषव्याघ्र क्रियतामुदकं

पितुः। अहं चापि च शत्रुघ्नः पूर्वमेव कृतोदकौ। स रामः संपरिष्वज्य रुदंतीं जनकात्मजां। प्रोवाच

लक्ष्मणं चैव दुःखितं दुःखितो वचः। आनयेंगुदिपिण्याकं चीरमानय चोत्तमं। जलक्रियार्थं

तातस्य गमिष्यामि परंतपः। सीता पुरस्ताद्व्रजतु त्वं चैनामभितो व्रज। अहं पश्चाद्गमिष्यामि ग

तिर्ह्येषा सनातनी। ततो नित्यानुगस्तेषां विदितात्मा महामतिः। मृदुः दांतश्च शांतश्च रामे च दृढ

मतिमान्। सुमंत्रस्तैर्नृपसुतैः सार्धमाश्वास्य राघवं। अवतारयदालंब्य नदीं मंदाकिनीमनु। तेसुती
र्थां नदीं तत्कृच्छ्रामनुगम्य यशस्विनः। पुण्यां मंदाकिनीं रम्यां नित्यपुष्पितपादपां। शीघ्रस्रोतसमालंब्य
शिवतीर्थमकर्दमं। शरितेनांजसे मेदेशे विगाह्य विपुलं शुभं। असिंचन्नुदकं सर्वे पितुस्ते तद्भवत्विति। प
रिगृह्य रघुश्रेष्ठो जलपूरितमंजलिः। दिशं यास्यामभिमुखो रुदन्वचनमब्रवीत्। एतत्ते नृपशार्दूल वि
मलं दिव्यमुत्तमं। पितृलोकेषु पानीयं मद्दत्तमुपतिष्ठतु। ततो मंदाकिनीतीरे शुचौ देशे नराधिपः
पितुर्निर्वर्त्य तच्छ्रीमान् निर्वापं भ्रातृभिः सह। ऐंगुदं बदरीमिश्रं पिण्याकं दर्भसंस्तरे। न्युप्य रामः
सुदुःखार्त इदं वचनमब्रवीत्। इदं भुंक्ष्व महाराज प्रीतो यदशना वयं। यदन्नः पुरुषो भवति तदन्ना
स्तस्य देवताः। ततस्तेनैव मार्गेण प्रत्युत्तीर्य नराधिप। आरुरोह नरव्याघ्रो रम्यसानुं महीधरं। ततः
पर्णकुटीद्वारमागत्य जगतीपतिः। परिजग्राह पाणिभ्यामुभौ भरतलक्ष्मणौ। रुदीत्वा
राघवः सह सीतया। तेषां तु रुदतां शब्दं श्रुत्वा मेननसेनिकाः। अब्रुवंश्चापि रामेण संगतो भरतो ध्रु

ना। तेषामेव महाञ्छब्दः शोचतां पितरं मृतं। आश्रमं संपरित्यज्य सर्वेते निर्मुखाः स्वयं। अ
प्येवानस्समाजग्मुस्तथा वासं प्रधाविताः। अचिरं शोचितं रामं चिरविप्रोषितं तथा। इक्ष्वाकोभी

ज्ञन: सर्वो नगराम सहसाश्रमं । आरूढाणां त्वरितस्तो द्रष्टुकामः समागमं । वसुर्बहुविधैर्यानैस्त्वराविष्टाः समाकु
लाः अश्वैरन्यैर्गजैरन्यै रथैरन्यैः स्वलंकृतैः सुकुमारास्तथैवान्ये पद्भ्यामेव प्रदुद्रुवुः । सा भूमिर्बहुभिर्यानैः खुर
नेमिसमाहता । मुमोच विपुलं शब्दं द्यौरिवाभ्रसमागमे । तेन वित्रासिता नागाः करेणुपरिवारिताः ना
सहंतमुलं शब्दमन्यमुन्यं वनं चरन् । वराहमृगसिंहाश्च महिषाश्च वनेचराः व्याघ्रगोमायुसर्पाश्च वित्रेसुस्तैस्सहध्यैः
सह । रथांगसाह्वा दात्यूह हंसकारंडवप्लवाः तथा कोकिलसंघाश्च विसंज्ञा भेजिरे दिशः । तेन शब्देन वित्रस्तैः
काशं पक्षिनिर्वृतं । मनुष्यैरावृता भूमिरुभयं प्रबभौ तदा । तान्नरान्वाष्पसंपूर्णान् समीक्ष्य च सुदुःखितान् ।
पर्यष्वजत धर्मज्ञः पितृवन्मातृवच्च सः ॥ स तत्र कांश्चित्परिषस्वजे नरान्नराश्च केचित्तमथाभ्यवादयन् ।
चकार सर्वान्सवयस्यवान्धवान्यथार्हमासाद्य तदा नृपात्मजः ॥ ततः स तेषां रुदतां महात्मनां दिवं च खं चाव
नतादनिःस्वनः । गिरेः गुहाश्चैव दिशश्च नादयन् मृदंगघोषप्रतिमः सशुश्रुवे ॥ इत्यार्षे रामायणे । उदकदा
नेनाम सर्गः ॥ वसिष्ठः पुरतः कृत्वा दारान्दशरथस्य सः अभिचक्राम तं देशं रामदर्शनकांक्षया । राजप
त्न्यस्तु गच्छंत्यो नदीं मंदाकिनीं प्रति । ददृशुस्तां तदा सर्वा रामलक्ष्मणसेवितं । कौसल्या पुत्रपूर्णेन मुखेन प
रिशुष्यता । सुमित्रामब्रवीद्दीना याश्चान्या राजयोषितः इदं तेषामनाथानां शुभमक्लिष्टकर्मणां । वने प्राक्

केवलंतीर्थेयेतेनिर्विषयीकृताः इतःसुमित्रारामार्थंजलमादायवीर्यवान्। सद्यागच्छतिसौमित्रिर्ममपुत्रस्य
कारणात्। दुष्करंकृतंतेपुत्रः सुमित्रेत्तवधार्मिकः शुश्रूषतेचधर्मेणज्येष्ठंयोभ्रातरंवने। स्त्रीप्रधानेनयः
पित्राज्ञतोनेयवृद्धेन। स्वस्थ्यसानुजोरामःपत्नीतायासहभार्यया। एवंविलपमानासाकौसल्या
शोकविह्वला। ददर्शेंगुदीपिण्याकंनिर्वापंपुलिनेष्टतं। दक्षिणाग्रेषुदर्भेषुसदुःखेषुनिधापितं। अथ
रामंपितृमंत्रंभर्तृरासनलोचना। सार्थमिंगुदपिण्याकंदृष्ट्वादिव्यगदुःखिता। उवाचदेवीकौसल्यासर्वा
वादशरथस्त्रियः। इदमिक्ष्वाकुनाथस्यराघवेनमहात्मना। पितुर्यदिंगुदपिण्याकंस्वयंदत्तंयथा
हृतं। तस्यदेवसमस्येदंपार्थिवस्यमहात्मनः नैतदौपयिकंमन्येभुक्तभोगस्यभोजनं। चतुरन्तांम
हीभुक्त्वामहेन्द्रसदृशोविभुः कथमिंगुदपिण्याकंसभुंक्तेवसुधाधिपः अतोदुःखतरंलोकेनकिंचित्
प्रतिभातिमे। यत्ररामःपितुर्दत्तेनापस्याद्यन्नमोहितः। रामेणेंगुदपिण्याकंपितुर्दत्तंसमीक्ष्यवै। कथं
ममेदंहृदयंविदीर्येतनसहस्रधा। श्रुतिस्तुखल्वियंसत्यालौकिकीप्रतिभातिमे। यदन्नःपुरुषोभवति
तदन्नास्तस्यदेवताः। एवमार्तांसपत्नीभिस्ताभिराश्वासितातदा। ददृशुराश्रमपदंकौसल्याद्यास्तत्र
राघवः ततस्तेस्वस्वगृहंगत्वासर्वाःप्रतियोषितः अपश्यन्नाश्रमेरामंस्वर्गाच्युतमिवामरं। संयोगैः

राम
अयो०
२६९

श्री
२६९

संपरित्यक्तं रामं दृष्ट्वैव मातरः । आर्ता मुमुचुरश्रूणि सुखिताः शोककर्षिताः । तासां रामः समुत्थाय जग्राह चर
णाञ्छुभान् । मातॄणां पुरुषव्याघ्रः सर्वासामनुपूर्वशः । पाणिभिः सुखसंस्पर्शैर्मृद्वंगुलितलैः शुभैः । मूर्ध
न्याघ्रायत रामं कुः पार्थिवस्त्रियः सौमित्रिं चापि ताः सर्वाः समालिंग्य शोककर्षिताः । अन्वयवादयत्तश्च
क्रोदीनो रामादनंतरं । आशीर्वादैश्च रामस्य लक्ष्मणस्य तथैव च । देशकालानुरूपैश्च मातृभिः सम
योजितैः यथा रामस्तथा तस्मिन्सर्वा ववृतिरे स्त्रियः इतींदं इसमध्याज्ज्ञाते लक्ष्मणेऽश्रुमलक्षणे सीतापि
रुदतेनासां पादान्दृष्ट्वा सुदुःखिता । श्वश्रूणामस्तु पूर्णाक्षी सा बभूवाग्रतः स्थिता । तां परिष्वज्य कौस
ल्या मानाद्दुहितरं यथा । वनवासहृतां दीनामिदं वचनमब्रवीत् । विदेहराजस्य सुता स्नुषा दशरथस्य
च । रामपत्नी कथं दुर्गं वनं प्राप्तासि जानकि । पद्ममातपसंतप्तं परिक्लिन्नमिवोत्पलं । कांचनं रजसा
ध्वस्तं दिवा चंद्रमिवाश्रमं मुखं ते प्रेक्ष्य मां शोको दहत्यग्निरिवाश्रयं । सुखं त्वं वैदेहि व्यसनारणिसं
भवः । दहत्यग्नि मुखं कांते निस्तोयमिव पंकजं । ब्रुवंत्यामेव मातायां राजनंद्यां भरताग्रजः । पादावासा
द्य जग्राह वसिष्ठस्य महात्मनः ॥ ॥ पुरोहितस्याग्निसमस्य तस्य बृहस्पतेरिंद्र इवामराधिपः । निपी
ड्य पादौ सुसमिद्धतेजसः सहैव तेनोपविवेश राघवः ॥ ॥ तत्रोपविष्टेन च तेन तं मंत्रिभिः पुरस्य धाते

श्च सहैव सैनिकैः गुहेन धर्म्मज्ञतमेन धर्मवित्सहोपविष्टः समुपेत्य राघवः । ३ थोपविष्टे भ्रातृश्रेष्ठे वबीरं
ततः स धर्मेण सहैव राघवः प्रियोऽवदंतं भरतः कृताञ्जलिर्यथा महेंद्रः प्रयतः प्रजापतिम् । किमेव
वाक्यं भरतोऽद्य राघवं प्रणम्य सत्कृत्य च भाषिुवक्ष्यति । इतीव तस्यार्थजनस्य तत्त्वतो बभूव कौतूहल
मंतदा । स राघवः सत्यधृतिश्च लक्ष्मणो महानुभावो भरतश्च धर्मवित् । वृताः सुहृद्भिः प्रविरेजुरोजसा
यथा सदस्यैर्ज्वलितास्त्रयोऽग्नयः । ॥ इत्यार्षे रामायणेऽयोध्याकांडे सप्तसप्ततितमो नाम सर्गः ॥
अथोपविष्टं ध्यायंतं रामं भ्रातृनि संसदि । उवाच भरतस्तत्र धार्मिको धार्मिकं वचः १ प्रोक्षितेमा य
त्नमात्रा पापं मत्कारणोत्कृतं । तद्युद्धानन दिष्टं मे प्रसीदन्तु भवान्मम २ धर्मबद्धेन बद्धोस्मि येन स्थो
नेहमानवै । हन्मि तीव्रेन दंडेन दंडार्हामपकारिणीम् । कथं दशरथाज्जातः शुद्धाभिजनकर्मवान् । अ
हं न्याय्य व्यवज्ञातुः कुर्यां कर्म विगर्हितं । गुरुः क्रियावान्वृद्धश्च राजा प्रेतः पितेति च । तातं च ते न गर्हामि
दैवतं च परं मम ५ धर्मार्थी मात्रा हि को हीनमीदृशं कर्म गर्हितं । स्त्रियाः प्रियचिकीर्षार्थं कुर्यां धर्मज्ञ धर्मवित् । श्री
अंतकाले हि भूतानि मुह्यंतीति नृप श्रुतं । राज्ञो पवाहितालोके प्रत्यक्षा सा श्रुतिः कृता ७ तस्येतं म
ति संमोहमंतकाले समुद्भवं । तातस्य मम मतिक्रांतेयः साधु तत्क्रतेसुतः । ८ तदपत्यमिति प्रोक्ता सम न्प

राम
अ॰का
२७०

२७०

त्यमतोऽन्यथा । न दपत्त्वं भवानस्तु मार्गं साधुनिषेवितं ॥ १९ ॥ कैकेयीं पितरं मां च सुहृदो बांधवांश्च नः
पौरजानपदान्सर्वांस्त्यक्त्वा यस्त्वं सकलानिमान् ॥ २० ॥ क्व चारण्यं क्व च क्षत्रं क्व जटाः क्व च पालनं । इदं व्या
हतात्मकं कर्म न भवान्कर्तुमर्हति ॥ २१ ॥ अथ क्लेशजमेव त्वं धर्मं चरितुमिच्छसि । संरक्षंश्चतुरो वर्णांस्त्वं
क्लेशमवाप्नुहि ॥ २२ ॥ चतुर्णामाश्रमाणां हि गार्हस्थ्यं श्रेष्ठमाश्रमं । आहुर्धर्मज्ञ धर्मज्ञास्तं कथं त्यक्तुमि
च्छसि ॥ २२ ॥ त्वत्तश्च बुद्ध्याज्ञानेन जन्मनाप्यवरो ह्यहं । स कथं पालयिष्यामि मेदिनीं त्वयि तिष्ठति । हीन
बुद्धिबलो बालो हीनज्ञानस्तथैव च । भवंतं च विना भूप न वर्तयितुमुत्सहे ॥ २३ ॥ इदं निखिलमव्यग्रं पि
त्र्यं राज्यमकंटकं । अनुशाधि स्वधर्मेण धर्मज्ञ सह बंधुभिः ॥ २४ ॥ इहैव त्वाभिषिंचंतु सर्वाः प्रकृतयस्त्वि
माः । ऋत्विजश्च वसिष्ठश्च आचार्या मंत्रकोविदाः ॥ २५ ॥ अभिषिक्तस्त्वमस्माभिरयोध्यागमनं कुरु । नि
क्षिप्य तरसा लोकान्मरुद्भिरिव वासवः ॥ २६ ॥ ऋणानि त्रीण्यपाकुर्वन्दुहृदः साधु दर्शयन् । सुहृदः सुख
यन्कामैर्वसंस्त्वत्र प्रशाधि नः ॥ २७ ॥ अद्य वै मुदिताः संतु सुहृदस्तेऽभिषेचने । अद्य भीताः पलायंतां दु
हृदस्तेऽभिषेचने ॥ २८ ॥ किल्बिषमपमानं च प्रमार्जस्व कुरुषर्षभ । अद्य तत्र भवाञ्छ्रेष्ठं च पितरं रक्ष किल्बि
षात् ॥ २९ ॥ धर्मो हि लोकपरः प्रोक्तः क्षत्रियस्याभिषेचनं । यो धर्मेण महाप्राज्ञ प्रजाश्च परिपालयेत् । २० ।
त्रिरसा त्वामियाचेऽहं ...करुणामयि । बोधवेषु च सर्वेषु त्वं हि विश्वमहेश्वरः । अथ मां प्रेषितं शो

न्वावनमेव भवानितः गमिष्यं निगमिष्यामि भवता सार्धमप्यहम्। ॥ २२ ॥ नष्टान्विजो मागधा सूतवं-
दिनः स्तुत श्रियावाद्यकल्पश्च मानवः। तथा ब्रुवंतं भरतं तं प्रत्युवाच रामस्तदा चित्रसहः २३
इत्यार्षे रामायणे ऽयोध्याकांडे भरतवाक्यं नाम सर्गः॥ ॥ स तथा भरतेनोक्तो रामो धर्मपथे स्थितः इद-
वचनमक्लीवं मध्ये परिषदोऽब्रवीत् १ आत्मनः कामकारोऽस्ति पुरुषोयमनीश्वरः। इतश्चेतरश्चैनं-
कृतांतः परिकर्षति २ सर्वे क्षयांता निचयाः पतनांताः समुच्छ्रयाः संयोगा विप्रयोगांता मरणां-
तं हि जीवितं ३ यथा फलानां पक्वानां नान्यत्र पतनाद्भयं। तथा नराणां जातानां नान्यत्र मरणाद्भयं
४ यथागारं दृढस्थूणं जीर्णं भूत्वावसीदति। तथैवसीदंति नरा मृत्युपाशवशंगताः ५ सहैव मृ-
त्युर्व्रजति सहा मृत्युस्तु तिष्ठति। गत्वा सुदीर्घमध्वानं सह मृत्युर्निवर्तते ६ अहोरात्राणि वर्तंते सर्वेषां प्रा-
णिनामिह। आयूंषि क्षपयंत्याशु ग्रीष्मे जलमिवांशवः आत्मानमनुशोच त्वं किमन्यमनुशोचसि।
आयुस्ते हीयते यस्य स्थितस्य व्रजतस्तथा ७ गात्रेषु वलयः प्राप्ताः श्वेताश्चैव शिरोरुहाः। जरया
पुरुषः क्षीणः किं हि कृत्वा सुखी भवेत् ९ नंदंत्युदित आदित्ये तथैवास्तमितेऽह्नि। आत्मनो ना-
वबुध्यंते पुरुषा जीवितक्षयं १० हृष्यंत्यृतुमुखं दृष्ट्वा नवं नवमिहागतं। ऋतूनां परिवर्तेन प्राणिनां
प्राणसंक्षयं ११ यथा काष्ठं च काष्ठं च समेयातां महोदधौ। समेत्य च व्यपेयातां स्थित्वा किंचित्क्षणांतरं

राम
अ० का०
२७२

राम
७२
१२

एवंभार्याश्चपुत्राश्चसुहृदश्चवसूनिच । समीत्यव्यवधीयंते ध्रुवंतेषांपराभवः तस्मात्पन्नः कथंशोचेद्यस्यना
स्तिव्यतिक्रमः । वयसः प्लवमानस्यस्रोतसोवानिवर्तिनः आत्माधर्मेनियोक्तव्यो धर्मज्ञेनविपश्चिता । ध
र्मात्मानः शुभैरिष्टैः क्रतुभिश्चाप्तदक्षिणैः २५ धर्मात्मानोगतः स्वर्गं पितृमान्त निषेवितं । भृत्यानांभ
रणंकृत्वाप्रजानांपरिपालनं २६ अर्थदानंचसाधुभ्यः पितानस्त्रिदिवंगतः इष्ट्वायज्ञैर्बहुविधैर्भोगां
श्चावाप्यकेवलं २७ उत्तमंचायुरासाद्यस्वर्गतोजगतीपतिः संजीर्णंमानुषंदेहंपरित्यज्यपितामम ।
२८ देवीगतिमनुप्राप्तेदिव्यलोकविहारिणि । तत्रनैवंविधः कश्चित्प्राज्ञः शोचितुमर्हति । २९ त्वद्वि
धोमद्विधोवापिश्रुतिमान्मतिमान्नरः एतेबहुविधाः शोकाविलापोरोदितंतथा । ३० विसर्जनीयाधी
रेणसर्वावस्थासुधीमता । असंशयंतथाशोकंमाशुचोवसतांपुरी । ३१ अथापित्रानियुक्तोऽसितद्धा
आकनरर्षभ । यत्राहमपितेनैवनियुक्तः पुण्यकर्मणा ३२ नदेवाहंकरिष्यामिपितुरार्यस्यशासनं । नम
याशासनंतस्यत्वावर्तयितुमरिन्दम । नत्वयासहितोमान्यो दैवतंपरमंपिता । सएवमुक्तोभरतोरामंव
चनमब्रवीत् ३४ किमयंनस्ताहशोलोकेराहत्योयमरिन्दम । नत्वांप्रव्यथयेद्दुःखंसुखंवापिप्रहर्षयेत् ।
३५ सम्मतश्चासिवृद्धानांशक्तानांकोकसामिव । यथामृतस्तथाजीवेयथाभूतितथासति ३६ कस्ये
मबुद्धिलाभः स्याद्यथात्वमनुजाधिप । एवंचव्यसनंप्राप्यनविषण्णस्त्वमर्हसि ३७ आसाद्यहिनिवर्तेत

संतापस्त्वामरिन्दम। अस्माकमिह काकुत्स्थ परस्त्रीरूपातिनः॥ २८ अहं तु रहितो धीमांस्त्वया दशरथेन च।
नजीविष्यामि दुःखानां नोक्तार्दिव्यहृतो यथा॥ २९ वसंतमार्यं सहलक्ष्मणेन सभार्यमार्यस्त्वमनाः समीक्ष्य। श
राणि नक्षत्र्यां विजनेष्वशाहं तथा काकुत्स्थ शथिवीश शाधि ३०॥ तथा तु रामो भरतेन तेन प्रचोद्यमानः त्रिदशो
महीपतिः मतिं न चक्रे गमनाय सत्ववान्स्थितः पितुर्वचने समीक्ष्य ३१ इत्यार्षे रामायणे अयोध्या
कांडे राम भरत संवादो नाम सर्गः ॥ पुनरेवं ब्रुवाणं तु भरतं भरताग्रजः उवाच रामो धर्मात्मा भरतं ध
र्मवत्सलं १ उपपन्नमिदं वीर त्वयि सर्वं नरर्षभ। यस्त्वं जातो दशरथात्कैकेय्यानंदवर्धनः ॥२॥
पुरा तात महाराजो मातरं ते समुद्वहन्। देवासुरे च संग्रामे जनन्यास्तव पार्थिवः पृष्टः प्रददौ राजा वरौ
दौ घोचितः ३ ततः सम्प्रतिश्रुत्य तव माता यशस्विनी। अयाचत नरश्रेष्ठं द्वौ वरौ वरवर्णिनी तव द्वौ
राज्यं नरव्याघ्र मम प्रव्राजनं तथा॥ ५ तद्वै राजा तदा तस्या नियुक्तः प्रददौ स्वयं। तेन पित्रा ममाप्यत्र नियो
गः पुरुषर्षभ ६ चतुर्दश वने वासस्तव वर्षाणि भूतले। सोहं वनमिदं दुर्गं निर्जनं लक्ष्मणान्वितः ७ स
राम सीतश्चागतो वीर सत्यवाक्ये स्थितः पितुः। भवानपि तथा क्षिप्रं पितरं सत्यवादिनं ८ कर्तुमर्हसि राजे श्री
अ॰ का॰ न्द्र शाधि राज्यमकल्मषं। ऋणान्मोचय राजानं कैकेय्यानंदवर्धन ९ पितरं त्राहि धर्मज्ञ मातरं चापि २२२
२२२ पालय। श्रूयते च पुरा तात श्रुतिर्गीता यशस्विना ॥१०॥ गयेन यजमानेन गयेष्वेव पितृन्प्रति।

पुंनाम्नो नरकाद्यस्मात्पितरं त्रायते सुतः । तस्मात्पुत्र इति प्रोक्तः स्वयमेव स्वयंभुवा । एष्टव्या बहवः
पुत्राः गुणवंतो बहुश्रुताः तेषां हि समवेतानां अप्येको गुणवान्भवेत् । २३ एवमूचुर्जनाः सर्वे श्रीमंतो
रघुनंदन । तस्माद्राजाहि नरश्रेष्ठ पितरं नरकात्त्रय ॥ अयोध्यां गच्छ भरत प्रकृतीरनुपालय । शत्रुघ्नसहि
तो वीर सह सर्वैर्द्विजातिभिः २५ प्रवेक्ष्यामि महारण्यं पमहं च मुनिभिः सह । आभ्यां च सहितो राजन्वै
देह्या लक्ष्मणेन च २६ त्वं राजा भरत भव स्वयं नराणां वन्यानामहमपि राजराण्मृगाणां । गच्छ त्वं पुरव
वरां प्रसंप्रहृष्टः शांतात्मा त्वहमपि दंडकान्प्रवेक्ष्ये २७ छायां ते दिनकरभाः प्रबाधमानं सच्छत्रं भर
त करोतु मूर्ध्नि छत्रं । एतेषामहमपि काननद्रुमाणां छायां तामतिशयिनीं समाश्रयिष्ये २८ शत्रुघ्नः
कुशलमतिस्तु ते सहायः सौमित्रिर्मम विदितः प्रधानमित्रं । चत्वारस्तनयवरा वयं नरेंद्रं सत्यस्थं
भरत चराम मा विषीद ॥ २९ ॥ इत्यार्षे रामायणे ऽयोध्याकांडे रामवाक्यं नाम सर्गः ॥ ॥
आश्वासयंतं भरतं जाबालिर्ब्राह्मणोत्तमः । उवाच रामं धर्मज्ञं धर्मापेतमिदं वचः । १ साधु राघव मा
ते भूद्बुद्धिरेवं निरर्थिका ॥ प्राकृतस्येव धीरबुद्धेस्तपस्विनः । २ कः कस्य पुरुषो बंधुः किंकार्यं
केन कस्यचित् । एको हि जायते जंतुरेक एव विनश्यति ३ तस्मान्माता पिता चेति प्रसज्जेत समाचरे ।

रामा

रत्नमस्तु सा विज्ञेयो योग्यत्र ज्ञानानि वैनरः ॥ ताथायामंतरंगं छन्नरः कस्मादपि कचित् । अत्नरज्यमतम ।
प्रतिष्ठेत यावस्थानि । एवमेवमस्तु यत्प्राणो पितामातागृहं वेस्तु । आवासमात्रं का ऽस्य तत्र मज्ञानि वैनरः
निरर्थं जनमस्तु रज्यमनादसि नरो त्वम । असितं विषमं दुर्गं विपिनं बहुकण्टकं । समृद्धायामयोध्याया
मात्मानमभिषेचय । एकवेणीधरा कि त्वं नगरी संप्रतीक्षते ॥ १९ ॥ राज्यभोगाननुभवन्महात्मन्पार्थिवो
भव । विहरत्वमयोध्यायां यथा शक्रस्त्रिविष्टपे ॥ २० ॥ न ते कश्चिद्दशरथस्त्वं च तस्य न कश्चन । अन्यो
राजा त्वमप्यन्यस्तस्मात्कुरु यदुच्यसे । २१ गतः स नृपतिस्तत्र गंतव्यं तेन तत्र वै । प्रवृत्तिरेषा भूतानां
त्वं तु मिथ्या विहन्यसे २२ परलोकगतानां ये ते तान् शोचति को नरः । ते हि दुःखं परिप्राप्य विना
शं प्रेत्य ते गताः २३ अष्टकापितृदैवत्यमित्येवं प्राशितो जनः । अन्नस्योपद्रवं पश्य मृतो हि किमशिष्य
ते २४ यदि भुक्तमिहान्येन देहमन्यस्य गच्छति । दद्यात्प्रवसतः श्राद्धं नास्य पाथेयमाहरेत् । दानसंत्वप
शास्त्रे ते ग्रन्थाः सेवाविधिः शतः । यजस्व देहि दीक्षस्व तपस्तप्यस्व संत्यज । अनास्तिकापराभवं अतस्तु
द्धिं महामते । प्रत्यक्षं यत्तदातिष्ठ परोक्षं पृष्ठतः कुरु । २७ अश्रूयमाणः पुनः कथं तेजा निशम्य तत्
न्नास्तिकवाक्यमस्तु त्वमे । अथाब्रवीत्तं नृपतेस्तनूजो विगर्हमाणो वचनानि तस्य । २८ त्वन्नाज्ञ
नः पूर्वतराः परे च बहूनि कर्माणि शुभानि चक्रुः ॥ जित्वा सदेमं च परं च लोके कस्मात्त्वमत्रास्ति

राम
अका
१७३

श्री
३

कृतंच । निंदाम्यहंकर्मपितुः कथंतुयस्त्वामगृह्णाद्विषमस्थबुद्धिं । बुद्ध्यानयैवंविधयाचरंतंसुनास्ति
कंधर्मपथादपेतम् ॥ २० ॥ ननस्तुजाबालिकद्वीर्याशामग्रायरतोहृपेद्दृशोलोहितार्घ्ने । उवाचवाक्यंस्त्वदु
हर्वमन्यद्यथातुद्दरुपंपरमार्थवच्च ॥ २१ ॥ ननास्तिकानांवचनंब्रवीम्यहंस्त्वयस्त्वधर्मंतुकालिः समागतः
सचापिकालोयमुपागतः शनैर्यथाचनन्नास्तिकवाक्यमीरितं ॥ २२ ॥ निवर्तनार्थंतवपार्थिवात्मज
प्रसीदप्रथ्यस्त्वगुरुन्निहस्थितात्र ॥ २३ ॥ इत्यार्षेरामायणेऽयोध्याकांडेजाबालिवाक्यंनामसर्गः ॥
जाबालेस्तुवचः श्रुत्वारामः सत्यपराक्रमः । उवाचपरयाबुद्ध्यास्वनः सत्याभिपन्नया । प्रियोकामे
प्सुमामेवमिदंवचनमब्रवीः । अकार्यंकार्यसंकाशमपथ्यंपथ्यसंमितं । निर्मर्यादस्तुपुरुषः पा
पाचारसमन्वितः मानंनलभतेसत्सुभिन्नचारित्रसेवनात् । कुलीनमकुलीनंवानरंपुरुषमानिनं ।
चारित्रमेवव्याचष्टेशुभंवायदिवाशुभं । अनार्यश्चार्यशीलश्चशौचहीनस्तथाशुचिः निर्लक्षणोल
क्षणवान्दुःशीलःशीलवानपि ॥ अधर्मंधर्मरूपेणमलिनंलोकसंकरे । अभिपत्स्येहिविधिंत्यक्त्वाक्रि
याविधिविवर्जितं । कश्चेतयानः पुरुषः कार्याकार्यविचक्षणः बहुमंस्यतिमांलोकोदुर्वृत्तंकल
षांसनं ॥ कस्याधास्याम्यहंनद्यांकालमुद्यमन्यपाणिना । मिथ्यावाक्यंपितुःकृत्वाहीनश्चैवप्रति
ज्ञया ॥ राजवृत्तमिदंचैवंकेवलंसमुपवर्तते । यद्वृत्तः संतिराजानस्तद्वृत्ताः संतिवैप्रजाः सत्यमेवानृशंसा

सांजुष्टंतंसनातनं। तस्मात्सत्यात्मकंराज्यंसत्येलोकाः प्रतिष्ठिताः ऋषयश्चैवदेवाश्चसत्यमेवसमासते। स
त्यवानेवलोकेस्मिन्प्रतिगच्छतिसंभातिश। उद्विजन्तियथासर्पान्नरानानृतवादिनः। धर्मसत्यपरोलोकेमू
लंधर्मस्यसत्यता॥ २३॥ सत्येसर्वेस्थितंलोकेसत्येश्रीर्नियतास्थिता। देवाः सत्यप्रतिष्ठानास्तस्मात्सत्यपरो
भव॥ २४॥ दत्तमिष्टंहुतंचैवतपांसियज्ञाश्चकेवलाः सत्यमूलानिसर्वाणिप्रोक्तानिमुनिसत्तम। एकः पालयतेलो
कानेकः पालयतेकुलं। मज्जत्येकोपिनरकेएकः स्वर्गेप्रमोदते। सोहंपितुर्निदेशंतुकथमुत्सष्टुमुत्सहे। स
त्यप्रतिश्रवः सत्यंसत्येनास्मिवशीकृतः॥ २५॥ नैवलोभान्नवैमोहान्नचाप्यज्ञानसमन्वितः। सेतुंसत्यस्यभे
त्स्यामिगुरोः सत्यप्रतिश्रवं॥ २६॥ असत्यसंधस्यसतश्चलस्यास्थिरचेतसः। नैवदेवानपितरः प्रतीच्छन्तीतिनः
श्रुतं २७ कायेनकुरुतेपापंमनसासंप्रधार्यच। अनृतंपालयेत्सत्यं विहितंकर्मपावक। लोकेकीर्ति
यशोलक्ष्मीःपुरुषाः प्रार्थयंतिहि। स्वर्गार्थमनुरुध्यंतेस्वर्गमेवव्रजंतिच॥ २९॥ श्रेयोहितदकार्याणांयद्भवानव
धारयेत। अस्वर्ग्यैरहितैर्वाक्यैः कुर्वंस्त्वमभिभाषसे॥ ३०॥ कथंह्यहंप्रतिज्ञायवनवासमिमंगुरोः भरतस्य
करिष्यामिवचोहित्वागुरोर्वचः॥ ३१॥ मयायदाप्रतिज्ञातापतिज्ञाह्यथतोगुरोः प्रहृष्टवदनादेवीकैकेयी
त्वभवत्तदा॥ ३२॥ वनवासंवसन्नेवंशुचिर्नियतभोजनः मूलैःपुष्पैःफलैश्चैवपितॄन्देवांश्चतर्पयन्॥ ३३॥
संहृष्टपंचवर्गोहिलोकयात्राप्रवर्तकः अद्रोहः श्रद्धानश्चकार्याकार्यविशारदः॥ ३४॥ कर्मभूमिमिमांप्रा

श्रीराम
अ॰का॰
३५४

श्री
३५४

कर्तव्यं कर्म यत्कृतं । अग्निर्वायुश्च सूर्यश्च कर्मभिर्दिवि तिष्ठते ॥ २५ ॥ शतं क्रतूनामाहृत्य देवराजो दिवं गतः । तपां
स्युग्राणि चादाय सिद्धाः स्वर्गमुपस्थिताः ॥ २६ ॥ धर्मे रताः सत्यपरास्तु संतस्तेजस्विनो ह्यात्मगुणप्रधानाः । अहिंस
का वीतमलाश्च लोके स्वर्गेन तीर्णा भवसागरं ते ॥ २७ ॥ सत्यं च दानं च पराक्रमश्च भूतानुकंपा प्रियवादिता च ।
द्विजातिदेवातिथिपूजनं च पंथानमाहुस्त्रिदिवस्य विप्राः ॥ २८ ॥ इत्यार्षे रामायणे नामवाक्यं नाम सर्गः ॥
॥ क्रुद्धमाज्ञाय रामं तु वसिष्ठः प्रत्यभाषत । जाबालिरपि जानाति लोकस्यास्य गतागतिं ॥ १ ॥ नि
वर्तयितुकामस्त्वमेतद्वाक्यमथाब्रवीत् । इमां लोकसमुत्पत्तिं लोकनाथ निबोध मे ॥ २ ॥ पूर्वं सलिल
मेवासीत्पृथिवी यत्र निर्मिता । ततः समभवद्ब्रह्मा स्वयंभूर्दैवतैः सह ॥ ३ ॥ स वराहस्ततो भूत्वा प्रोज्जहार
वसुंधरां । असृजच्च जगत्सर्वं सह पुत्रैः सह महर्षिभिः ॥ ४ ॥ आकाशप्रभवो ब्रह्मा शाश्वतो नित्य अव्ययः ।
तस्मान्मरीचिः संजज्ञे मरीचेः कश्यपः सुतः ॥ ५ ॥ ससर्ज्जांगिरसं ब्रह्मा प्रचेतसमथांगिराः । मनुः प्रचेतसः
पुत्र इक्ष्वाकुस्तु मनोः सुतः ॥ ६ ॥ यस्येयं प्रथमं दत्ता समृद्धा मनुना मही । तमिक्ष्वाकुमयोध्यायां राजानं
विधिपूर्वकं ॥ ७ ॥ इक्ष्वाकोस्तु सुतः श्रीमान्विकुक्षिरिति विश्रुतः । कुक्षेरथात्मजो वीरो विकुक्षिः स
मपद्यत ॥ ८ ॥ विकुक्षेस्तु महातेजा बाणः पुत्रः प्रतापवान् । अनरण्यस्तु पुत्रो ऽभूद्बाणस्यामिततेजसः ॥
९ ॥ नानावृष्टिरभूत्तस्मिन्न दुर्भिक्षं कथंचन । अनरण्ये महाभागे तस्करो वै न कश्चन । अनरण्यान्महा

...र्यो तेजाः पुत्रः शंकुर्जायत । तस्मात्त्रय्योरुणो नाम त्रिशंकुः समुदपद्यत । १० त्रिशंकोरभवत्सूनुर्धुन्धुमारो महा-
यशाः धुन्धुमारान्महाबाहुर्युवनाश्वो भवत्सुतः । ११ युवनाश्वसुतश्चापि मान्धाता सत्यसंगरः । मान्धा-
तुस्तु महातेजाः सुसंधिरुदपद्यत १२ सुसंधेरपि पुत्रौ द्वौ ध्रुवसंधिः प्रसेनजित् । यशस्वी ध्रुवसंधेस्तु भरतो
नाम धर्मवित् १३ भरतात्तु महाबाहुरसितः समजायत । तस्य प्रतिराजान उदपद्यन्त शत्रवः । १४ हैह-
यास्तालजंघाश्च शूराश्च शशबिंदवः । तांस्तु स प्रतियुध्यन्वै युद्धे राजा क्षयं गतः । १५ द्वे चास्य नार्यौ गर्भि-
ण्यौ बभूवतुरिति श्रुतिः । ततः शैलवरं रम्यं तपस्याभिरतो मुनिः १६ भार्गवः च्यवनो नाम हिमवन्तमुपाश्रितः
तमृषिं चाप्युपागम्य गर्भं देवी न्यवेदयत् १७ सत्तामप्यवदद्विप्रो वरे पुत्रजन्मनि । ततः सा गृहमागम्य
देवी पुत्रं व्यजायत १८ ॥ सह तेन गरेणैव ततः स सगरोऽभवत् । ऐक्ष्वाकः सगरो नाम यः समुद्रमखानयत् १९
तं क्षणपर्वणि वेगेन त्रासयन्तमिमाः प्रजाः । असमंजस्तु पुत्रोऽभूत्सगरस्येति नः श्रुतं । २० जीवन्नेव पितस्तु
सह पिंडापकर्म्महात् । अंशुमान्नाम पुत्रोऽभूद्वीर्यवानसमंजसः २१ दिलीपोंऽशुमतः पुत्रो दिलीपस्य भगी-
रथः । येन भागीरथी गंगा त्रिदिवादवतारिता । भगीरथात्तु काकुत्स्थः काकुत्स्थेन तु च्यवसेयत । काकुत्स्थस्य
च पुत्रोऽभूद्रघुर्येनासि राघवः । २३ रघोस्तु पुत्रस्तेजस्वी सौदासः पुरुषादकः । योगविन्निः सहसंयामी बल-
वान्महाबलः २४ युध्यमानो निहत्यारी सह सैन्यो निवर्तते । बड्डीसस्य पुत्रोऽभूद्दे ... महाद्युतिः ॥ २७५

राम
अयो०
२६५

अंबरीषस्य पुत्रस्तु नहुषः सत्यसंगरः नहुषस्य तु पुत्रोभूद्ययातिरिति विश्रुतः ॥ २६ ॥ ययातेरपि धर्मात्मा राजाद
नाभागः सुतः तस्य पुत्रोसि वै ज्येष्ठो रामश्रीत्यभिविश्रुतः ॥ २७ ॥ इति ष्टद्यीश्वूराज्यंन्ते मवेक्षस्व जगत्पते । इक्ष्वाकू
णां तु सर्वेषां राजा भवति पूर्वजः ॥ २८ ॥ पूर्वजेनावरः पुत्रो राज्ये समभिषिच्यते ॥ २९ ॥ स राघवे मवनवंशामात्मनः
सनातनं नाद्य विहातुमर्हसि । प्रभूतरत्नामनुशाधि मेदिनीं प्रभूतराज्यां पितृवन्महायशाः ॥ ३० ॥ इत्यार्षे रामाय
णे वसिष्ठवाक्यं नाम सर्गः ॥ वसिष्ठस्तु तदा राममुक्त्वा राजपुरोहितः अब्रवीद्धर्मसंयुक्तं पुनरेवापरं वचः ॥ १ ॥ पुरुष
स्येह जातस्य भवन्ति गुरवस्त्रयः । आचार्यश्चैव काकुत्स्थ पिता माता च ते त्रयः ॥ २ ॥ पिता जनं जनयति माता संवर्धयत्यपि ।
प्रज्ञां ददाति चाचार्यस्तस्मात्स गुरुरुच्यते ॥ ३ ॥ स तेहं पितुराचार्यस्तव चैव महाद्युते । मम त्वं वचनं राम नातिक्रमितुमर्हसि ।
॥ ४ ॥ वृद्धाया धर्मशीलाया मातुर्नार्हस्यवर्तितुं । अस्यास्तु वचनं कुर्वन्सतां पंथानमाव्रज ॥ ५ ॥ भरतस्य वचः कुर्वन्याचमानस्य राघव
। अस्यास्तु वचनं कुर्वन्याचंत्या रघुनंदन । नात्मानमतिवर्तेथाः सत्यधर्मपरायण ॥ एवं मधुरमुक्तः स गुरुणा राघवः स्वयं ॥ ७ ॥
प्रत्युवाच तमासीनं वसिष्ठं पुरुषर्षभः । मातापित्रोर्यथा नित्यं सम्यग्वृत्तिर्मानवाः न सुप्रतिकरं तत्तु मात्रा पित्रा च यत्कृतं ।
यथाशक्तिप्रदानेन स्नापनाच्छादनादिना ॥ ९ ॥ नित्यं च प्रियवादेन तथा संवर्धनेन च । राजा तु दशरथस्तत्र तथा जनयिता मम ।
१० संश्रुतं यन्मया तस्य न तन्मिथ्या भविष्यति । एवमुक्तो नु रामेण भरतस्तं ददर्श नरं ॥ ११ ॥ उवाच चलितोत्सुकः सूतं परमदुर्मनाः ।
इह मे स्थंडिले शीघ्रं कुशानास्तर सारथे ॥ १२ ॥ आर्यं प्रत्युपवेक्ष्यामि यावदार्यः प्रसीदति । निराहारो निरालंबो धनहीनो यथा द्विजः ॥ १३

पुनः शयिष्ये शाय्यायां वनं यावन्न यास्यति । स तु राममवेक्षन्तं सुमन्त्रं प्रेक्ष्य दुर्मनाः ॥ २४ ॥ कुशास्तीर्णमुपस्थाप्य भूमावेवास्तरत्स्व यं ।
तमुवाच महातेजा रामो राजीवलोचनः ॥ २५ ॥ किं मां भरत कुर्वाणं मिहृश्यत्युपवेक्ष्यसे । ब्राह्मणो ह्येकपार्श्वेन स्वयमस्त्रीयं संविशे
त् ॥ २६ ॥ न तु मूर्धाभिषिक्तानां विधिः प्रत्युपवेशने । उत्तिष्ठ नरशार्दूल हित्वैतद्दारुणं व्रतं ॥ २७ ॥ पुरवर्यः सितः क्षिप्रमयोध्यामि
तो याहि राघव । आसीनस्त्वेव भरतः पौरजानपदं जनं ॥ २८ ॥ उवाच सर्वतः प्रेक्ष्य किमार्यं नानुशासथ । ते तदूचुर्महात्मानं पौरजा
नपदा जनाः ॥ १९ ॥ अभिजानीमः काकुत्स्थं सम्यग्वदति राघवः । पितुर्यथा महाभागो वचने तिष्ठति ध्रुवं ॥ २० ॥ अनिच्छवाक्तुसे
त्वेनं विवर्तयितुमोजसा । तेषां वचनमाज्ञाय रामो वचनमब्रवीत् ॥ २१ ॥ एतन्निबोध वचनं सुहृदां धर्मचक्षुषां । एतच्चैवमदक्ष सु
त्वा सम्यक्संपश्य राघव ॥ २२ ॥ उत्तिष्ठ त्वं महाबाहो मां स्पृश त्वं तथोदकं । अथोत्थायायजलं हृष्टा भरतो वाक्यमब्रवीत् ॥ २३ ॥ शृ
ण्वन्तु मे परिषदो मन्त्रिणः श्रेणयस्तथा । न याचे पितरं राज्यं नाहं शोचामि मातरं ॥ २४ ॥ आर्यं परमधर्मज्ञं नानुजानामि राघवं ।
यदि त्ववश्यं गन्तव्यं कर्तव्यं वचनं पिता ॥ २५ ॥ अहमेव निवत्स्यामि चतुर्दश समा वने । धर्मात्मनः स तेनाथ भ्रातुर्वाक्येन विस्मितः
॥ २६ ॥ उवाच रामः संप्रेक्ष्य पौरजानपदं जनं । विक्रीतमाहितं क्रीतं यत्पिता जीवता मम ॥ २७ ॥ न तत्कोपयितुं शक्यं मया वा भरतेन
वा । उपाधिर्न मया कार्यो वनवासे जुगुप्सितः ॥ २८ ॥ अनुयोक्तं हि कैकेय्या पित्रा मे सुकृतं कृतं । जानामि भरतं क्षान्तं गुरुस
त्कारकं ॥ २९ ॥ सर्वमेवात्र कल्याणं सत्यसंधे महात्मनि । अनेन धर्मशीलेन वनात्प्रत्यागतः पुनः ॥ ३० ॥ भ्रात्रा सह भ
विष्यामि पृथिव्यामहमीश्वरः । वृतं हि मातुः कैकेय्या वचनं तन्मया कृतं ॥ ३१ ॥ अनृतान्मोचयानेन पितरं तं महामतिं ।
आसीत्पित्रा नियुक्तं चेतस्य नातिव्यतिक्रमः ॥ ३२ ॥ इत्यार्षे रामायणे रामभरतयाचनं नाम सर्गः ॥ अथ तं देवामा

श्रीरामा
अयो
२७६

श्री
२७६

गन्धर्वगंधर्वसहिताद्विजाः आगतौ तौ महावीरौ काकुत्स्थौ प्रशशंसिरे २ धन्यः सत्यस्य पुत्रौ वां धर्मज्ञौ सत्यविक्रमौ ।
श्रुत्वा वां तातसंभाषं तु मान्यां स्पृहयामहे ॥ ३ ॥ ततो देवगणाः सर्वे दशार्थी विवर्धिषिणः भरतं राजशार्दूल मित्युक्त्वा सं
गताः मिथः ३ सोमो भरत सिद्धार्थ निवर्तस्व च स्वतो लब्धं । देवकार्यमशेषेण कर्तव्यो राघवेन वै ॥ ४ ॥ रामो थ लक्ष्मणः सी
तासु रवेन वनचारिणः । आविमिश्च स्वचतुध्याता वेनैवन्त्यं पतिवैव्रया ५ राजर्षयश्च धर्मज्ञः स्वंस्वंस्थानं ततो गताः
ड्रादितास्ते नवाक्येन शुभेन शुभदर्शनः ६ रामः संहृष्टवदनस्तानृषीनभ्यवादयत् । रुस्तगात्रस्तु भरतो वाचा
संसज्जमानया ॥ ७ कृताञ्जलिरिदं वाक्यं राघवं पुनरब्रवीत् । राजधर्ममिमं प्रेक्ष्य कुलधर्मानुसन्तति ॥ ८ कर्तुमर्ह
सि काकुत्स्थ मम मातुश्च याचनं । रक्षितुं सुमहद्राज्यमहमेकस्तु नोत्सहे ९ पौरजानपदांश्चापि रक्तानाडंरंजयितुं
नृप । ज्ञातयश्चैव योधाश्च मित्राणि सुहृदश्च नः ॥ १० त्वामेव प्रतिकांक्षंते पर्जन्यमिव कार्षकाः इदं राज्यं महाप्रा
ज्ञ प्रतिपद्यस्व सर्वतः ॥ ११ शक्तिमानसि काकुत्स्थ लोकस्य परिपालने । पादयोरपतद्भ्रातुर्भरतो थ प्रसादय
न् १२ भृशमाभाषयामास राममेवं प्रियंवदः तमंके भ्रातरं कृत्वा रामो वचनमब्रवीत् ॥ १३ ॥ श्यामं नलिनपत्रा
क्षं कृसवत्सुस्वनः स्वयं । इयं ते याहृशी बुद्धिः स्थिरा विनयसंभृता ॥ १४ ॥ भ्रातमुत्सेहोत्वंनां रक्षितुं पृथिवी
मिमां । अमात्यैश्च सुहृद्भिश्च बुद्धिमद्भिश्च मंत्रिभिः ॥ १५ ॥ सर्वकार्याणि संमंत्र्य कारयेस्त्वं सदानघ । लक्ष्मीश्चं
द्रादपेयाद्वा हिमवान्वा परित्यजेत् १६ सागरो वा त्यजेद्वेलां न प्रतिज्ञामहं त्यजे । कामाद्वा यदि वा लोभान्मात्रानेयादिदत्तेन ॥
॥ १७ ॥

अथ

नेतव्यमनसिकर्तव्यं [..]तितव्यं च मात्वयत् । एवमुक्ताणं रामं तु वसिष्ठो वाक्यमब्रवीत् २८ तेजसादित्यसंकाशं
प्रतिभाने धनुष्मतां । अयच्छ पादुके पुत्र भरताय महात्मने । २९ एतौ हि सर्वलोकस्य योगक्षेमं करिष्यतः । इत्युक्तः
स वसिष्ठेन रामो प्यादाय पादुके । ३० प्रायच्छत्प्रीतिमान्भ्रात्रे भरताय महात्मने ॥ स पादुके ते भरतः प्रतापवान्स्वद
नुरूपे प्रति[गृह्य ह]र्षवित् । प्रदक्षिणं चैव चकार राघवं चकार चैवोत्तमनागमूर्धनि २१ अथानुपूर्व्यात्प्रतिपूज्य
तं जनं गुरूंश्च मंत्रिप्रकृतीस्तथानुजान् । व्यसर्जयद्राघववंशवर्धनः स्थितः स्वधर्मे हिमवानिवाचलः ३२
तं मातरो वाष्पगृहीतकंठ्यो दुःखेन नामंत्रयितुं न शेकुः । स एव मातॄरभिवाद्य सर्वा रुदन्कुटीं स्वं प्रविवेश
रामः ॥ ॥ इत्यार्षे रामायणे भरतप्रतियानं नाम सर्गः ॥ ततः शिरसि कृत्वा तु पादुके भरतस्तदा । आरु
रोह रथं हृष्टः शत्रुघ्नेन समन्वितः २ वसिष्ठो वामदेवश्च जाबालिश्च दृढव्रतः । अग्रतः प्रययुस्तस्य मंत्रिणः सर्व
एव ते नदीं मंदाकिनीं प्राप्य प्राङ्मुखः प्रययुस्ततः । प्रदक्षिणं च कुर्वाणश्चित्रकूटं महागिरिं । ३ तस्य धातुस
हस्राणि रम्याणि गिरिसानुषु । व्यतियांतोन्वपश्यंस्तु ततस्तस्यानुयायिनः । ४ अंतरा चित्रकूटस्य ददर्शाम्र
तस्ततः । आश्रमं यत्र स मुनिर्भरद्वाजः कृतालयः । स तमाश्रममासाद्य भरद्वाजस्य बुद्धिमान् । अवतीर्य र
थात्पादौ ववंदे कुलनंदनः । ६ हृष्टस्तु भरद्वाजो भरतं वाक्यमुवाच ह । अपि कृत्यं कृतं तात रामेण च समा
गतः । ७ एवमुक्तस्तु भरतो भरद्वाजेन धीमता । प्रत्युवाच भरद्वाजं धर्मिष्ठो धर्मवत्सलं । स याच्यमानो पि गु
रुणा मया स दृढनिश्चयः । राघवः परमप्रीतस्ततो वाक्यमब्रवीत् ९ पितुः प्रतिज्ञां धर्मेण पालयिष्यामि

रामा
अका
२७७

श्री
२७७

येनर्द्देशादिव्यचाणिप्रतिरायापुराशना। एवमुक्तोमहातेजाः वसिष्ठःप्रत्युवाचतं ॥२२ वाक्यार्थंवाक्यज्ञवाल्मीकः
वेवचनेमहत्। एतत्प्रयत्नसंहृष्टः पादुकेस्वर्णभूषिते॥२३ अयोध्यायांनव्याहृयोगक्षेमायराघव। एवमुक्तोवसिष्ठेन
राघवःशत्रुघ्नःस्थित॥२४ चपादुकेचरणेविशतेममराज्ञायावेददौ। निवृत्तोहमनुज्ञातोरामेणविदितात्मना॥२५
अयोध्यामेवगच्छामिगृहीत्वापादुकेशुभे। एतच्छ्रुत्वाशुभंवाक्यंभरतस्यमहात्मनः॥२६ भरद्वाजस्ततःशुभंवाक्य
मथाब्रवीत्। नाश्चर्यमिदंराजेंद्रशीलवृत्तवतांवर॥२७ यदुक्तंत्वयितिष्ठेतराजपुत्रमहाबल॥ नस्तुतःसमहाभागः
पितादशरथस्तव॥२८ यस्यत्वमीदृशःपुत्रोधर्मात्माधर्मवत्सलः। नश्चषिंभरतःश्रीमान्उक्तवाशशताञ्जलिः॥२९
आमंत्रयितुमारेभेचरणावुपगृह्यह। ततःप्रदक्षिणीकृत्यभरद्वाजंमहामुनिं॥३० भरतःप्रययौश्रीमानयोध्यांसह
मंत्रिभिः नागैश्चव्राकरैश्चैवरथैर्यानैश्चसाचरः॥३१ पुनर्निवृत्ताविस्तीर्णांभरतस्यानुयायिनी। ततस्त्रिपथगांगां
दिव्यांपुण्यपयोनोर्मिमालिनीं॥३२ ददर्शुस्तेपुनःसर्वेगंगांशुभ्रजनाश्रितां। तांतत्रक्रमकराकीर्णांमुत्तीर्यसहबंधु
भिःशृंगवेरपुरंरम्यंप्राविशत्ससैनिकः॥ शृंगवेरंगतश्चायोध्यांसद्रुर्धर्षकं। भरतोदुःखसंतप्तःसारथिंतम
थाब्रवीत्। मास्यपश्यमेरामभद्रोध्यांशून्यकाननां॥३४ निराकारांनिरानंदांदीनांप्रतिहतस्वनां। विषुक्तां
मुक्तपेंद्रेणसुमन्तेनमहात्मना॥३५ रात्रांदशरथेनेहनोत्सहेप्रतिवीक्षितुं॥ अथसैरामाद्यणेभरतनिवर्तनंना
मसर्गः॥ क्षिप्रंयमुनेश्रेष्ठोपेनस्यंदनेनोपयात्प्रभुः अयोध्यांभरतःक्षिप्रंप्रविवेशमहायशाः मार्जारोल्

कावरिनां मलिनांबरधारिणीं । तिमिराभ्याहतां कालीमप्रकाशां निशामिव २ राहुग्रस्तां चंद्रपत्नीं श्रियां प्रच्छ-
ल्लितामिव । गृहेनाम्बुदितामेकां रोहिणीं पीडितामिव ३ अल्पमुक्तस्वल्पसलिलां ह्रदस्वरविहंगमां । वि-
ध्वस्तकनकस्तंभां गजवाजिविवर्जितां ४ हतप्रवीरां विध्वस्तां चमूमिव महाहवे । सफेनामल्पवेगाद्विनां साग-
रस्य समुत्थितां ५ प्रशांतमारुतोद्भूतां तरंगोर्मीमिव विस्वनां । यज्ञे कृतयज्ञोत्सवैः सर्वैः सोमपेयुसयाजकैः ६
पर्वकालेतु संहृत्ये वेदीं गतशिखामिव । गोष्ठेमध्ये स्थितामानीमाचवंती निवत्सकां ७ गोवृषेणापरित्यक्तां गां
कन्यामिवोत्सुकां । प्रभाकरांभैः संश्लिष्टैः प्रज्वलद्भिर्महाशिखैः ८ विमुक्तां मणिभिर्जात्यैर्नागमुक्तावलीं
मिव । सहसाचलितां स्थानान्महीं पुण्यक्षयादिव ९ संहृतद्युतिविस्तारां तारामिव नभश्च्युतां । पुष्पनद्धांव
संतां नेमन्नभ्रमरनादितां १० घोरदावाग्निविप्लुष्टकांतां वनलतामिव । संवृद्धव्यालभुजंगां विक्षिप्तविपणापणां
११ पक्वनवशालिनसवां [illegible]मिवांबुधरैर्हतां । अपसुतोदकां निर्वीपपां निपतितामिव १२ शुष्कनोयां महामत्स्यां
कूर्मैश्च बहुभिर्वृतां । [illegible]नामनिविस्तीर्णांवापीमिव हतोत्पलां १३ पुरुषस्य प्रहृष्टस्य प्रतिपिङ्गानुलेपनां
स्नातस्नामिव शोकेन मात्रयाहि विभूषणां १४ प्रावृषीव महानद्याः प्रविष्टस्या विसंचवां । प्रक्रन्नांनीलजीमू-
तैर्भास्करस्य प्रभामिव १५ भवनस्तु रथस्थाय श्रीमान्दशरथात्मजः । आहयंतं रथश्रेष्ठं सारथिं वाक्यमब्रवी-
त् । १६ किंनु रथवन्द्ययां गंभीरो मूर्च्छितेनि शाम्यते । यथा पूर्वमयोध्यायां गीतवादित्रनिःस्वनः १७ वारु-
णीपानमत्तैश्च नैकतानशाल्यिभिः संपतद्भि[illegible]यां नाभिभांति दिशोदश । १८ वाकरणीर्भंडगंधश्च

...स्यगवस्त्रसुर्क्तिनः धूपेनागुरुगंधश्च नाधावातिसमंततः [illegible] यानइवरवे [illegible]

नाना निनादश्च भूयंते न यथा पुरा २० अयोध्यां तु प्रविश्यैव जगाम भवनं पितुः तेन हीनं नरेंद्रेण सिंहहीनां गुहामि

व २१ इत्यार्षे श्रीरामायणे अयोध्याकांडे भरतप्रवेशो नाम सर्गः ॥ अयोध्यायां तु निक्षिप्य मातॄः सर्वाः यतव्रतः

शोकसंतप्तो गुरूंस्सर्वानुवाच ह १ नंदिग्रामं गमिष्यामि सर्वानामंत्रयामि वः तत्र दुःखमिदं सर्वं सहिष्ये राघवं विना

२ पिता देवत्वमे राजा वनस्थश्चैव राघवः। रामागमं प्रतीक्षोहं पालयिष्ये वसुंधरां ३ एतच्छ्रुत्वा महद्वाक्यं भरत

स्य महात्मनः। अब्रुवन्मंत्रिणः सर्वे नवसिष्ठपुरोगमाः ४ सदृशं श्लाघनीयं च यदुक्तो भरत त्वया। वचनं भ्रातृ

वत्सल्यादनुरूपमिदं तव। ५ एतत्त्वां भ्रातृलुब्धस्य तिष्ठतो भ्रातृसौहृदे। आर्यमार्गं प्रपन्नस्य कः पुमान्न प्रशंसति।

६ समंत्रिवचनं श्रुत्वा यथाभिलषितं तदा। अब्रवीत्सारथिं वाक्यं रथो मे युज्यतामिति। स प्रहृष्टमना मातॄः सर्वाश्चाभि

निवाद्य सः भरतो रथमारोह[त्] शत्रुघ्नश्च परंतपः ८ आरुह्य च रथं शीघ्रं भ्रातरौ सहितावुभौ ययतुः परया प्रीत्या वृ

तौ मंत्रिपुरोहितैः ९ अग्रतस्तु ययुस्तस्य वसिष्ठप्रमुखा द्विजाः सर्वे च मंत्रिणः मुख्या नंदिग्रामो यतो भवेत् १०

बलं च सर्वं साह्वय रथनागाश्वसंकुलम्। प्रविष्टमंतस्याग्रे श्रेष्ठाश्च पुरवासिनः ११ तत्रस्थस्स तु धर्मात्मा भर

तो गुरुवत्सलः पादुके शिरसि न्यस्य नंदिग्राममुपागमत् १२ ततस्तु भरतः क्षिप्रं नंदिग्रामं प्रविश्य ह। अव

तीर्य रथात्तूर्णं गुरूनिदमुवाच ह १३ एतद्राज्यं मम भ्रात्रा दत्तं संन्यासवत्स्वयम्। योगक्षेमवहे चेमे पादुके हेमभूषिते

[illegible] नी पालयिष्यामि राघवागमकांक्षिणि। क्षिप्रमध्येव संयोज्य राघवस्य च पादुके। १५ [illegible]

...त्राद्रक्ष्याम्यहमेव ॥ निक्षिप्याहं न्यासमिमं राघवेन समागतः ॥ नियात्यगुरवे राज्यं ... रा-
घवस्य च सैन्यस्य पादुके रुचिरे त्विमे ॥ २६ राज्यं चेदमयोध्यायां दत्वा वत्स्यामि निश्चितः ॥ ओमित्येवं ...
अस्थि प्रहृष्टे सुदिने जने ॥ १९ प्रीतिर्मम यशश्चैव भवेद्राज्यं चतुर्गुणं ॥ एवं तु विलपन्वीरो भरतः संभ्रमस्थि-
तः ॥ २० नंदिग्रामे करोद्राज्यं राघवस्य गुणान्स्मरन् ॥ जटी वल्कलधारी च मुनिवेषधरः प्रभुः ॥ नंदिग्रामे
वसद्वीरः ससैन्यो भरतस्तदा ॥ रामागमनमाकांक्षन्भरतो भ्रातृवत्सलः ॥ २१ भ्रातुर्वचनकारी च त-
स्य पादुकयोस्तदा ॥ स वालव्यजनं छत्रं धारयामास वै स्वयं २२ स पादुके निक्षिप्याथ नंदिग्रामे
वसंस्तदा ॥ भरतः शासनं सर्वं पादुकाभ्यां न्यवेदयत् २२ एवं कालो निचक्राम भरतस्य महात्म-
नः यावदागमनं तस्य रामस्याद्भुतकर्मणः २३ ॥ इत्यार्षे श्रीरामायणे वाल्मीकीये अयोध्याकांडे ... श्री-
... सर्गः ॥ ॥ समाप्तश्चायमयोध्याकांडः ॥
श्लोकसहस्राणि नव श्लोकशतानि च ॥ श्लोका नंदेशातैव पुनः श्लोकाश्च सप्ततिः ॥ का० २ ॥
सर्ग ८० ॥ श्लोक ४१२० ॥ ॥ अस्यानंतरं आरण्यकांडो भविष्यति ॥ ॥
संवत् १८९६ कार्त्तिवदि २३ चंद्रदिने ॥ शुभमस्तु लेखकपाठकयोः ॥

राम
अ० का०
२३१

राम